# ऋग्वेद मण्डल १

अ॒ग्निम् ई॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वम् ऋ॒त्विज॑म् ।
होता॑रं रत्न॒धात॑मम् ॥ १ ००१ ०१
अ॒ग्निः पूर्वे॑भि॒र् ऋषि॑भि॒र् ईड्यो॒ नूत॑नैर् उ॒त ।
स दे॒वाँ एह व॑क्षति ॥ १ ००१ ०२
अ॒ग्निना॑ र॒यिम् अ॑श्नव॒त् पोष॑म् ए॒व दि॒वे-दि॑वे ।
य॒शसं॑ वी॒रव॑त्तमम् ॥ १ ००१ ०३
अग्ने॒ यं य॒ज्ञम् अ॑ध्व॒रं वि॒श्वतः॑ परि॒भूर् असि॑ ।
स इद् दे॒वेषु॑ गच्छति ॥ १ ००१ ०४
अ॒ग्निर् होता॑ क॒विक्र॑तुः स॒त्यश् चि॒त्रश्र॑वस्तमः ।
दे॒वो दे॒वेभि॒र् आ ग॑मत् ॥ १ ००१ ०५
यद् अ॒ङ्ग दा॒शुषे॒ त्वम् अग्ने॑ भ॒द्रं क॑रि॒ष्यसि॑ ।
तवेत् तत् स॒त्यम् अ॑ङ्गिरः ॥ १ ००१ ०६
उप॑ त्वाग्ने दि॒वे-दि॑वे॒ दोषा॑वस्तर् धि॒या व॒यम् ।
नमो॒ भर॑न्त॒ एम॑सि ॥ १ ००१ ०७
राज॑न्तम् अध्व॒राणां॑ गो॒पाम् ऋ॒तस्य॒ दीदि॑विम् ।
वर्ध॑मानं॒ स्वे दमे॑ ॥ १ ००१ ०८
स नः॑ पि॒तेव॑ सू॒नवे ऽग्ने॑ सूपाय॒नो भ॑व ।
सच॑स्वा नः स्व॒स्तये॑ ॥ १ ००१ ०९

वाय॒व् आ या॑हि दर्शते॒मे सोमा॒ अरं॑कृताः ।
तेषा॑म् पाहि श्रु॒धी हव॑म् ॥ १ ००२ ०१
वाय॑ उ॒क्थेभि॑र् जरन्ते॒ त्वाम् अच्छा॑ जरि॒तारः॑ ।
सु॒तसो॑मा अह॒र्विदः॑ ॥ १ ००२ ०२
वायो॒ तव॑ प्रपृञ्च॒ती धेना॑ जिगाति दा॒शुषे॑ ।
उ॒रू॒ची सोम॑पीतये ॥ १ ००२ ०३
इन्द्र॑वायू इ॒मे सु॒ता उप॒ प्रयो॑भि॒र् आ ग॑तम् ।

इन्द॑वो वाम् उ॒शन्ति॒ हि ॥ १ ००२ ०४
वाय॒व् इन्द्र॑श् च चेतथः सु॒ताना॑ं वाजिनीवसू ।
ताव् आ या॑त॒म् उप॑ द्र॒वत् ॥ १ ००२ ०५
वाय॒व् इन्द्र॑श् च सुन्व॒त आ या॑त॒म् उप॑ निष्कृ॒तम् ।
म॒क्ष्व् ऐ॒त्था धि॒या न॑रा ॥ १ ००२ ०६
मि॒त्रं हु॑वे पू॒तद॑क्षं॒ वरु॑णं च रि॒शाद॑सम् ।
धियं॑ घृ॒ताचीं॒ साध॑न्ता ॥ १ ००२ ०७
ऋ॒तेन॑ मित्रावरुणाव् ऋतावृधाव् ऋतस्पृशा ।
क्रतु॑म् बृ॒हन्त॑म् आशाथे ॥ १ ००२ ०८
क॒वी नो॑ मि॒त्रावरु॑णा तुविजा॒ता उ॑रु॒क्षया॑ ।
दक्षं॑ दधाते अ॒पस॑म् ॥ १ ००२ ०९

अश्वि॑ना॒ यज्व॑री॒र् इषो॒ द्रव॑त्पाणी॒ शुभ॑स् पती ।
पुरु॑भुजा चन॒स्यत॑म् ॥ १ ००३ ०१
अश्वि॑ना॒ पुरु॑दंससा॒ नरा॒ शवी॑रया धि॒या ।
धिष्ण्या॒ वन॑तं गिरः॑ ॥ १ ००३ ०२
दस्रा॑ युवाक॑वः सु॒ता नास॑त्या वृ॒क्तब॑र्हिषः ।
आ या॑तं रुद्रवर्तनी ॥ १ ००३ ०३
इन्द्रा या॑हि चित्रभानो सु॒ता इ॒मे त्वा॒यवः॑ ।
अण्वी॑भि॒स् तना॑ पू॒तासः॑ ॥ १ ००३ ०४
इन्द्रा या॑हि धि॒येषि॒तो विप्र॑जूतः सु॒ताव॑तः ।
उप॒ ब्रह्मा॑णि वा॒घतः॑ ॥ १ ००३ ०५
इन्द्रा या॑हि॒ तूतु॑जान॒ उप॒ ब्रह्मा॑णि हरिवः ।
सु॒ते द॑धिष्व न॒श् चनः॑ ॥ १ ००३ ०६
ओमा॑सश् चर्षणीधृतो॒ विश्वे॑ देवास॒ आ ग॑त ।
दाश्वांसो॑ दा॒शुषः॑ सु॒तम् ॥ १ ००३ ०७
विश्वे॑ दे॒वासो॑ अ॒प्तुरः॑ सु॒तम् आ ग॑न्त॒ तूर्ण॑यः ।

उस्रा इव स्वसराणि ॥ १ ००३ ०८
विश्वे देवासो अस्रिध एहिमायासो अद्रुहः ।
मेधं जुषन्त वह्नयः ॥ १ ००३ ०९
पावका नः सरस्वती वाजेभिर् वाजिनीवती ।
यज्ञं वष्टु धियावसुः ॥ १ ००३ १०
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।
यज्ञं दधे सरस्वती ॥ १ ००३ ११
महो अर्णः सरस्वती प्र चेतयति केतुना ।
धियो विश्वा वि राजति ॥ १ ००३ १२

सुरूपकृत्नुम् ऊतये सुदुघाम् इव गोदुहे ।
जुहूमसि द्यवि-द्यवि ॥ १ ००४ ०१
उप नः सवना गहि सोमस्य सोमपाः पिब ।
गोदा इद् रेवतो मदः ॥ १ ००४ ०२
अथा ते अन्तमानां विद्याम सुमतीनाम् ।
मा नो अति ख्य आ गहि ॥ १ ००४ ०३
परेहि विग्रम् अस्तृतम् इन्द्रम् पृच्छा विपश्चितम् ।
यस् ते सखिभ्य आ वरम् ॥ १ ००४ ०४
उत ब्रुवन्तु नो निदो निर् अन्यतश् चिद् आरत ।
दधाना इन्द्र इद् दुवः ॥ १ ००४ ०५
उत नः सुभगाँ अरिर् वोचेयुर् दस्म कृष्टयः ।
स्यामेद् इन्द्रस्य शर्मणि ॥ १ ००४ ०६
एम् आशुम् आशवे भर यज्ञश्रियं नृमादनम् ।
पतयन् मन्दयत्सखम् ॥ १ ००४ ०७
अस्य पीत्वा शतक्रतो घनो वृत्राणाम् अभवः ।
प्रावो वाजेषु वाजिनम् ॥ १ ००४ ०८
तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो ।

धना॑नाम् इन्द्र सा॒तये॑ ॥ १ ००४ ०९
यो रा॒यो॒ऽवनि॑र् म॒हान् सु॑पा॒रः सु॑न्व॒तः सखा॑ ।
तस्मा॒ इन्द्रा॑य गायत ॥ १ ००४ १०

आ त्व् एता॒ नि षी॑द॒तेन्द्र॑म् अ॒भि प्र गा॑यत ।
सखा॑य॒ स्तोम॑वाहसः ॥ १ ००५ ०१
पु॒रु॒तम॑म् पु॒रू॒णाम् ईशा॑नं॒ वार्या॑णाम् ।
इन्द्रं॒ सोमे॒ सचा॑ सु॒ते ॥ १ ००५ ०२
स घा॑ नो॒ योग॒ आ भु॑व॒त् स रा॒ये स पुरं॑ध्याम् ।
गम॒द् वाजे॑भि॒र् आ स नः॑ ॥ १ ००५ ०३
यस्य॑ सं॒स्थे न वृ॒ण्वते॒ हरी॑ स॒मत्सु॒ शत्र॑वः ।
तस्मा॒ इन्द्रा॑य गायत ॥ १ ००५ ०४
सु॒त॒पाव्ने॑ सु॒ता इ॒मे शुच॑यो यन्ति वी॒तये॑ ।
सोमा॑सो॒ दध्या॑शिरः ॥ १ ००५ ०५
त्वं सु॒तस्य॑ पी॒तये॑ स॒द्यो वृ॒द्धो अ॑जायथाः ।
इन्द्र॒ ज्यैष्ठ्या॑य सुक्रतो ॥ १ ००५ ०६
आ त्वा॑ विशन्त्व् आ॒शवः॒ सोमा॑स इन्द्र गिर्वणः ।
शं ते॑ सन्तु॒ प्रचे॑तसे ॥ १ ००५ ०७
त्वां स्तोमा॑ अवीवृध॒न् त्वाम् उ॒क्था श॑तक्रतो ।
त्वां व॑र्धन्तु नो॒ गिरः॑ ॥ १ ००५ ०८
अक्षि॑तोतिः सनेद् इ॒मं वाज॒म् इन्द्रः॑ सह॒स्रिण॑म् ।
यस्मि॒न् विश्वा॑नि॒ पौंस्या॑ ॥ १ ००५ ०९
मा नो॒ मर्ता॑ अ॒भि द्रु॑हन् त॒नूना॑म् इन्द्र गिर्वणः ।
ईशा॑नो यवया व॒धम् ॥ १ ००५ १०

यु॒ञ्जन्ति॑ ब्र॒ध्नम् अ॑रु॒षं चर॑न्त॒म् परि॑ त॒स्थुषः॑ ।

रोचन्ते रोचना दिवि ॥ १ ००६ ०१
युञ्जन्त्य् अस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ॥ १ ००६ ०२
केतुं कृण्वन्न् अकेतवे पेशो मर्या अपेशसे ।
सम् उषद्भिर् अजायथाः ॥ १ ००६ ०३
आद् अह स्वधाम् अनु पुनर् गर्भत्वम् एरिरे ।
दधाना नाम यज्ञियम् ॥ १ ००६ ०४
वीळु चिद् आरुजत्नुभिर् गुहा चिद् इन्द्र वह्निभिः ।
अविन्द उस्रिया अनु ॥ १ ००६ ०५
देवयन्तो यथा मतिम् अच्छा विदद्वसुं गिरः ।
महाम् अनूषत श्रुतम् ॥ १ ००६ ०६
इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।
मन्दू समानवर्चसा ॥ १ ००६ ०७
अनवद्यैर् अभिद्युभिर् मखः सहस्वद् अर्चति ।
गणैर् इन्द्रस्य काम्यैः ॥ १ ००६ ०८
अतः परिज्मन्न् आ गहि दिवो वा रोचनाद् अधि ।
सम् अस्मिन्न् ऋञ्जते गिरः ॥ १ ००६ ०९
इतो वा सातिम् ईमहे दिवो वा पार्थिवाद् अधि ।
इन्द्रम् महो वा रजसः ॥ १ ००६ १०

इन्द्रम् इद् गाथिनो बृहद् इन्द्रम् अर्केभिर् अर्किणः ।
इन्द्रं वाणीर् अनूषत ॥ १ ००७ ०१
इन्द्र इद् धर्योः सचा सम्मिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥ १ ००७ ०२
इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि ।
वि गोभिर् अद्रिम् ऐरयत् ॥ १ ००७ ०३
इन्द्र वाजेषु नो ऽव सहस्रप्रधनेषु च ।

उ॒ग्र उ॒ग्राभि॑र् ऊ॒तिभिः॑ ॥ १ ००७ ०४
इन्द्रं॑ व॒यम् म॑हाध॒न इन्द्र॒म् अर्भे॑ हवामहे ।
यु॒जं॑ वृ॒त्रेषु॑ व॒ज्रिण॑म् ॥ १ ००७ ०५
स नो॑ वृषन्न् अ॒मुं च॒रुं सत्रा॑दाव॒न्न् अपा॑ वृधि ।
अ॒स्मभ्य॒म् अप्र॑तिष्कुतः ॥ १ ००७ ०६
तु॒ञ्जे-तु॑ञ्जे य उत्त॑रे॒ स्तोमा॒ इन्द्र॑स्य व॒ज्रिणः॑ ।
न वि॑न्धे अस्य सुष्टु॒तिम् ॥ १ ००७ ०७
वृषा॑ यू॒थेव॒ वंस॑गः कृ॒ष्टीर् इ॑य॒र्त्य् ओज॑सा ।
ईशा॑नो॒ अप्र॑तिष्कुतः ॥ १ ००७ ०८
य एक॑श् चर्षणी॒नां वसू॑नाम् इर॒ज्यति॑ ।
इन्द्रः॒ पञ्च॑ क्षिती॒नाम् ॥ १ ००७ ०९
इन्द्रं॑ वो वि॒श्वत॒स् परि॒ हवा॑महे॒ जने॑भ्यः ।
अ॒स्माक॑म् अस्तु॒ केव॑लः ॥ १ ००७ १०

एन्द्र॑ सान॒सिं र॒यिं स॒जित्वा॑नं सदा॒सह॑म् ।
वर्षि॑ष्ठम् ऊ॒तये॑ भर ॥ १ ००८ ०१
नि येन॑ मुष्टिह॒त्यया॒ नि वृ॒त्रा रु॒णधा॑महै ।
त्वोता॑सो॒ न्य् अर्व॑ता ॥ १ ००८ ०२
इन्द्र॒ त्वोता॑स॒ आ व॒यं वज्रं॑ घ॒ना द॑दीमहि ।
जये॑म॒ सं यु॒धि स्पृधः॑ ॥ १ ००८ ०३
व॒यं शूरे॑भि॒र् अस्तृ॑भि॒र् इन्द्र॒ त्वया॑ यु॒जा व॒यम् ।
सा॒स॒ह्याम॑ पृतन्य॒तः ॥ १ ००८ ०४
म॒हाँ इन्द्रः॑ प॒रश् च॒ नु म॑हि॒त्वम् अ॑स्तु व॒ज्रिणे॑ ।
द्यौर् न प्र॑थि॒ना शवः॑ ॥ १ ००८ ०५
स॒मो॒हे वा॒ य आश॑त॒ नर॑स् तो॒कस्य॒ सनि॑तौ ।
विप्रा॑सो वा धिया॒यवः॑ ॥ १ ००८ ०६
यः कु॒क्षिः सो॑म॒पात॑मः समु॒द्र इ॑व॒ पिन्व॑ते ।

उर्वीर् आपो न काकुदः ॥ १ ००८ ०७
एवा ह्य् अस्य सूनृता विरप्शी गोमती मही ।
पक्वा शाखा न दाशुषे ॥ १ ००८ ०८
एवा हि ते विभूतय ऊतय इन्द्र मावते ।
सद्यश् चित् सन्ति दाशुषे ॥ १ ००८ ०९
एवा ह्य् अस्य काम्या स्तोम उक्थं च शंस्या ।
इन्द्राय सोमपीतये ॥ १ ००८ १०

इन्द्रेहि मत्स्य् अन्धसो विश्वेभिः सोमपर्वभिः ।
महाँ अभिष्टिर् ओजसा ॥ १ ००९ ०१
एम् एनं सृजता सुते मन्दिम् इन्द्राय मन्दिने ।
चक्रिं विश्वानि चक्रये ॥ १ ००९ ०२
मत्स्वा सुशिप्र मन्दिभि स्तोमेभिर् विश्वचर्षणे ।
सचैषु सवनेष्व् आ ॥ १ ००९ ०३
असृग्रम् इन्द्र ते गिरः प्रति त्वाम् उद् अहासत ।
अजोषा वृषभम् पतिम् ॥ १ ००९ ०४
सं चोदय चित्रम् अर्वाग् राध इन्द्र वरेण्यम् ।
असद् इत् ते विभु प्रभु ॥ १ ००९ ०५
अस्मान् सु तत्र चोदयेन्द्र राये रभस्वतः ।
तुविद्युम्न यशस्वतः ॥ १ ००९ ०६
सं गोमद् इन्द्र वाजवद् अस्मे पृथु श्रवो बृहत् ।
विश्वायुर् धेह्य् अक्षितम् ॥ १ ००९ ०७
अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम् ।
इन्द्र ता रथिनीर् इषः ॥ १ ००९ ०८
वसोर् इन्द्रं वसुपतिं गीर्भिर् गृणन्त ऋग्मियम् ।
होम गन्तारम् ऊतये ॥ १ ००९ ०९
सुते-सुते न्योकसे बृहद् बृहत एद् अरिः ।

इन्द्रा॑य शू॒षम् अ॑र्चति ॥ १ ००९ १०

गाय॑न्ति त्वा गाय॒त्रिणो ऽर्च॑न्त्य् अ॒र्कम् अ॒र्किणः॑ ।
ब्र॒ह्माण॑स् त्वा शतक्रत॒ उद् वं॒शम् इ॑व येमिरे ॥ १ ०१० ०१
यत् सानोः॒ सानु॒म् आरु॑ह॒द् भूर्य् अस्प॑ष्ट॒ कर्त्व॑म् ।
तद् इन्द्रो॒ अर्थं॑ चेतति यू॒थेन॑ वृ॒ष्णिर् ए॑जति ॥ १ ०१० ०२
यु॒क्ष्वा हि के॒शिना॒ हरी॒ वृष॑णा कक्ष्य॒प्रा ।
अथा॑ न इन्द्र सोमपा गि॒राम् उप॑श्रुतिं चर ॥ १ ०१० ०३
एहि॒ स्तोमा॑ँ अ॒भि स्व॑रा॒भि गृ॒णी॒ह्य आ रु॑व ।
ब्रह्म॑ च नो वसो॒ सचेन्द्र॑ य॒ज्ञं च॑ वर्धय ॥ १ ०१० ०४
उ॒क्थम् इन्द्रा॑य॒ शंस्यं॒ वर्ध॑नम् पुरुनि॒ष्षिधे॑ ।
श॒क्रो यथा॑ सु॒तेषु॑ णो रा॒रण॑त् स॒ख्येषु॑ च ॥ १ ०१० ०५
तम् इत् स॑खि॒त्व ईं॑महे॒ तं रा॒ये तं सु॒वीर्ये॑ ।
स श॒क्र उ॒त नः॑ शक॒द् इन्द्रो॒ वसु॒ दय॑मानः ॥ १ ०१० ०६
सु॒वि॒वृतं॑ सुनि॒रज॒म् इन्द्र॒ त्वादा॑त॒म् इद् यशः॑ ।
गवा॒म् अप॑ व्र॒जं वृ॑धि कृणु॒ष्व राधो॑ अद्रिवः ॥ १ ०१० ०७
न॒हि त्वा॒ रोद॑सी उ॒भे ऋ॑घा॒यमा॑ण॒म् इन्व॑तः ।
जेषः॒ स्वर्वतीर् अ॒पः सं गा अ॒स्मभ्यं॑ धूनुहि ॥ १ ०१० ०८
आश्रु॑त्कर्ण श्रु॒धी हवं॒ नू चि॑द् दधिष्व मे॒ गिरः॑ ।
इन्द्र॒ स्तोम॑म् इ॒मम् मम॑ कृ॒ष्वा यु॒जश् चि॒द् अन्त॑रम् ॥ १ ०१० ०९
वि॒द्मा हि त्वा॒ वृष॑न्तमं॒ वाजे॑षु हवन॒श्रुत॑म् ।
वृष॑न्तमस्य हूमह ऊ॒तिं स॑हस्र॒सात॑माम् ॥ १ ०१० १०
आ तू न॑ इन्द्र कौशिक मन्दसा॒नः सु॒तम् पि॑ब ।
नव्य॒म् आयुः॒ प्र सू ति॑र कृ॒धी स॑हस्र॒साम् ऋषि॑म् ॥ १ ०१० ११
परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वतः॑ ।
वृ॒द्धायु॒म् अनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः ॥ १ ०१० १२

इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिम् पतिम् ॥ १ ०११ ०१
सख्ये त इन्द्र वाजिनो मा भेम शवसस् पते ।
त्वाम् अभि प्र णोनुमो जेतारम् अपराजितम् ॥ १ ०११ ०२
पूर्वीर् इन्द्रस्य रातयो न वि दस्यन्त्य् ऊतयः ।
यदी वाजस्य गोमत स्तोतृभ्यो मंहते मघम् ॥ १ ०११ ०३
पुराम् भिन्दुर् युवा कविर् अमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ १ ०११ ०४
त्वं वलस्य गोमतो ऽपावर् अद्रिवो बिलम् ।
त्वां देवा अबिभ्युषस् तुज्यमानास आविषुः ॥ १ ०११ ०५
तवाहं शूर रातिभिः प्रत्य् आयं सिन्धुम् आवदन् ।
उपातिष्ठन्त गिर्वणो विदुष् टे तस्य कारवः ॥ १ ०११ ०६
मायाभिर् इन्द्र मायिनं त्वं शुष्णम् अवातिरः ।
विदुष् टे तस्य मेधिरास् तेषां श्रवांस्य् उत् तिर ॥ १ ०११ ०७
इन्द्रम् ईशानम् ओजसाभि स्तोमा अनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ १ ०११ ०८

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥ १ ०१२ ०१
अग्निम्-अग्निं हवीमभिः सदा हवन्त विश्पतिम् ।
हव्यवाहम् पुरुप्रियम् ॥ १ ०१२ ०२
अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।
असि होता न ईड्यः ॥ १ ०१२ ०३
ताँ उशतो वि बोधय यद् अग्ने यासि दूत्यम् ।
देवैर् आ सत्सि बर्हिषि ॥ १ ०१२ ०४
घृताहवन दीदिवः प्रति ष्म रिषतो दह ।

अग्ने त्वं रक्षस्विनः ॥ १ ०१२ ०५
अग्निनाग्निः सम् इध्यते कविर् गृहपतिर् युवा ।
हव्यवाड् जुह्वास्यः ॥ १ ०१२ ०६
कविम् अग्निम् उप स्तुहि सत्यधर्माणम् अध्वरे ।
देवम् अमीवचातनम् ॥ १ ०१२ ०७
यस् त्वाम् अग्ने हविष्पतिर् दूतं देव सपर्यति ।
तस्य स्म प्राविता भव ॥ १ ०१२ ०८
यो अग्निं देववीतये हविष्माँ आविवासति ।
तस्मै पावक मृळय ॥ १ ०१२ ०९
स नः पावक दीदिवो ऽग्ने देवाँ इहा वह ।
उप यज्ञं हविश् च नः ॥ १ ०१२ १०
स न स्तवान आ भर गायत्रेण नवीयसा ।
रयिं वीरवतीम् इषम् ॥ १ ०१२ ११
अग्ने शुक्रेण शोचिषा विश्वाभिर् देवहूतिभिः ।
इमं स्तोमं जुषस्व नः ॥ १ ०१२ १२

सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते ।
होतः पावक यक्षि च ॥ १ ०१३ ०१
मधुमन्तं तनूनपाद् यज्ञं देवेषु नः कवे ।
अद्या कृणुहि वीतये ॥ १ ०१३ ०२
नराशंसम् इह प्रियम् अस्मिन् यज्ञ उप ह्वये ।
मधुजिह्वं हविष्कृतम् ॥ १ ०१३ ०३
अग्ने सुखतमे रथे देवाँ ईळित आ वह ।
असि होता मनुर्हितः ॥ १ ०१३ ०४
स्तृणीत बर्हिर् आनुषग् घृतपृष्ठम् मनीषिणः ।
यत्रामृतस्य चक्षणम् ॥ १ ०१३ ०५
वि श्रयन्ताम् ऋतावृधो द्वारो देवीर् असश्चतः ।

अद्या नूनं च यष्टवे ॥ १ ०१३ ०६
नक्तोषासा सुपेशसास्मिन् यज्ञ उप ह्वये ।
इदं नो बर्हिर् आसदे ॥ १ ०१३ ०७
ता सुजिह्वा उप ह्वये होतारा दैव्या कवी ।
यज्ञं नो यक्षताम् इमम् ॥ १ ०१३ ०८
इळा सरस्वती मही तिस्रो देवीर् मयोभुवः ।
बर्हिः सीदन्त्व् अस्रिधः ॥ १ ०१३ ०९
इह त्वष्टारम् अग्रियं विश्वरूपम् उप ह्वये ।
अस्माकम् अस्तु केवलः ॥ १ ०१३ १०
अव सृजा वनस्पते देव देवेभ्यो हविः ।
प्र दातुर् अस्तु चेतनम् ॥ १ ०१३ ११
स्वाहा यज्ञं कृणोतनेन्द्राय यज्वनो गृहे ।
तत्र देवाँ उप ह्वये ॥ १ ०१३ १२

ऐभिर् अग्ने दुवो गिरो विश्वेभिः सोमपीतये ।
देवेभिर् याहि यक्षि च ॥ १ ०१४ ०१
आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः ।
देवेभिर् अग्न आ गहि ॥ १ ०१४ ०२
इन्द्रवायू बृहस्पतिम् मित्राग्निम् पूषणम् भगम् ।
आदित्यान् मारुतं गणम् ॥ १ ०१४ ०३
प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः ।
द्रप्सा मध्वश् चमूषदः ॥ १ ०१४ ०४
ईळते त्वाम् अवस्यवः कण्वासो वृक्तबर्हिषः ।
हविष्मन्तो अरंकृतः ॥ १ ०१४ ०५
घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः ।
आ देवान् सोमपीतये ॥ १ ०१४ ०६
तान् यजत्राँ ऋतावृधो ऽग्ने पत्नीवतस् कृधि ।

मध्वः सुजिह्व पायय ॥ १ ०१४ ०७
ये यजत्रा य ईड्यास् ते ते पिबन्तु जिह्वया ।
मधोर् अग्ने वषट्कृति ॥ १ ०१४ ०८
आकीं सूर्यस्य रोचनाद् विश्वान् देवाँ उषर्बुधः ।
विप्रो होतेह वक्षति ॥ १ ०१४ ०९
विश्वेभिः सोम्यम् मध्व् अग्न इन्द्रेण वायुना ।
पिबा मित्रस्य धामभिः ॥ १ ०१४ १०
त्वं होता मनुर्हितो ऽग्ने यज्ञेषु सीदसि ।
सेमं नो अध्वरं यज ॥ १ ०१४ ११
युक्ष्वा ह्य् अरुषी रथे हरितो देव रोहितः ।
ताभिर् देवाँ इहा वह ॥ १ ०१४ १२

इन्द्र सोमम् पिब ऋतुना त्वा विशन्त्व् इन्दवः ।
मत्सरासस् तदोकसः ॥ १ ०१५ ०१
मरुतः पिबत ऋतुना पोत्राद् यज्ञम् पुनीतन ।
यूयं हि ष्ठा सुदानवः ॥ १ ०१५ ०२
अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना ।
त्वं हि रत्नधा असि ॥ १ ०१५ ०३
अग्ने देवाँ इहा वह सादया योनिषु त्रिषु ।
परि भूष पिब ऋतुना ॥ १ ०१५ ०४
ब्राह्मणाद् इन्द्र राधसः पिबा सोमम् ऋतूँर् अनु ।
तवेद् धि सख्यम् अस्तृतम् ॥ १ ०१५ ०५
युवं दक्षं धृतव्रत मित्रावरुण दूळभम् ।
ऋतुना यज्ञम् आशाथे ॥ १ ०१५ ०६
द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे ।
यज्ञेषु देवम् ईळते ॥ १ ०१५ ०७
द्रविणोदा ददातु नो वसूनि यानि शृण्विरे ।

देवेषु ता वनामहे ॥ १ ०१५ ०८
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत ।
नेष्ट्राद् ऋतुभिर् इष्यत ॥ १ ०१५ ०९
यत् त्वा तुरीयम् ऋतुभिर् द्रविणोदो यजामहे ।
अध स्मा नो ददिर् भव ॥ १ ०१५ १०
अश्विना पिबतम् मधु दीद्यग्नी शुचिव्रता ।
ऋतुना यज्ञवाहसा ॥ १ ०१५ ११
गार्हपत्येन सन्त्य ऋतुना यज्ञनीर् असि ।
देवान् देवयते यज ॥ १ ०१५ १२

आ त्वा वहन्तु हरयो वृषणं सोमपीतये ।
इन्द्र त्वा सूरचक्षसः ॥ १ ०१६ ०१
इमा धाना घृतस्नुवो हरी इहोप वक्षतः ।
इन्द्रं सुखतमे रथे ॥ १ ०१६ ०२
इन्द्रम् प्रातर् हवामह इन्द्रम् प्रयत्य् अध्वरे ।
इन्द्रं सोमस्य पीतये ॥ १ ०१६ ०३
उप नः सुतम् आ गहि हरिभिर् इन्द्र केशिभिः ।
सुते हि त्वा हवामहे ॥ १ ०१६ ०४
सेमं न स्तोमम् आ गह्य् उपेदं सवनं सुतम् ।
गौरो न तृषितः पिब ॥ १ ०१६ ०५
इमे सोमास इन्दवः सुतासो अधि बर्हिषि ।
ताँ इन्द्र सहसे पिब ॥ १ ०१६ ०६
अयं ते स्तोमो अग्रियो हृदिस्पृग् अस्तु शंतमः ।
अथा सोमं सुतम् पिब ॥ १ ०१६ ०७
विश्वम् इत् सवनं सुतम् इन्द्रो मदाय गच्छति ।
वृत्रहा सोमपीतये ॥ १ ०१६ ०८
सेमं नः कामम् आ पृण गोभिर् अश्वैः शतक्रतो ।

स्तवाम त्वा स्वाध्यः ॥ १ ०१६ ०९

इन्द्रावरुणयोर् अहं सम्राजोर् अव आ वृणे ।
ता नो मृळात ईदृशे ॥ १ ०१७ ०१
गन्तारा हि स्थो ऽवसे हवं विप्रस्य मावतः ।
धर्तारा चर्षणीनाम् ॥ १ ०१७ ०२
अनुकामं तर्पयेथाम् इन्द्रावरुण राय आ ।
ता वां नेदिष्ठम् ईमहे ॥ १ ०१७ ०३
युवाकु हि शचीनां युवाकु सुमतीनाम् ।
भूयाम वाजदाव्नाम् ॥ १ ०१७ ०४
इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम् ।
क्रतुर् भवत्य् उक्थ्यः ॥ १ ०१७ ०५
तयोर् इद् अवसा वयं सनेम नि च धीमहि ।
स्याद् उत प्ररेचनम् ॥ १ ०१७ ०६
इन्द्रावरुण वाम् अहं हुवे चित्राय राधसे ।
अस्मान् सु जिग्युषस् कृतम् ॥ १ ०१७ ०७
इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्व् आ ।
अस्मभ्यं शर्म यच्छतम् ॥ १ ०१७ ०८
प्र वाम् अश्नोतु सुष्टुतिर् इन्द्रावरुण यां हुवे ।
याम् ऋधाथे सधस्तुतिम् ॥ १ ०१७ ०९

सोमानं स्वरणं कृणुहि ब्रह्मणस् पते ।
कक्षीवन्तं य औशिजः ॥ १ ०१८ ०१
यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः ।
स नः सिषक्तु यस् तुरः ॥ १ ०१८ ०२
मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य ।

रक्षा णो ब्रह्मणस् पते ॥ १ ०१८ ०३
स घा वीरो न रिष्यति यम् इन्द्रो ब्रह्मणस् पतिः ।
सोमो हिनोति मर्त्यम् ॥ १ ०१८ ०४
त्वं तम् ब्रह्मणस् पते सोम इन्द्रश् च मर्त्यम् ।
दक्षिणा पात्व् अंहसः ॥ १ ०१८ ०५
सदसस् पतिम् अद्भुतम् प्रियम् इन्द्रस्य काम्यम् ।
सनिम् मेधाम् अयासिषम् ॥ १ ०१८ ०६
यस्माद् ऋते न सिध्यति यज्ञो विपश्चितश् चन ।
स धीनां योगम् इन्वति ॥ १ ०१८ ०७
आद् ऋध्नोति हविष्कृतिम् प्राञ्चं कृणोत्य् अध्वरम् ।
होत्रा देवेषु गच्छति ॥ १ ०१८ ०८
नराशंसं सुधृष्टमम् अपश्यं सप्रथस्तमम् ।
दिवो न सद्ममखसम् ॥ १ ०१८ ०९

प्रति त्यं चारुम् अध्वरं गोपीथाय प्र हूयसे ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०१
नहि देवो न मर्त्यो महस् तव क्रतुम् परः ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०२
ये महो रजसो विदुर् विश्वे देवासो अद्रुहः ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०३
य उग्रा अर्कम् आनृचुर् अनाधृष्टास ओजसा ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०४
ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०५
ये नाकस्याधि रोचने दिवि देवास आसते ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०६
य ईङ्खयन्ति पर्वतान् तिरः समुद्रम् अर्णवम् ।

मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०७
आ ये तन्वन्ति रश्मिभिस् तिरः समुद्रम् ओजसा ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०८
अभि त्वा पूर्वपीतये सृजामि सोम्यम् मधु ।
मरुद्भिर् अग्न आ गहि ॥ १ ०१९ ०९

अयं देवाय जन्मने स्तोमो विप्रेभिर् आसया ।
अकारि रत्नधातमः ॥ १ ०२० ०१
य इन्द्राय वचोयुजा ततक्षुर् मनसा हरी ।
शमीभिर् यज्ञम् आशत ॥ १ ०२० ०२
तक्षन् नासत्याभ्याम् परिज्मानं सुखं रथम् ।
तक्षन् धेनुं सबर्दुघाम् ॥ १ ०२० ०३
युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः ।
ऋभवो विष्ट्य् अक्रत ॥ १ ०२० ०४
सं वो मदासो अग्मतेन्द्रेण च मरुत्वता ।
आदित्येभिश् च राजभिः ॥ १ ०२० ०५
उत त्यं चमसं नवं त्वष्टुर् देवस्य निष्कृतम् ।
अकर्त चतुरः पुनः ॥ १ ०२० ०६
ते नो रत्नानि धत्तन त्रिर् आ साप्तानि सुन्वते ।
एकम्-एकं सुशस्तिभिः ॥ १ ०२० ०७
अधारयन्त वह्नयो ऽभजन्त सुकृत्यया ।
भागं देवेषु यज्ञियम् ॥ १ ०२० ०८

इहेन्द्राग्नी उप ह्वये तयोर् इत् स्तोमम् उश्मसि ।
ता सोमं सोमपातमा ॥ १ ०२१ ०१
ता यज्ञेषु प्र शंसतेन्द्राग्नी शुम्भता नरः ।

ता गा॑य॒त्रेषु॑ गायत ॥ १ ०२१ ०२
ता मि॒त्रस्य॒ प्रश॑स्तय इन्द्रा॒ग्नी ता ह॑वामहे ।
सो॒म॒पा सोम॑पीतये ॥ १ ०२१ ०३
उ॒ग्रा सन्ता॑ हवामह॒ उपे॒दं सव॑नं सु॒तम् ।
इ॒न्द्रा॒ग्नी एह॒ ग॑च्छताम् ॥ १ ०२१ ०४
ता म॒हान्ता॒ स॒दस्पती॒ इन्द्रा॑ग्नी॒ रक्ष॑ उब्जतम् ।
अप्र॑जाः सन्त्व् अ॒त्रिणः॑ ॥ १ ०२१ ०५
तेन॑ स॒त्येन॑ जागृ॒तम् अधि॑ प्र॒चेतुने॑ प॒दे ।
इन्द्रा॑ग्नी॒ शर्म॑ यच्छतम् ॥ १ ०२१ ०६

प्रा॒त॒र्युजा॒ वि बो॑धया॒श्विना॒व् एह ग॑च्छताम् ।
अ॒स्य सोम॑स्य पी॒तये॑ ॥ १ ०२२ ०१
या सु॒रथा॑ र॒थीत॑मो॒भा दे॒वा दि॑वि॒स्पृशा॑ ।
अ॒श्विना॒ ता ह॑वामहे ॥ १ ०२२ ०२
या वां॒ कशा॒ मधु॑म॒त्य् अश्वि॑ना सू॒नृता॑वती ।
तया॑ य॒ज्ञम् मि॑मिक्षतम् ॥ १ ०२२ ०३
न॒हि वा॒म् अस्ति॑ दू॒रके यत्रा॒ रथे॒न गच्छ॑थः ।
अश्वि॑ना सो॒मिनो॑ गृ॒हम् ॥ १ ०२२ ०४
हिर॑ण्यपाणिम् ऊ॒तये॑ सवि॒ता॒रम् उप॑ ह्वये ।
स चेत्ता॑ दे॒वता॑ प॒दम् ॥ १ ०२२ ०५
अ॒पां नपा॒त॒म् अव॑से सवि॒ता॒रम् उप॑ स्तुहि ।
तस्य॑ व्र॒तान्य् उ॑श्मसि ॥ १ ०२२ ०६
वि॒भ॒क्तारं॑ हवामहे॒ वसो॑श् चि॒त्रस्य॒ राध॑सः ।
स॒वि॒तारं॑ नृ॒चक्ष॑सम् ॥ १ ०२२ ०७
सखा॑य॒ आ नि षी॑दत सवि॒ता स्तोम्यो॒ नु नः॑ ।
दाता॒ राधां॑सि शुम्भति ॥ १ ०२२ ०८
अग्ने॒ पत्नी॑र् इ॒हा व॑ह दे॒वाना॑म् उश॒तीर् उप॑ ।

त्वष्टारं सोमपीतये ॥ १ ०२२ ०९
आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीम् ।
वरूत्रीं धिषणां वह ॥ १ ०२२ १०
अभि नो देवीर् अवसा महः शर्मणा नृपत्नीः ।
अच्छिन्नपत्राः सचन्ताम् ॥ १ ०२२ ११
इहेन्द्राणीम् उप ह्वये वरुणानीं स्वस्तये ।
अग्नायीं सोमपीतये ॥ १ ०२२ १२
मही द्यौः पृथिवी च न इमं यज्ञम् मिमिक्षताम् ।
पिपृतां नो भरीमभिः ॥ १ ०२२ १३
तयोर् इद् घृतवत् पयो विप्रा रिहन्ति धीतिभिः ।
गन्धर्वस्य ध्रुवे पदे ॥ १ ०२२ १४
स्योना पृथिवि भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथः ॥ १ ०२२ १५
अतो देवा अवन्तु नो यतो विष्णुर् विचक्रमे ।
पृथिव्याः सप्त धामभिः ॥ १ ०२२ १६
इदं विष्णुर् वि चक्रमे त्रेधा नि दधे पदम् ।
समूळ्हम् अस्य पांसुरे ॥ १ ०२२ १७
त्रीणि पदा वि चक्रमे विष्णुर् गोपा अदाभ्यः ।
अतो धर्माणि धारयन् ॥ १ ०२२ १८
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ॥ १ ०२२ १९
तद् विष्णोः परमम् पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुर् आततम् ॥ १ ०२२ २०
तद् विप्रासो विपन्यवो जागृवांसः सम् इन्धते ।
विष्णोर् यत् परमम् पदम् ॥ १ ०२२ २१

तीव्राः सोमास आ गह्य् आशीर्वन्तः सुता इमे ।

वायो तान् प्रस्थितान् पिब ॥ १ ०२३ ०१
उभा देवा दिविस्पृशेन्द्रवायू हवामहे ।
अस्य सोमस्य पीतये ॥ १ ०२३ ०२
इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये ।
सहस्राक्षा धियस् पती ॥ १ ०२३ ०३
मित्रं वयं हवामहे वरुणं सोमपीतये ।
जज्ञाना पूतदक्षसा ॥ १ ०२३ ०४
ऋतेन याव् ऋतावृधाव् ऋतस्य ज्योतिषस् पती ।
ता मित्रावरुणा हुवे ॥ १ ०२३ ०५
वरुणः प्राविता भुवन् मित्रो विश्वाभिर् ऊतिभिः ।
करतां नः सुराधसः ॥ १ ०२३ ०६
मरुत्वन्तं हवामह इन्द्रम् आ सोमपीतये ।
सजूर् गणेन तृम्पतु ॥ १ ०२३ ०७
इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः ।
विश्वे मम श्रुता हवम् ॥ १ ०२३ ०८
हत वृत्रं सुदानव इन्द्रेण सहसा युजा ।
मा नो दुःशंस ईशत ॥ १ ०२३ ०९
विश्वान् देवान् हवामहे मरुतः सोमपीतये ।
उग्रा हि पृश्निमातरः ॥ १ ०२३ १०
जयताम् इव तन्यतुर् मरुताम् एति धृष्णुया ।
यच् छुभं याथना नरः ॥ १ ०२३ ११
हस्काराद् विद्युतस् पर्य् अतो जाता अवन्तु नः ।
मरुतो मृळयन्तु नः ॥ १ ०२३ १२
आ पूषञ् चित्रबर्हिषम् आघृणे धरुणं दिवः ।
आजा नष्टं यथा पशुम् ॥ १ ०२३ १३
पूषा राजानम् आघृणिर् अपगूळ्हं गुहा हितम् ।
अविन्दच् चित्रबर्हिषम् ॥ १ ०२३ १४
उतो स मह्यम् इन्दुभिः षड् युक्ताँ अनुसेषिधत् ।

गोभि॒र् यवं॒ न च॑र्कृषत् ॥ १ ०२३ १५
अ॒म्बयो॑ य॒न्त्य् अध्व॑भिर् जा॒मयो॑ अध्वरीय॒ताम् ।
पृ॒ञ्च॒तीर् मधु॑ना॒ पयः॑ ॥ १ ०२३ १६
अ॒मूर् या उप॒ सूर्ये॒ याभि॑र् वा॒ सूर्यः॑ स॒ह ।
ता नो॑ हिन्वन्त्व् अध्व॒रम् ॥ १ ०२३ १७
अ॒पो दे॒वीर् उप॑ ह्वये॒ यत्र॒ गावः॒ पिब॑न्ति नः ।
सिन्धु॑भ्यः॒ कर्त्वं॑ ह॒विः ॥ १ ०२३ १८
अ॒प्स्व् अ १॒ न्तर् अ॒मृत॑म् अ॒प्सु भे॑ष॒जम् अ॒पाम् उ॒त प्रश॑स्तये ।
देवा॒ भव॑त वा॒जिनः॑ ॥ १ ०२३ १९
अ॒प्सु मे॒ सोमो॑ अब्रवीद् अ॒न्तर् विश्वा॑नि भेष॒जा ।
अ॒ग्निं च॑ वि॒श्वश॑म्भुवम् आप॑श् च वि॒श्वभे॑षजीः ॥ १ ०२३ २०
आपः॑ पृणी॒त भे॑षजं॒ वरू॑थं त॒न्वे॒ ३॑ मम॑ ।
ज्योक् च॒ सूर्यं॑ दृ॒शे ॥ १ ०२३ २१
इ॒दम् आ॑पः॒ प्र व॑हत॒ यत् किं च॑ दुरि॒तम् मयि॑ ।
यद् वा॒हम् अ॑भिदु॒द्रोह॒ यद् वा॑ शे॒प उ॒तानृ॑तम् ॥ १ ०२३ २२
आपो॑ अ॒द्यान्व् अ॑चारिषं॒ रसे॑न॒ सम् अ॑गस्महि ।
पय॑स्वान् अग्न॒ आ ग॑हि॒ तम् मा॒ सं सृ॑ज॒ वर्च॑सा ॥ १ ०२३ २३
सम् मा॑ग्ने॒ वर्च॑सा सृज॒ सम् प्र॒जया॒ सम् आयु॑षा ।
वि॒द्युर् मे॑ अस्य दे॒वा इन्द्रो॑ विद्यात् स॒ह ऋषि॑भिः ॥ १ ०२३ २४

कस्य॑ नू॒नं क॑त॒मस्या॒मृता॑ना॒म् मना॑महे॒ चारु॑ दे॒वस्य॒ नाम॑ ।
को नो॑ म॒ह्या अदि॑तये॒ पुन॑र् दात् पि॒तरं॑ च दृ॒शेय॑म् मा॒तरं॑ च ॥ १ ०२४ ०१
अ॒ग्नेर् व॒यम् प्र॑थ॒मस्या॒मृता॑ना॒म् मना॑महे॒ चारु॑ दे॒वस्य॒ नाम॑ ।
स नो॑ म॒ह्या अदि॑तये॒ पुन॑र् दात् पि॒तरं॑ च दृ॒शेय॑म् मा॒तरं॑ च ॥ १ ०२४ ०२
अ॒भि त्वा॑ देव सवित॒र् ईशा॑नं॒ वार्या॑णाम् ।
सदा॑वन् भा॒गम् ई॑महे ॥ १ ०२४ ०३
यश् चि॒द् धि त॑ इ॒त्था भगः॑ शशमा॒नः पु॒रा नि॒दः ।

अद्वेषो हस्तयोर् दधे ॥ १ ०२४ ०४
भगभक्तस्य ते वयम् उद् अशेम तवावसा ।
मूर्धानं राय आरभे ॥ १ ०२४ ०५
नहि ते क्षत्रं न सहो न मन्युं वयश् चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर् न ये वातस्य प्रमिनन्त्य् अभ्वम् ॥ १ ०२४ ०६
अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीना स्थुर् उपरि बुध्न एषाम् अस्मे अन्तर् निहिताः केतवः स्युः ॥ १ ०२४ ०७
उरुं हि राजा वरुणश् चकार सूर्याय पन्थाम् अन्वेतवा उ ।
अपदे पादा प्रतिधातवे ऽकर् उतापवक्ता हृदयाविधश् चित् ॥ १ ०२४ ०८
शतं ते राजन् भिषजः सहस्रम् उर्वी गभीरा सुमतिष् टे अस्तु ।
बाधस्व दूरे निरृतिम् पराचैः कृतं चिद् एनः प्र मुमुग्ध्य् अस्मत् ॥ १ ०२४ ०९
अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद् दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच् चन्द्रमा नक्तम् एति ॥ १ ०२४ १०
तत् त्वा यामि ब्रह्मणा वन्दमानस् तद् आ शास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्य् उरुशंस मा न आयुः प्र मोषीः ॥ १ ०२४ ११
तद् इन् नक्तं तद् दिवा मह्यम् आहुस् तद् अयं केतो हृद आ वि चष्टे ।
शुनःशेपो यम् अह्वद् गृभीतः सो अस्मान् राजा वरुणो मुमोक्तु ॥ १ ०२४ १२
शुनःशेपो ह्य् अह्वद् गृभीतस् त्रिष्व् आदित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्याद् विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥ १ ०२४ १३
अव ते हेळो वरुण नमोभिर् अव यज्ञेभिर् ईमहे हविर्भिः ।
क्षयन्न् अस्मभ्यम् असुर प्रचेता राजन्न् एनांसि शिश्रथः कृतानि ॥ १ ०२४ १४
उद् उत्तमं वरुण पाशम् अस्मद् अवाधमं वि मध्यमं श्रथाय ।
अथा वयम् आदित्य व्रते तवानागसो अदितये स्याम ॥ १ ०२४ १५

यच् चिद् धि ते विशो यथा प्र देव वरुण व्रतम् ।
मिनीमसि द्यवि-द्यवि ॥ १ ०२५ ०१
मा नो वधाय हत्नवे जिहीळानस्य रीरधः ।

मा हृ॑णा॒नस्य॑ म॒न्यवे॑ ॥ १ ०२५ ०२
वि मृ॑ळी॒काय॑ ते॒ मनो॑ र॒थीर् अश्वं॒ न संदि॑तम् ।
गी॒र्भिर् व॑रुण सीमहि ॥ १ ०२५ ०३
परा॒ हि मे॒ विम॑न्यवः॒ पत॑न्ति॒ वस्य॑ऽइष्टये ।
वयो॒ न व॑स॒तीर् उप॑ ॥ १ ०२५ ०४
क॒दा क्ष॑त्र॒श्रियं॒ नर॒म् आ वरु॑णं करामहे ।
मृ॒ळी॒कायो॑रु॒चक्ष॑सम् ॥ १ ०२५ ०५
तद् इत् स॑मा॒नम् आ॑शाते॒ वेन॑न्ता॒ न प्र यु॑च्छतः ।
धृ॒तव्र॑ताय दा॒शुषे॑ ॥ १ ०२५ ०६
वेदा॒ यो वी॒नाम् प॒दम् अ॒न्तरि॑क्षेण॒ पत॑ताम् ।
वेद॑ ना॒वः स॑मु॒द्रियः॑ ॥ १ ०२५ ०७
वेद॑ मा॒सो धृ॒तव्र॑तो॒ द्वाद॑श प्र॒जाव॑तः ।
वेदा॒ य उ॑प॒जाय॑ते ॥ १ ०२५ ०८
वेद॒ वात॑स्य व॒र्तनिम् उ॒रोर् ऋ॒ष्वस्य॑ बृह॒तः ।
वेदा॒ ये अ॒ध्यास॑ते ॥ १ ०२५ ०९
नि ष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॒३॑स्व् आ ।
साम्रा॑ज्याय सु॒क्रतुः॑ ॥ १ ०२५ १०
अतो॒ विश्वा॒न्य् अद्भु॑ता चिकि॒त्वाँ अ॒भि प॑श्यति ।
कृ॒तानि॒ या च॒ कर्त्वा॑ ॥ १ ०२५ ११
स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑र् आदि॒त्यः सु॒पथा॑ करत् ।
प्र ण॒ आयूं॑षि तारिषत् ॥ १ ०२५ १२
बिभ्र॑द् द्रा॒पिं हि॑र॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिज॑म् ।
परि॒ स्पशो॒ नि षे॑दिरे ॥ १ ०२५ १३
न यं दिप्स॑न्ति दि॒प्सवो॒ न द्रुह्वा॑णो॒ जना॑नाम् ।
न दे॒वम् अ॒भिमा॑तयः ॥ १ ०२५ १४
उ॒त यो मानु॑षे॒ष्व् आ यश॑श् च॒क्रे असा॒म्य् आ ।
अ॒स्माक॑म् उ॒दरे॒ष्व् आ ॥ १ ०२५ १५
परा॑ मे यन्ति धी॒तयो॒ गावो॒ न गव्यू॑ती॒र् अनु॑ ।

इ॒च्छन्ती॑र् उरु॒चक्ष॑सम् ॥ १ ०२५ १६
सं नु वो॑चावहै॒ पुन॒र् यतो॑ मे॒ मध्व् आभृ॑तम् ।
होते॑व॒ क्षद॑से प्रि॒यम् ॥ १ ०२५ १७
द॒र्शं नु वि॒श्वद॑र्शतं॒ द॒र्शं रथ॒म् अधि॒ क्षमि॑ ।
ए॒ता जु॑षत मे॒ गिर॑ः ॥ १ ०२५ १८
इ॒मम् मे॑ वरुण श्रुधी॒ हव॑म् अ॒द्या च॑ मृळय ।
त्वाम् अ॑व॒स्युर् आ च॑के ॥ १ ०२५ १९
त्वं विश्व॑स्य मेधिर दि॒वश् च॒ ग्मश् च॑ राजसि ।
स याम॑नि॒ प्रति॑ श्रुधि ॥ १ ०२५ २०
उद् उ॑त्त॒मम् मु॑मुग्धि नो॒ वि पाश॑म् मध्य॒मं चृ॑त ।
अवा॑ध॒मानि॑ जी॒वसे॑ ॥ १ ०२५ २१

वसि॑ष्वा॒ हि मि॑येध्य॒ वस्त्रा॑ण्य् ऊर्जाम् पते ।
सेमं नो॑ अध्व॒रं य॑ज ॥ १ ०२६ ०१
नि नो॒ होता॒ वरे॑ण्य॒ः सदा॑ यविष्ठ॒ मन्म॑भिः ।
अग्ने॑ दि॒वित्म॑ता वच॑ः ॥ १ ०२६ ०२
आ हि ष्मा॑ सू॒नवे॑ पि॒तापिर् यज॑त्य् आ॒पये॑ ।
सखा॒ सख्ये॒ वरे॑ण्यः ॥ १ ०२६ ०३
आ नो॑ ब॒र्ही रि॒शाद॑सो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा ।
सीद॑न्तु॒ मनु॑षो यथा ॥ १ ०२६ ०४
पूर्व्य॑ होतर् अ॒स्य नो॒ मन्द॑स्व स॒ख्यस्य॑ च ।
इ॒मा उ॒ षु श्रु॑धी॒ गिर॑ः ॥ १ ०२६ ०५
यच् चि॒द् धि शश्व॑ता॒ तना॑ दे॒वं-दे॑वं॒ यजा॑महे ।
त्वे इद् धू॑यते ह॒विः ॥ १ ०२६ ०६
प्रि॒यो नो॑ अस्तु वि॒श्पति॒र् होता॑ म॒न्द्रो वरे॑ण्यः ।
प्रि॒याः स्व॒ग्नयो॑ व॒यम् ॥ १ ०२६ ०७
स्व॒ग्नयो॒ हि वार्यं॑ दे॒वासो॑ दधि॒रे च॑ नः ।

स्वग्नयो मनामहे ॥ १ ०२६ ०८
अथा न उभयेषाम् अमृत मर्त्यानाम् ।
मिथः सन्तु प्रशस्तयः ॥ १ ०२६ ०९
विश्वेभिर् अग्ने अग्निभिर् इमं यज्ञम् इदं वचः ।
चनो धाः सहसो यहो ॥ १ ०२६ १०

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
सम्राजन्तम् अध्वराणाम् ॥ १ ०२७ ०१
स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ।
मीढ्वाँ अस्माकम् बभूयात् ॥ १ ०२७ ०२
स नो दूराच् चासाच् च नि मर्त्याद् अघायोः ।
पाहि सदम् इद् विश्वायुः ॥ १ ०२७ ०३
इमम् ऊ षु त्वम् अस्माकं सनिं गायत्रं नव्यांसम् ।
अग्ने देवेषु प्र वोचः ॥ १ ०२७ ०४
आ नो भज परमेष्व् आ वाजेषु मध्यमेषु ।
शिक्षा वस्वो अन्तमस्य ॥ १ ०२७ ०५
विभक्तासि चित्रभानो सिन्धोर् ऊर्मा उपाक आ ।
सद्यो दाशुषे क्षरसि ॥ १ ०२७ ०६
यम् अग्ने पृत्सु मर्त्यम् अवा वाजेषु यं जुनाः ।
स यन्ता शश्वतीर् इषः ॥ १ ०२७ ०७
नकिर् अस्य सहन्त्य पर्येता कयस्य चित् ।
वाजो अस्ति श्रवाय्यः ॥ १ ०२७ ०८
स वाजं विश्वचर्षणिर् अर्वद्भिर् अस्तु तरुता ।
विप्रेभिर् अस्तु सनिता ॥ १ ०२७ ०९
जराबोध तद् विविड्ढि विशे-विशे यज्ञियाय ।
स्तोमं रुद्राय दृशीकम् ॥ १ ०२७ १०
स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः ।

धि॒ये वाजा॑य हिन्वतु ॥ १ ०२७ ११
स रे॒वाꣳ इ॑व वि॒श्पति॒र् दैव्यः॑ के॒तुः शृ॑णोतु नः ।
उ॒क्थैर् अ॒ग्निर् बृ॒हद्भा॑नुः ॥ १ ०२७ १२
नमो॑ म॒हद्भ्यो॒ नमो॑ अर्भ॒केभ्यो॒ नमो॒ युव॑भ्यो॒ नम॑ आशि॒नेभ्यः॑ ।
यजा॑म दे॒वान् यदि॑ श॒क्नवा॑म॒ मा ज्याय॑सः॒ शंस॒म् आ वृ॑क्षि देवाः ॥ १ ०२७ १३

यत्र॒ ग्रावा॑ पृ॒थुबु॑ध्न ऊ॒र्ध्वो भव॑ति॒ सोत॑वे ।
उ॒लूख॑लसुताना॒म् अवेद् व् इ॑न्द्र जल्गुलः ॥ १ ०२८ ०१
यत्र॒ द्वाव् इ॑व ज॒घना॑धिषव॒ण्या कृ॒ता ।
उ॒लूख॑लसुताना॒म् अवेद् व् इ॑न्द्र जल्गुलः ॥ १ ०२८ ०२
यत्र॒ नार्य् अ॑पच्यवम् उ॑पच्यवं च॒ शिक्ष॑ते ।
उ॒लूख॑लसुताना॒म् अवेद् व् इ॑न्द्र जल्गुलः ॥ १ ०२८ ०३
यत्र॒ मन्थां॑ विब॒ध्नते॑ र॒श्मीन् यमि॑त॒वा इ॑व ।
उ॒लूख॑लसुताना॒म् अवेद् व् इ॑न्द्र जल्गुलः ॥ १ ०२८ ०४
यच् चि॒द् धि त्वं गृ॒हे-गृ॑ह॒ उलू॑खलक यु॒ज्यसे॑ ।
इ॒ह द्यु॒मत्त॑मं वद॒ जय॑ताम् इव दु॒न्दु॒भिः ॥ १ ०२८ ०५
उ॒त स्म॑ ते वनस्पते॒ वातो॒ वि वा॒त्य् अग्र॒म् इत् ।
अथो॒ इन्द्रा॑य॒ पात॑वे सु॒नु सोम॑म् उलूखल ॥ १ ०२८ ०६
आ॒य॒जी वा॑ज॒सात॑मा॒ ता ह्यु॒१॒॑च्चा विज॑र्भृ॒तः ।
हरी॑ इ॒वान्धां॑सि॒ बप्स॑ता ॥ १ ०२८ ०७
ता नो॑ अ॒द्य व॑नस्पती ऋ॒ष्वाव् ऋ॒ष्वेभिः॑ सो॒तृभिः॑ ।
इन्द्रा॑य॒ मधु॑मत् सुतम् ॥ १ ०२८ ०८
उच् छि॒ष्टं च॒म्वोर् भ॒र॒ सोम॑म् प॒वित्र आ सृ॑ज ।
नि धे॑हि॒ गोर् अधि॑ त्व॒चि ॥ १ ०२८ ०९

यच् चिद् धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आ तू न इन्द्र शंसय गोष्व् अश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ०२९ ०१
शिप्रिन् वाजानाम् पते शचीवस् तव दंसना ।
आ तू न इन्द्र शंसय गोष्व् अश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ०२९ ०२
नि ष्वापया मिथूदृशा सस्ताम् अबुध्यमाने ।
आ तू न इन्द्र शंसय गोष्व् अश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ०२९ ०३
ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय गोष्व् अश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ०२९ ०४
सम् इन्द्र गर्दभम् मृण नुवन्तम् पापयामुया ।
आ तू न इन्द्र शंसय गोष्व् अश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ०२९ ०५
पताति कुण्डृणाच्या दूरं वातो वनाद् अधि ।
आ तू न इन्द्र शंसय गोष्व् अश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ०२९ ०६
सर्वम् परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्व् अश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ०२९ ०७

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् ।
मंहिष्ठं सिञ्च इन्दुभिः ॥ १ ०३० ०१
शतं वा यः शुचीनां सहस्रं वा समाशिराम् ।
एद् उ निम्नं न रीयते ॥ १ ०३० ०२
सं यन् मदाय शुष्मिण एना ह्य् अस्योदरे ।
समुद्रो न व्यचो दधे ॥ १ ०३० ०३
अयम् उ ते सम् अतसि कपोत इव गर्भधिम् ।
वचस् तच् चिन् न ओहसे ॥ १ ०३० ०४
स्तोत्रं राधानाम् पते गिर्वाहो वीर यस्य ते ।
विभूतिर् अस्तु सूनृता ॥ १ ०३० ०५
ऊर्ध्वस् तिष्ठा न ऊतये ऽस्मिन् वाजे शतक्रतो ।
सम् अन्येषु ब्रवावहै ॥ १ ०३० ०६

योगे॑-योगे त॒वस्त॑रं॒ वाजे॑-वाजे हवामहे ।
सखा॑य॒ इन्द्र॑म् ऊ॒तये॑ ॥ १ ०३० ०७
आ घा॑ गम॒द् यदि॒ श्रव॑त् सह॒स्रिणी॑भिर् ऊ॒तिभिः॑ ।
वाजे॑भि॒र् उप॑ नो॒ हव॑म् ॥ १ ०३० ०८
अनु॑ प्र॒त्नस्यौक॑सो हु॒वे तु॑विप्र॒तिं नर॑म् ।
यं ते॒ पूर्व॑म् पि॒ता हु॒वे ॥ १ ०३० ०९
तं त्वा॑ व॒यं वि॑श्ववा॒रा शा॑स्महे पुरुहूत ।
सखे॑ वसो जरि॒तृभ्यः॑ ॥ १ ०३० १०
अ॒स्माकं॑ शि॒प्रिणी॑नां॒ सोम॑पाः सोम॒पाव्ना॑म् ।
सखे॑ वज्रि॒न् सखी॑नाम् ॥ १ ०३० ११
तथा॒ तद् अ॑स्तु सोमपाः॒ सखे॑ वज्रि॒न् तथा॑ कृणु ।
यथा॑ त उ॒श्मसी॒ष्टये॑ ॥ १ ०३० १२
रे॒वतीर्॑ नः सध॒माद॒ इन्द्रे॑ सन्तु तु॒विवा॑जाः ।
क्षु॒मन्तो॒ याभि॒र् मदे॑म ॥ १ ०३० १३
आ घ॒ त्वावा॒न् त्मना॒प्त स्तो॒तृभ्यो॑ धृष्णव् इया॒नः ।
ऋ॒णोर् अक्षं॒ न च॒क्र्योः ॥ १ ०३० १४
आ यद् दुवः॑ शतक्रत॒व् आ कामं॑ जरितॄ॒णाम् ।
ऋ॒णोर् अक्षं॒ न शची॑भिः ॥ १ ०३० १५
शश्व॒द् इन्द्रः॒ पोप्रु॑थद्भिर् जिगाय॒ नान॑दद्भिः॒ शाश्व॑सद्भिर् धना॑नि ।
स नो॑ हिरण्यर॒थं दं॒सना॑वा॒न् स नः॑ सनि॒ता स॒नये॒ स नो॑ ऽदात् ॥ १ ०३० १६
आश्वि॑ना॒व् अश्वा॑वत्ये॒षा या॑तं॒ शवी॑रया ।
गोम॑द् दस्रा॒ हिर॑ण्यवत् ॥ १ ०३० १७
स॒मा॒नयो॑जनो॒ हि वां॒ रथो॑ दस्रा॒व् अम॑र्त्यः ।
स॒मु॒द्रे अ॑श्विनेय॑ते ॥ १ ०३० १८
न्य् अ॒१ घ्न्यस्य॑ मू॒र्धनि॑ च॒क्रं रथ॑स्य येमथुः ।
परि॒ द्याम् अ॒न्यद् ई॑यते ॥ १ ०३० १९
कस् त॑ उषः कधप्रिये भु॒जे मर्तो॑ अमर्त्ये ।
कं न॑क्षसे विभावरि ॥ १ ०३० २०

व॒यं हि ते॒ अम॑न्म॒ह्य आन्ता॒द् आ प॑रा॒कात् ।
अश्वे॒ न चि॑त्रे अरुषि ॥ १ ०३० २१
त्वं त्येभि॒र् आ ग॑हि॒ वाजे॑भिर् दुहितर् दिवः ।
अ॒स्मे र॒यिं नि धा॑रय ॥ १ ०३० २२

त्वम् अ॑ग्ने प्रथ॒मो अङ्गि॑रा॒ ऋषि॑र् दे॒वो दे॒वाना॑म् अभवः शि॒वः सखा॑ ।
तव॑ व्र॒ते क॒वयो॑ विद्म॒नाप॑सो ऽजायन्त म॒रुतो॒ भ्राज॑दृष्टयः ॥ १ ०३१ ०१
त्वम् अ॑ग्ने प्रथ॒मो अङ्गि॑रस्तमः क॒विर् दे॒वाना॒म् परि॑ भूषसि व्र॒तम् ।
वि॒भुर् विश्व॑स्मै॒ भुव॑नाय॒ मेधि॑रो द्विमा॒ता श॒युः क॑ति॒धा चि॑द् आ॒यवे॑ ॥ १ ०३१ ०२
त्वम् अ॑ग्ने प्रथ॒मो मा॑त॒रिश्व॑न आ॒विर् भ॑व सुक्रतू॒या वि॒वस्व॑ते ।
अरे॑जेतां॒ रोद॑सी होतृ॒वूर्ये ऽस॑घ्नोर् भा॒रम् अय॑जो म॒हो व॑सो ॥ १ ०३१ ०३
त्वम् अ॑ग्ने॒ मन॑वे॒ द्याम् अ॑वाशयः पुरू॒रव॑से सु॒कृते॑ सु॒कृत्त॑रः ।
श्वा॒त्रेण॒ यत् पि॒त्रोर् मुच्य॑से॒ पर्य् आ त्वा॒ पूर्व॑म् अनय॒न्न् आप॑र॒म् पुनः॑ ॥ १ ०३१ ०४
त्वम् अ॑ग्ने वृष॒भः पु॑ष्टि॒वर्ध॑न॒ उद्य॑तस्रुचे भवसि श्र॒वाय्यः॑ ।
य आहु॑तिम् परि॒ वेदा॒ वष॑ट्कृति॒म् एका॑यु॒र् अग्रे॒ विश॑ आ॒विवा॑ससि ॥ १ ०३१ ०५
त्वम् अ॑ग्ने वृजि॒नव॑र्तनिं॒ नरं॒ सक्म॑न् पिपर्षि वि॒दथे॑ विचर्षणे ।
यः शूर॑साता॒ परि॑तक्म्ये॒ धने॑ द॒भ्रेभि॑श् चि॒त् समृ॑ता॒ हंसि॒ भूय॑सः ॥ १ ०३१ ०६
त्वं तम् अ॑ग्ने अमृत॒त्व उ॑त्त॒मे मर्तं॑ दधासि॒ श्रव॑से दि॒वे-दि॑वे ।
यस् ता॑तृषा॒ण उ॒भया॑य॒ जन्म॑ने॒ मयः॑ कृ॒णोषि॒ प्रय॒ आ च॑ सू॒रये॑ ॥ १ ०३१ ०७
त्वं नो॑ अग्ने स॒नये॒ धना॑नां य॒शसं॑ का॒रुं कृ॑णुहि॒ स्तवा॑नः ।
ऋ॒ध्याम॒ कर्मा॒पसा॒ नवे॑न दे॒वैर् द्या॑वापृथिवी॒ प्राव॑तं नः ॥ १ ०३१ ०८
त्वं नो॑ अग्ने पि॒त्रोर् उ॒पस्थ॒ आ दे॒वो दे॒वेष्व् अ॑नवद्य॒ जागृ॑विः ।
त॒नू॒कृद् बो॑धि॒ प्रम॑तिश् च का॒रवे॒ त्वं क॑ल्याण॒ वसु॒ विश्व॒म् ओपि॑षे ॥ १ ०३१ ०९
त्वम् अ॑ग्ने॒ प्रम॑तिस् त्वम् पि॒तासि॑ न॒स् त्वं व॑य॒स्कृत् तव॑ जा॒मयो॑ व॒यम् ।
सं त्वा॒ रायः॑ श॒तिनः॒ सं स॑ह॒स्रिणः॑ सु॒वीरं॑ यन्ति व्रत॒पाम् अ॑दाभ्य ॥ १ ०३१ १०
त्वाम् अ॑ग्ने प्रथ॒मम् आ॒युम् आ॒यवे॑ दे॒वा अ॑कृण्व॒न् नहु॑षस्य वि॒श्पति॑म् ।
इळा॑म् अकृण्व॒न् मनु॑षस्य॒ शास॑नीम् पि॒तुर् यत् पु॒त्रो मम॑कस्य॒ जाय॑ते ॥ १ ०३१ ११

त्वं नो अग्ने तव देव पायुभिर् मघोनो रक्ष तन्वश् च वन्द्य ।
त्राता तोकस्य तनये गवाम् अस्य् अनिमेषं रक्षमाणस् तव व्रते ॥ १ ०३१ १२
त्वम् अग्ने यज्यवे पायुर् अन्तरो ऽनिषङ्गाय चतुरक्ष इध्यसे ।
यो रातहव्यो ऽवृकाय धायसे कीरेश् चिन् मन्त्रम् मनसा वनोषि तम् ॥ १ ०३१ १३
त्वम् अग्न उरुशंसाय वाघते स्पार्हं यद् रेक्णः परमं वनोषि तत् ।
आध्रस्य चित् प्रमतिर् उच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥ १ ०३१ १४
त्वम् अग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतम् परि पासि विश्वतः ।
स्वादुक्षद्मा यो वसतौ स्योनकृज् जीवयाजं यजते सोपमा दिवः ॥ १ ०३१ १५
इमाम् अग्ने शरणिम् मीमृषो न इमम् अध्वानं यम् अगाम दूरात् ।
आपिः पिता प्रमतिः सोम्यानाम् भृमिर् अस्य् ऋषिकृन् मर्त्यानाम् ॥ १ ०३१ १६
मनुष्वद् अग्ने अङ्गिरस्वद् अङ्गिरो ययातिवत् सदने पूर्ववच् छुचे ।
अच्छ याह्य् आ वहा दैव्यं जनम् आ सादय बर्हिषि यक्षि च प्रियम् ॥ १ ०३१ १७
एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत् ते चकृमा विदा वा ।
उत प्र णेष्य् अभि वस्यो अस्मान् सं नः सृज सुमत्या वाजवत्या ॥ १ ०३१ १८

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्न् अहिम् अन्व् अपस् ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥ १ ०३२ ०१
अहन्न् अहिम् पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रम् अव जग्मुर् आपः ॥ १ ०३२ ०२
वृषायमाणो ऽवृणीत सोमं त्रिकद्रुकेष्व् अपिबत् सुतस्य ।
आ सायकम् मघवादत्त वज्रम् अहन्न् एनम् प्रथमजाम् अहीनाम् ॥ १ ०३२ ०३
यद् इन्द्राहन् प्रथमजाम् अहीनाम् आन् मायिनाम् अमिनाः प्रोत मायाः ।
आत् सूर्यं जनयन् द्याम् उषासं तादीत्ना शत्रुं न किला विवित्से ॥ १ ०३२ ०४
अहन् वृत्रं वृत्रतरं व्यंसम् इन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक् पृथिव्याः ॥ १ ०३२ ०५
अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधम् ऋजीषम् ।
नातारीद् अस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥ १ ०३२ ०६

अपाद् अहस्तो अपृतन्यद् इन्द्रम् आस्य वज्रम् अधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानम् बुभूषन् पुरुत्रा वृत्रो अशयद् व्यस्तः ॥ १ ०३२ ०७
नदं न भिन्नम् अमुया शयानम् मनो रुहाणा अति यन्त्य् आपः ।
याश् चिद् वृत्रो महिना पर्यतिष्ठत् तासाम् अहिः पत्सुतःशीर् बभूव ॥ १ ०३२ ०८
नीचावया अभवद् वृत्रपुत्रेन्द्रो अस्या अव वधर् जभार ।
उत्तरा सूर् अधरः पुत्र आसीद् दानुः शये सहवत्सा न धेनुः ॥ १ ०३२ ०९
अतिष्ठन्तीनाम् अनिवेशनानां काष्ठानाम् मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्य् आपो दीर्घं तम आशयद् इन्द्रशत्रुः ॥ १ ०३२ १०
दासपत्नीर् अहिगोपा अतिष्ठन् निरुद्धा आपः पणिनेव गावः ।
अपाम् बिलम् अपिहितं यद् आसीद् वृत्रं जघन्वाँ अप तद् ववार ॥ १ ०३२ ११
अश्व्यो वारो अभवस् तद् इन्द्र सृके यत् त्वा प्रत्यहन् देव एकः ।
अजयो गा अजयः शूर सोमम् अवासृजः सर्तवे सप्त सिन्धून् ॥ १ ०३२ १२
नास्मै विद्युन् न तन्यतुः सिषेध न याम् मिहम् अकिरद् ध्रादुनिं च ।
इन्द्रश् च यद् युयुधाते अहिश् चोतापरीभ्यो मघवा वि जिग्ये ॥ १ ०३२ १३
अहेर् यातारं कम् अपश्य इन्द्र हृदि यत् ते जघ्नुषो भीर् अगच्छत् ।
नव च यन् नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि ॥ १ ०३२ १४
इन्द्रो यातो ऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेद् उ राजा क्षयति चर्षणीनाम् अरान् न नेमिः परि ता बभूव ॥ १ ०३२ १५

एतायामोप गव्यन्त इन्द्रम् अस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविद् आद् अस्य रायो गवां केतम् परम् आवर्जते नः ॥ १ ०३३ ०१
उपेद् अहं धनदाम् अप्रतीतं जुष्टां न श्येनो वसतिम् पतामि ।
इन्द्रं नमस्यन्न् उपमेभिर् अर्कैर् य स्तोतृभ्यो हव्यो अस्ति यामन् ॥ १ ०३३ ०२
नि सर्वसेन इषुधीँर् असक्त सम् अर्यो गा अजति यस्य वष्टि ।
चोष्कूयमाण इन्द्र भूरि वामम् मा पणिर् भूर् अस्मद् अधि प्रवृद्ध ॥ १ ०३३ ०३
वधीर् हि दस्युं धनिनं घनेनँ एकश् चरन्न् उपशाकेभिर् इन्द्र ।
धनोर् अधि विषुणक् ते व्य् आयन्न् अयज्वानः सनकाः प्रेतिम् ईयुः ॥ १ ०३३ ०४

परा॑ चिच् छी॒र्षा व॑वृजु॒स् त इ॒न्द्राय॑ज्वानो॒ यज्व॑भि॒ स्पर्ध॑मानाः ।
प्र यद् दि॒वो ह॑रिव स्थातर् उग्र॒ निर् अ॑व्र॒ताँ अ॑धमो॒ रोद॑स्योः ॥ १ ०३३ ०५
अयु॑युत्सन्न् अनव॒द्यस्य॒ सेना॒म् अया॑तयन्त क्षि॒तयो॒ नव॑ग्वाः ।
वृ॒षा॒युधो॒ न वध्र॑यो॒ निर॑ष्टाः प्र॒वद्भि॒र् इन्द्रा॑च् चि॒तय॑न्त आयन् ॥ १ ०३३ ०६
त्वम् ए॒तान् रु॑द॒तो जक्ष॑त॒श् चायो॑धयो॒ रज॑स इन्द्र पा॒रे ।
अवा॑दहो दि॒व आ दस्यु॑म् उ॒च्चा प्र सु॑न्व॒त स्तु॑व॒तः शंस॑म् आवः ॥ १ ०३३ ०७
च॒क्रा॒णासः॑ परी॒णह॑म् पृथि॒व्या हिर॑ण्येन म॒णिना॒ शुम्भ॑मानाः ।
न हि॑न्वा॒नास॑स् तितिरु॒स् त इन्द्र॒म् परि॒ स्पशो॑ अदधा॒त् सूर्ये॑ण ॥ १ ०३३ ०८
परि॒ यद् इ॑न्द्र॒ रोद॑सी उ॒भे अबु॑भोजीर् महि॒ना वि॒श्वतः॑ सीम् ।
अम॑न्यमानाँ अभि मन्य॑मानै॒र् निर् ब्र॒ह्मभि॑र् अधमो॒ दस्यु॑म् इन्द्र ॥ १ ०३३ ०९
न ये दि॒वः पृ॑थि॒व्या अन्त॑म् आ॒पुर् न मा॒याभि॑र् धन॒दाम् प॒र्यभू॑वन् ।
यु॒जं वज्रं॑ वृष॒भश् च॑क्र॒ इन्द्रो॒ निर् ज्योति॑षा॒ तम॑सो॒ गा अ॑दु॒क्षत् ॥ १ ०३३ १०
अनु॑ स्व॒धाम् अ॑क्षर॒न्न् आपो॑ अ॒स्यावर्ध॑त॒ मध्य॒ आ ना॒व्याना॑म् ।
स॒ध्री॒चीने॑न॒ मन॑सा॒ तम् इन्द्र॒ ओजि॑ष्ठेन॒ हन्म॑नाहन्न् अ॒भि द्यून् ॥ १ ०३३ ११
न्य् आविध्यद् इली॒बिश॑स्य दृ॒ळ्हा वि शृ॒ङ्गिण॑म् अभिन॒च् छुष्ण॒म् इन्द्रः॑ ।
याव॒त् तरो॑ मघव॒न् याव॒द् ओजो॒ वज्रे॑ण॒ शत्रु॑म् अवधीः पृत॒न्युम् ॥ १ ०३३ १२
अ॒भि सिध्मो॑ अजिगाद् अस्य॒ शत्रू॒न् वि ति॒ग्मेन॑ वृष॒भेणा॒ पुरो॑ ऽभेत् ।
सं वज्रे॑णासृजद् वृ॒त्रम् इन्द्रः॒ प्र स्वाम् म॒तिम् अ॑तिर॒च् छाश॑दानः ॥ १ ०३३ १३
आवः॒ कुत्स॑म् इन्द्र॒ यस्मि॑ञ् चा॒कन् प्रावो॒ युध्य॑न्तं वृष॒भं दश॑द्युम् ।
श॒फच्यु॑तो रे॒णुर् न॑क्षत॒ द्याम् उच् छ्वै॑त्रे॒यो नृ॒षाह्या॑य तस्थौ ॥ १ ०३३ १४
आवः॒ शमं॑ वृष॒भं तुग्र्या॑सु क्षेत्रजे॒षे म॑घव॒ञ् छ्वि॒त्र्यं॑ गाम् ।
ज्योक् चि॒द् अत्र॑ तस्थि॒वांसो॑ अक्रञ् छत्रू॒यताम् अध॑रा॒ वेद॑नाकः ॥ १ ०३३ १५

त्रिश् चि॑न् नो अ॒द्या भ॑वतं नवेदसा वि॒भुर् वां॑ याम॑ उ॒त रा॒तिर् अ॑श्विना ।
यु॒वोर् हि य॒न्त्रं हि॒म्येव॒ वास॑सो ऽभ्याय॒ंसेन्या॑ भवतम् मनी॒षिभिः॑ ॥ १ ०३४ ०१
त्रयः॑ प॒वयो॑ मधु॒वाह॑ने॒ रथे॒ सोम॑स्य वे॒नाम् अनु॒ विश्व॒ इद् वि॑दुः ।
त्रय॑ स्क॒म्भास॑ स्कभि॒तास॑ आ॒रभे॒ त्रिर् नक्तं॑ या॒थस् त्रिर् व् अ॑श्विना॒ दिवा॑ ॥ १ ०३४ ०२

समाने अहन् त्रिर् अवद्यगोहना त्रिर् अद्य यज्ञम् मधुना मिमिक्षतम् ।
त्रिर् वाजवतीर् इषो अश्विना युवं दोषा अस्मभ्यम् उषसश् च पिन्वतम् ॥ १ ०३४ ०३
त्रिर् वर्तिर् यातं त्रिर् अनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् ।
त्रिर् नान्द्यं वहतम् अश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥ १ ०३४ ०४
त्रिर् नो रयिं वहतम् अश्विना युवं त्रिर् देवताता त्रिर् उतावतं धियः ।
त्रिः सौभगत्वं त्रिर् उत श्रवांसि नस् त्रिष्ठं वां सूरे दुहिता रुहद् रथम् ॥ १ ०३४ ०५
त्रिर् नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिर् उ दत्तम् अद्भ्यः ।
ओमानं शंयोर् ममकाय सूनवे त्रिधातु शर्म वहतं शुभस् पती ॥ १ ०३४ ०६
त्रिर् नो अश्विना यजता दिवे-दिवे परि त्रिधातु पृथिवीम् अशायतम् ।
तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ॥ १ ०३४ ०७
त्रिर् अश्विना सिन्धुभिः सप्तमातृभिस् त्रय आहावास् त्रेधा हविष् कृतम् ।
तिस्रः पृथिवीर् उपरि प्रवा दिवो नाकं रक्षेथे द्युभिर् अक्तुभिर् हितम् ॥ १ ०३४ ०८
क्व१ त्री चक्रा त्रिवृतो रथस्य क्व१ त्रयो वन्धुरो ये सनीळाः ।
कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ॥ १ ०३४ ०९
आ नासत्या गच्छतं हूयते हविर् मध्वः पिबतम् मधुपेभिर् आसभिः ।
युवोर् हि पूर्वं सवितोषसो रथम् ऋताय चित्रं घृतवन्तम् इष्यति ॥ १ ०३४ १०
आ नासत्या त्रिभिर् एकादशैर् इह देवेभिर् यातम् मधुपेयम् अश्विना ।
प्रायुस् तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ १ ०३४ ११
आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम् ।
शृण्वन्ता वाम् अवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥ १ ०३४ १२

ह्वयाम्य् अग्निम् प्रथमं स्वस्तये ह्वयामि मित्रावरुणाव् इहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारम् ऊतये ॥ १ ०३५ ०१
आ कृष्णेन रजसा वर्तमानो निवेशयन्न् अमृतम् मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ १ ०३५ ०२
याति देवः प्रवता यात्य् उद्वता याति शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो याति सविता परावतो ऽप विश्वा दुरिता बाधमानः ॥ १ ०३५ ०३

अ॒भीवृ॑तं॒ कृश॑नैर् वि॒श्वरू॑पं॒ हिर॑ण्यशम्यं यज॒तो बृ॒हन्त॑म् ।
आस्था॒द् रथं॑ सवि॒ता चि॒त्रभा॑नुः कृ॒ष्णा रजां॑सि॒ तवि॑षीं॒ दधा॑नः ॥ १ ०३५ ०४
वि जना॑ञ् छ्या॒वाः शि॑ति॒पादो॑ अख्य॒न् रथं॒ हिर॑ण्यप्रऽउगं॒ वह॑न्तः ।
शश्व॒द् विशः॑ सवि॒तुर् दैव्य॑स्यो॒पस्थे॒ विश्वा॒ भुव॑नानि तस्थुः ॥ १ ०३५ ०५
ति॒स्रो द्यावः॑ सवि॒तुर् द्वा उ॒पस्थाँ॒ एका॑ य॒मस्य॒ भुव॑ने विरा॒षाट् ।
आ॒णिं न रथ्य॑म् अ॒मृताधि॑ तस्थुर् इ॒ह ब्र॑वीतु॒ य उ॒ तच् चिके॑तत् ॥ १ ०३५ ०६
वि सु॑प॒र्णो अ॒न्तरि॑क्षाण्य् अख्यद् गभी॒रवे॑पा॒ असु॑रः सुनी॒थः ।
क्वे॒३॒॑ दानीं॒ सूर्यः॒ कश् चि॑केत कत॒मां द्यां र॒श्मिर् अ॒स्या त॑तान ॥ १ ०३५ ०७
अ॒ष्टौ व्य् अ॑ख्यत् क॒कुभः॑ पृथि॒व्यास् त्री धन्व॒ योज॑ना स॒प्त सिन्धू॑न् ।
हि॒र॒ण्या॒क्षः स॑वि॒ता दे॒व आगा॒द् दध॒द् रत्ना॑ दा॒शुषे॒ वार्या॑णि ॥ १ ०३५ ०८
हिर॑ण्यपाणिः सवि॒ता विच॑र्षणिर् उ॒भे द्यावा॑पृथि॒वी अ॒न्तर् ई॑यते ।
अपामी॑वा॒म् बाध॑ते॒ वेति॒ सूर्य॑म् अ॒भि कृ॒ष्णेन॒ रज॑सा॒ द्याम् ऋ॑णोति ॥ १ ०३५ ०९
हिर॑ण्यहस्तो॒ असु॑रः सुनी॒थः सु॑मृळी॒कः स्ववाँ॑ यात्व् अ॒र्वाङ् ।
अ॒प॒सेध॑न् र॒क्षसो॑ यातु॒धाना॒न् अस्था॑द् दे॒वः प्र॑तिदो॒षं गृ॑णा॒नः ॥ १ ०३५ १०
ये ते॒ पन्थाः॑ सवितः पू॒र्व्यासो॑ ऽरे॒णवः॒ सुकृ॑ता अ॒न्तरि॑क्षे ।
तेभि॑र् नो अ॒द्य प॒थिभिः॑ सु॒गेभी॒ रक्षा॑ च नो॒ अधि॑ च ब्रूहि देव ॥ १ ०३५ ११

प्र वो॑ य॒ह्वम् पु॑रू॒णां वि॒शां दे॑वय॒तीना॑म् ।
अ॒ग्निं सू॒क्तेभि॒र् वचो॑भिर् ईमहे॒ । यं सी॒म् इद् अ॒न्य ईळ॑ते ॥ १ ०३६ ०१
जना॑सो अ॒ग्निं द॑धिरे सहो॒वृधं॑ । ह॒विष्म॑न्तो विधेम ते ।
स त्वं नो॑ अ॒द्य सु॒मना॑ इ॒हावि॒ता । भवा॒ वाजे॑षु सन्त्य ॥ १ ०३६ ०२
प्र त्वा॑ दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम् ।
म॒हस् ते॑ स॒तो वि च॑रन्त्य् अ॒र्चयो॑ । दि॒वि स्पृ॑शन्ति भा॒नवः॑ ॥ १ ०३६ ०३
दे॒वास॑स् त्वा॒ वरु॑णो मि॒त्रो अ॑र्य॒मा । सं दू॒तम् प्र॒त्नम् इ॑न्धते ।
विश्वं॒ सो अ॑ग्ने जयति॒ त्वया॒ धनं॒ । यस् ते॑ द॒दाश॒ मर्त्यः॑ ॥ १ ०३६ ०४
म॒न्द्रो होता॑ गृ॒हप॑ति॒र् अग्ने॑ दू॒तो वि॒शाम् अ॑सि ।
त्वे विश्वा॒ संग॑तानि व्र॒ता ध्रु॒वा । यानि॑ दे॒वा अकृ॑ण्वत ॥ १ ०३६ ०५

त्वे इद् अ॑ग्ने सु॒भगे॑ यविष्ठ्य॒ । विश्व॒म् आ हू॑यते ह॒विः ।
स त्वं नो॑ अ॒द्य सु॒मना॑ उ॒ताप॒रं । यक्षि॑ दे॒वान् सु॒वीर्या॑ ॥ १ ०३६ ०६
तं घे॑म् इ॒त्था न॑म॒स्विन॒ उप॑ स्व॒राज॑म् आसते ।
होत्रा॑भिर् अ॒ग्निम् मनु॒षः सम् इ॑न्धते । तिति॒र्वांसो॒ अति॒ स्रिधः॑ ॥ १ ०३६ ०७
घ्नन्तो॑ वृ॒त्रम् अ॑तर॒न् रोद॑सी अ॒प । उ॒रु क्षया॑य चक्रिरे ।
भु॒वत् कण्वे॒ वृषा॑ द्यु॒म्न्य् आहु॑तः॒ । क्रन्द॒द् अश्वो॒ गवि॑ष्टिषु ॥ १ ०३६ ०८
सं सी॑दस्व म॒हाँ अ॑सि॒ शोच॑स्व देव॒वीत॑मः ।
वि धू॒मम् अ॑ग्ने अरु॒षम् मि॑येध्य सृ॒ज प्र॑शस्त दर्श॒तम् ॥ १ ०३६ ०९
यं त्वा॑ दे॒वासो॒ मन॑वे द॒धुर् इ॒ह । यजि॑ष्ठं हव्यवाहन ।
यं कण्वो॒ मेध्या॑तिथिर् धन॒स्पृतं॒ । यं वृषा॒ यम् उ॑पस्तु॒तः ॥ १ ०३६ १०
यम् अ॒ग्निम् मेध्या॑तिथिः॒ कण्व॑ ई॒ध ऋ॒ताद् अधि॑ ।
तस्य॒ प्रेषो॑ दीदियु॒स् तम् इ॒मा ऋ॒चस् । तम् अ॒ग्निं व॑र्धयामसि ॥ १ ०३६ ११
रा॒यस् पू॑र्धि स्वधा॒वो ऽस्ति॑ हि । ते ऽग्ने॑ दे॒वेष्व् आप्य॑म् ।
त्वं वाज॑स्य॒ श्रुत्य॑स्य राजसि॒ । स नो॑ मृळ म॒हाँ अ॑सि ॥ १ ०३६ १२
ऊ॒र्ध्व ऊ॒ षु ण॑ ऊ॒तये॒ तिष्ठा॑ दे॒वो न स॑वि॒ता ।
ऊ॒र्ध्वो वाज॑स्य॒ सनि॑ता॒ यद् अ॒ञ्जिभि॑र् । वा॒घद्भि॑र् वि॒ह्वया॑महे ॥ १ ०३६ १३
ऊ॒र्ध्वो नः॑ पा॒ह्य अंह॑सो॒ नि के॒तुना॑ । विश्वं॒ सम् अ॒त्रिणं॑ दह ।
कृ॒धी न॑ ऊ॒र्ध्वाञ् च॒रथा॑य जी॒वसे॑ । वि॒दा दे॒वेषु॑ नो॒ दुवः॑ ॥ १ ०३६ १४
पा॒हि नो॑ अग्ने र॒क्षसः॑ पा॒हि धू॒र्तेर् अरा॑व्णः ।
पा॒हि रीष॑त उ॒त वा॒ जिघां॑सतो॒ । बृह॑द्भानो॒ यवि॑ष्ठ्य ॥ १ ०३६ १५
घ॒नेव॒ विष्व॒ग् वि ज॒ह्य् अरा॑व्णस् । तपु॑र्जम्भ॒ यो अ॑स्म॒ध्रुक् ।
यो मर्त्यः॒ शिशी॑ते॒ अत्य् अ॒क्तुभि॑र् । मा नः॒ स रि॒पुर् ई॑शत ॥ १ ०३६ १६
अ॒ग्निर् व॑व्ने सु॒वीर्य॑म् अ॒ग्निः कण्वा॑य॒ सौभ॑गम् ।
अ॒ग्निः प्राव॑न् मि॒त्रोत मेध्या॑तिथिम् । अ॒ग्निः सा॒ता उ॑पस्तु॒तम् ॥ १ ०३६ १७
अ॒ग्निना॑ तु॒र्वशं॒ यदु॑म् परा॒वत॑ । उ॒ग्रादे॑वं हवामहे ।
अ॒ग्निर् न॑यन् नव॑वास्त्वम् बृ॒हद्र॑थं । तु॒र्वीतिं॒ दस्य॑वे॒ सहः॑ ॥ १ ०३६ १८
नि त्वाम् अ॑ग्ने॒ मनु॑र् दधे॒ ज्योति॒र् जना॑य॒ शश्व॑ते ।
दी॒दे॒थ कण्व॑ ऋ॒तजा॑त उ॒क्षितो॒ । यं न॑म॒स्यन्ति॑ कृ॒ष्टयः॑ ॥ १ ०३६ १९

त्वेषासो अग्नेर् अमवन्तो अर्चयो । भीमासो न प्रतीतये ।
रक्षस्विनः सदम् इद् यातुमावतो विश्वं सम् अत्रिणं दह ॥ १ ०३६ २०

क्रीळं वः शर्धो मारुतम् अनर्वाणं रथेशुभम् ।
कण्वा अभि प्र गायत ॥ १ ०३७ ०१
ये पृषतीभिर् ऋष्टिभिः साकं वाशीभिर् अञ्जिभिः ।
अजायन्त स्वभानवः ॥ १ ०३७ ०२
इहेव शृण्व एषां कशा हस्तेषु यद् वदान् ।
नि यामञ् चित्रम् ऋञ्जते ॥ १ ०३७ ०३
प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे ।
देवत्तम् ब्रह्म गायत ॥ १ ०३७ ०४
प्र शंसा गोष्व् अघ्न्यं क्रीळं यच् छर्धो मारुतम् ।
जम्भे रसस्य वावृधे ॥ १ ०३७ ०५
को वो वर्षिष्ठ आ नरो दिवश् च ग्मश् च धूतयः ।
यत् सीम् अन्तं न धूनुथ ॥ १ ०३७ ०६
नि वो यामाय मानुषो दध्र उग्राय मन्यवे ।
जिहीत पर्वतो गिरिः ॥ १ ०३७ ०७
येषाम् अज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः ।
भिया यामेषु रेजते ॥ १ ०३७ ०८
स्थिरं हि जानम् एषां वयो मातुर् निरेतवे ।
यत् सीम् अनु द्विता शवः ॥ १ ०३७ ०९
उद् उ त्ये सूनवो गिरः काष्ठा अज्मेष्व् अत्नत ।
वाश्रा अभिज्ञु यातवे ॥ १ ०३७ १०
त्यं चिद् घा दीर्घम् पृथुम् मिहो नपातम् अमृध्रम् ।
प्र च्यावयन्ति यामभिः ॥ १ ०३७ ११
मरुतो यद् ध वो बलं जनाँ अचुच्यवीतन ।
गिरीँर् अचुच्यवीतन ॥ १ ०३७ १२

यद् ध यान्ति मरुतः सं ह ब्रुवते ऽध्वन्न् आ ।
शृणोति कश् चिद् एषाम् ॥ १ ०३७ १३
प्र यात शीभम् आशुभिः सन्ति कण्वेषु वो दुवः ।
तत्रो षु मादयाध्वै ॥ १ ०३७ १४
अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयम् एषाम् ।
विश्वं चिद् आयुर् जीवसे ॥ १ ०३७ १५

कद् ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः ।
दधिध्वे वृक्तबर्हिषः ॥ १ ०३८ ०१
क्व नूनं कद् वो अर्थं गन्ता दिवो न पृथिव्याः ।
क्व वो गावो न रण्यन्ति ॥ १ ०३८ ०२
क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता ।
क्वो विश्वानि सौभगा ॥ १ ०३८ ०३
यद् यूयम् पृश्निमातरो मर्तासः स्यातन ।
स्तोता वो अमृतः स्यात् ॥ १ ०३८ ०४
मा वो मृगो न यवसे जरिता भूद् अजोष्यः ।
पथा यमस्य गाद् उप ॥ १ ०३८ ०५
मो षु णः परा-परा निरृतिर् दुर्हणा वधीत् ।
पदीष्ट तृष्णया सह ॥ १ ०३८ ०६
सत्यं त्वेषा अमवन्तो धन्वञ् चिद् आ रुद्रियासः ।
मिहं कृण्वन्त्य् अवाताम् ॥ १ ०३८ ०७
वाश्रेव विद्युन् मिमाति वत्सं न माता सिषक्ति ।
यद् एषां वृष्टिर् असर्जि ॥ १ ०३८ ०८
दिवा चित् तमः कृण्वन्ति पर्जन्येनोदवाहेन ।
यत् पृथिवीं व्युन्दन्ति ॥ १ ०३८ ०९
अध स्वनान् मरुतां विश्वम् आ सद्म पार्थिवम् ।
अरेजन्त प्र मानुषाः ॥ १ ०३८ १०

मरु॑तो वीळुपा॒णिभि॑श् चि॒त्रा रोध॑स्वती॒र् अनु॑ ।
या॒तेम् अखि॑द्रयामभिः ॥ १ ०३८ ११
स्थि॒रा वः॑ सन्तु ने॒मयो॒ रथा॒ अश्वा॑स एषाम् ।
सुसं॑स्कृता अ॒भीश॑वः ॥ १ ०३८ १२
अच्छा॑ वदा॒ तना॑ गि॒रा ज॒रायै॒ ब्रह्म॑ण॒स् पति॑म् ।
अ॒ग्निम् मि॒त्रं न द॑र्श॒तम् ॥ १ ०३८ १३
मि॒मी॒हि श्लोक॑म् आ॒स्ये प॒र्जन्य॑ इव ततनः ।
गाय॑ गाय॒त्रम् उ॒क्थ्यम् ॥ १ ०३८ १४
वन्द॑स्व॒ मारु॑तं ग॒णं त्वे॒षम् प॑न॒स्युम् अ॒र्किण॑म् ।
अ॒स्मे वृ॒द्धा अ॑सन्न् इ॒ह ॥ १ ०३८ १५

प्र यद् इ॒त्था प॑रा॒वतः॑ शो॒चिर् न मान॒म् अस्य॑थ ।
कस्य॒ क्रत्वा॑ मरुतः॒ कस्य॒ वर्प॑सा॒ कं या॑थ॒ कं ह॑ धूतयः ॥ १ ०३९ ०१
स्थि॒रा वः॑ स॒न्त्व् आयु॑धा परा॒णुदे॑ वी॒ळू उ॒त प्र॑ति॒ष्कभे॑ ।
यु॒ष्माक॑म् अस्तु॒ तवि॑षी॒ पनी॑यसी॒ मा मर्त्य॑स्य मा॒यिनः॑ ॥ १ ०३९ ०२
परा॑ ह॒ यत् स्थि॒रं ह॒थ नरो॑ व॒र्तय॑था गु॒रु ।
वि या॑थन व॒निनः॑ पृथि॒व्या व्य् आशाः॒ पर्व॑तानाम् ॥ १ ०३९ ०३
न॒हि वः॒ शत्रु॑र् विवि॒दे अधि॒ द्यवि॒ न भूम्यां॑ रिशादसः ।
यु॒ष्माक॑म् अस्तु॒ तवि॑षी॒ तना॑ यु॒जा रुद्रा॑सो॒ नू चि॑द् आ॒धृषे॑ ॥ १ ०३९ ०४
प्र वे॑पयन्ति॒ पर्व॑तान् वि वि॑ञ्चन्ति॒ वन॒स्पती॑न् ।
प्रो आ॑रत मरुतो दु॒र्मदा॑ इव॒ देवा॑सः॒ सर्व॑या वि॒शा ॥ १ ०३९ ०५
उपो॒ रथे॑षु॒ पृष॑तीर् अयुग्ध्वम् प्रष्टि॑र् वहति॒ रोहि॑तः ।
आ वो॒ यामा॑य पृथि॒वी चि॑द् अश्रो॒द् अबी॑भयन्त॒ मानु॑षाः ॥ १ ०३९ ०६
आ वो॑ म॒क्षू तना॑य॒ कं रुद्रा॒ अवो॑ वृणीमहे ।
गन्ता॑ नू॒नं नो ऽव॑सा॒ यथा॑ पु॒रेत्था कण्वा॑य बि॒भ्युषे॑ ॥ १ ०३९ ०७
यु॒ष्मेषि॑तो मरुतो॒ मर्त्ये॑षित॒ आ यो नो॒ अभ्व॒ ईष॑ते ।
वि तं यु॑योत॒ शव॑सा॒ व्य् ओज॑सा॒ वि यु॒ष्माका॑भिर् ऊ॒तिभिः॑ ॥ १ ०३९ ०८

असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर् मरुत आ न ऊतिभिर् गन्ता वृष्टिं न विद्युतः ॥ १ ०३९ ०९
असाम्य् ओजो बिभृथा सुदानवो ऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम् ॥ १ ०३९ १०

उत् तिष्ठ ब्रह्मणस् पते देवयन्तस् त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर् भवा सचा ॥ १ ०४० ०१
त्वाम् इद् धि सहसस् पुत्र मर्त्य उपब्रूते धने हिते ।
सुवीर्यम् मरुत आ स्वश्व्यं दधीत यो व आचके ॥ १ ०४० ०२
प्रैतु ब्रह्मणस् पतिः प्र देव्य् एतु सूनृता ।
अच्छा वीरं नर्यम् पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ १ ०४० ०३
यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।
तस्मा इळां सुवीराम् आ यजामहे सुप्रतूर्तिम् अनेहसम् ॥ १ ०४० ०४
प्र नूनम् ब्रह्मणस् पतिर् मन्त्रं वदत्य् उक्थ्यम् ।
यस्मिन्न् इन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥ १ ०४० ०५
तम् इद् वोचेमा विदथेषु शम्भुवम् मन्त्रं देवा अनेहसम् ।
इमां च वाचम् प्रतिहर्यथा नरो विश्वेद् वामा वो अश्नवत् ॥ १ ०४० ०६
को देवयन्तम् अश्नवज् जनं को वृक्तबर्हिषम् ।
प्र-प्र दाश्वान् पस्त्याभिर् अस्थितान्तर्वावत् क्षयं दधे ॥ १ ०४० ०७
उप क्षत्रम् पृञ्चीत हन्ति राजभिर् भये चित् सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥ १ ०४० ०८

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
नू चित् स दभ्यते जनः ॥ १ ०४१ ०१
यम् बाहुतेव पिप्रति पान्ति मर्त्यं रिषः ।
अरिष्टः सर्व एधते ॥ १ ०४१ ०२

वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम् ।
नयन्ति दुरिता तिरः ॥ १ ०४१ ०३
सुगः पन्था अनृक्षर आदित्यास ऋतं यते ।
नात्रावखादो अस्ति वः ॥ १ ०४१ ०४
यं यज्ञं नयथा नर आदित्या ऋजुना पथा ।
प्र वः स धीतये नशत् ॥ १ ०४१ ०५
स रत्नम् मर्त्यो वसु विश्वं तोकम् उत त्मना ।
अच्छा गच्छत्य् अस्तृतः ॥ १ ०४१ ०६
कथा राधाम सखाय स्तोमम् मित्रस्यार्यम्णः ।
महि प्सरो वरुणस्य ॥ १ ०४१ ०७
मा वो घ्नन्तम् मा शपन्तम् प्रति वोचे देवयन्तम् ।
सुम्नैर् इद् व आ विवासे ॥ १ ०४१ ०८
चतुरश् चिद् ददमानाद् बिभीयाद् आ निधातोः ।
न दुरुक्ताय स्पृहयेत् ॥ १ ०४१ ०९

सम् पूषन्न् अध्वनस् तिर व्य् अंहो विमुचो नपात् ।
सक्ष्वा देव प्र णस् पुरः ॥ १ ०४२ ०१
यो नः पूषन्न् अघो वृको दुःशेव आदिदेशति ।
अप स्म तम् पथो जहि ॥ १ ०४२ ०२
अप त्यम् परिपन्थिनम् मुषीवाणं हुरश्चितम् ।
दूरम् अधि स्रुतेर् अज ॥ १ ०४२ ०३
त्वं तस्य द्वयाविनो ऽघशंसस्य कस्य चित् ।
पदाभि तिष्ठ तपुषिम् ॥ १ ०४२ ०४
आ तत् ते दस्र मन्तुमः पूषन्न् अवो वृणीमहे ।
येन पितॄन् अचोदयः ॥ १ ०४२ ०५
अधा नो विश्वसौभग हिरण्यवाशीमत्तम ।
धनानि सुषणा कृधि ॥ १ ०४२ ०६

अति॑ नः स॒श्चतो॑ नय सु॒गा नः॑ सु॒पथा॑ कृणु ।
पूष॑न्न् इ॒ह क्रतुं॑ विदः ॥ १ ०४२ ०७
अ॒भि सू॒यव॑सं नय॒ न न॑वज्वा॒रो अध्व॑ने ।
पूष॑न्न् इ॒ह क्रतुं॑ विदः ॥ १ ०४२ ०८
श॒ग्धि पू॒र्धि प्र यं॑सि च शिशी॒हि प्रास्य् उ॒दर॑म् ।
पूष॑न्न् इ॒ह क्रतुं॑ विदः ॥ १ ०४२ ०९
न पू॒षण॑म् मेथामसि सू॒क्तैर् अ॒भि गृ॑णीमसि ।
वसू॑नि द॒स्मम् ई॑महे ॥ १ ०४२ १०

कद् रु॒द्राय॒ प्रचे॑तसे मी॒ळ्हुष्ट॑माय॒ तव्य॑से ।
वो॒चेम॒ शंत॑मं हृ॒दे ॥ १ ०४३ ०१
यथा॑ नो॒ अदि॑तिः क॒रत् पश्वे॒ नृभ्यो॒ यथा॒ गवे॑ ।
यथा॑ तो॒काय॑ रु॒द्रिय॑म् ॥ १ ०४३ ०२
यथा॑ नो मि॒त्रो वरु॑णो॒ यथा॑ रु॒द्रश् चिके॑तति ।
यथा॒ विश्वे॑ स॒जोष॑सः ॥ १ ०४३ ०३
गा॒थप॑तिम् मे॒धप॑तिं रु॒द्रं जला॑षभेषजम् ।
तच् छं॒योः सु॒म्नम् ई॑महे ॥ १ ०४३ ०४
यः शु॒क्र इ॑व॒ सूर्यो॒ हिर॑ण्यम् इव॒ रोच॑ते ।
श्रेष्ठो॑ दे॒वानां॒ वसुः॑ ॥ १ ०४३ ०५
शं नः॑ क॒रत्य् अर्व॑ते सु॒गम् मे॒षाय॑ मे॒ष्ये ।
नृभ्यो॒ नारि॑भ्यो॒ गवे॑ ॥ १ ०४३ ०६
अ॒स्मे सो॑म॒ श्रिय॒म् अधि॒ नि धे॑हि श॒तस्य॑ नृ॒णाम् ।
महि॒ श्रव॑स् तुविनृ॒म्णम् ॥ १ ०४३ ०७
मा नः॑ सोमपरि॒बाधो॒ मारा॑तयो जुहु॒रन्त ।
आ न॑ इन्दो॒ वाजे॑ भज ॥ १ ०४३ ०८
यास् ते॑ प्र॒जा अ॒मृत॑स्य॒ पर॑स्मिन् धाम॑न्न् ऋ॒तस्य॑ ।
मू॒र्धा नाभा॑ सोम वेन आ॒भूष॑न्तीः सोम वेदः ॥ १ ०४३ ०९

अग्ने विवस्वद् उषसश् चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वम् अद्या देवाँ उषर्बुधः ॥ १ ०४४ ०१
जुष्टो हि दूतो असि हव्यवाहनो ऽग्ने रथीर् अध्वराणाम् ।
सजूर् अश्विभ्याम् उषसा सुवीर्यम् अस्मे धेहि श्रवो बृहत् ॥ १ ०४४ ०२
अद्या दूतं वृणीमहे वसुम् अग्निम् पुरुप्रियम् ।
धूमकेतुम् भाऋजीकं व्युष्टिषु यज्ञानाम् अध्वरश्रियम् ॥ १ ०४४ ०३
श्रेष्ठं यविष्ठम् अतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।
देवाँ अच्छा यातवे जातवेदसम् अग्निम् ईळे व्युष्टिषु ॥ १ ०४४ ०४
स्तविष्यामि त्वाम् अहं विश्वस्यामृत भोजन ।
अग्ने त्रातारम् अमृतम् मियेध्य यजिष्ठं हव्यवाहन ॥ १ ०४४ ०५
सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ।
प्रस्कण्वस्य प्रतिरन्न् आयुर् जीवसे नमस्या दैव्यं जनम् ॥ १ ०४४ ०६
होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।
स आ वह पुरुहूत प्रचेतसो ऽग्ने देवाँ इह द्रवत् ॥ १ ०४४ ०७
सवितारम् उषसम् अश्विना भगम् अग्निं व्युष्टिषु क्षपः ।
कण्वासस् त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥ १ ०४४ ०८
पतिर् ह्य् अध्वराणाम् अग्ने दूतो विशाम् असि ।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ॥ १ ०४४ ०९
अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ।
असि ग्रामेष्व् अविता पुरोहितो ऽसि यज्ञेषु मानुषः ॥ १ ०४४ १०
नि त्वा यज्ञस्य साधनम् अग्ने होतारम् ऋत्विजम् ।
मनुष्वद् देव धीमहि प्रचेतसं जीरं दूतम् अमर्त्यम् ॥ १ ०४४ ११
यद् देवानाम् मित्रमहः पुरोहितो ऽन्तरो यासि दूत्यम् ।
सिन्धोर् इव प्रस्वनितास ऊर्मयो ऽग्नेर् भ्राजन्ते अर्चयः ॥ १ ०४४ १२
श्रुधि श्रुत्कर्ण वह्निभिर् देवैर् अग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥ १ ०४४ १३

शृण्वन्तु स्तोमम् मरुतः सुदानवो ऽग्निजिह्वा ऋतावृधः ।
पिबतु सोमं वरुणो धृतव्रतो ऽश्विभ्याम् उषसा सजूः ॥ १ ०४४ १४

त्वम् अग्ने वसूँर् इह रुद्राँ आदित्याँ उत ।
यजा स्वध्वरं जनम् मनुजातं घृतप्रुषम् ॥ १ ०४५ ०१
श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।
तान् रोहिदश्व गिर्वणस् त्रयस्त्रिंशतम् आ वह ॥ १ ०४५ ०२
प्रियमेधवद् अत्रिवज् जातवेदो विरूपवत् ।
अङ्गिरस्वन् महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥ १ ०४५ ०३
महिकेरव ऊतये प्रियमेधा अहूषत ।
राजन्तम् अध्वराणाम् अग्निं शुक्रेण शोचिषा ॥ १ ०४५ ०४
घृताहवन सन्त्येमा उ षु श्रुधी गिरः ।
याभिः कण्वस्य सूनवो हवन्ते ऽवसे त्वा ॥ १ ०४५ ०५
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।
शोचिष्केशम् पुरुप्रियाग्ने हव्याय वोळ्हवे ॥ १ ०४५ ०६
नि त्वा होतारम् ऋत्विजं दधिरे वसुवित्तमम् ।
श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥ १ ०४५ ०७
आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः ।
बृहद् भा बिभ्रतो हविर् अग्ने मर्ताय दाशुषे ॥ १ ०४५ ०८
प्रातर्याव्णः सहस्कृत सोमपेयाय सन्त्य ।
इहाद्य दैव्यं जनम् बर्हिर् आ सादया वसो ॥ १ ०४५ ०९
अर्वाञ्चं दैव्यं जनम् अग्ने यक्ष्व सहूतिभिः ।
अयं सोमः सुदानवस् तम् पात तिरोअह्न्यम् ॥ १ ०४५ १०

एषो उषा अपूर्व्या व्य् उच्छति प्रिया दिवः ।
स्तुषे वाम् अश्विना बृहत् ॥ १ ०४६ ०१

या दस्रा सिन्धुमातरा मनोतरा रयीणाम् ।
धिया देवा वसुविदा ॥ १ ०४६ ०२
वच्यन्ते वां ककुहासो जूर्णायाम् अधि विष्टपि ।
यद् वां रथो विभिष् पतात् ॥ १ ०४६ ०३
हविषा जारो अपाम् पिपर्ति पपुरिर् नरा ।
पिता कुटस्य चर्षणिः ॥ १ ०४६ ०४
आदारो वाम् मतीनां नासत्या मतवचसा ।
पातं सोमस्य धृष्णुया ॥ १ ०४६ ०५
या नः पीपरद् अश्विना ज्योतिष्मती तमस् तिरः ।
ताम् अस्मे रासाथाम् इषम् ॥ १ ०४६ ०६
आ नो नावा मतीनां यातम् पाराय गन्तवे ।
युञ्जाथाम् अश्विना रथम् ॥ १ ०४६ ०७
अरित्रं वां दिवस् पृथु तीर्थे सिन्धूनां रथः ।
धिया युयुज्र इन्दवः ॥ १ ०४६ ०८
दिवस् कण्वास इन्दवो वसु सिन्धूनाम् पदे ।
स्वं वव्रिं कुह धित्सथः ॥ १ ०४६ ०९
अभूद् उ भा उ अंशवे हिरण्यम् प्रति सूर्यः ।
व्य् अख्यज् जिह्वयासितः ॥ १ ०४६ १०
अभूद् उ पारम् एतवे पन्था ऋतस्य साधुया ।
अदर्शि वि स्रुतिर् दिवः ॥ १ ०४६ ११
तत्-तद् इद् अश्विनोर् अवो जरिता प्रति भूषति ।
मदे सोमस्य पिप्रतोः ॥ १ ०४६ १२
वावसाना विवस्वति सोमस्य पीत्या गिरा ।
मनुष्वच् छम्भू आ गतम् ॥ १ ०४६ १३
युवोर् उषा अनु श्रियम् परिज्मनोर् उपाचरत् ।
ऋता वनथो अक्तुभिः ॥ १ ०४६ १४
उभा पिबतम् अश्विनोभा नः शर्म यच्छतम् ।
अविद्रियाभिर् ऊतिभिः ॥ १ ०४६ १५

अ॒यं वा॒म् मधु॑मत्तमः सु॒तः सोम॑ ऋतावृधा ।
तम् अ॑श्विना पिबतं ति॒रोअ॑ह्न्यं ध॒त्तं रत्ना॑नि दा॒शुषे॑ ॥ १ ०४७ ०१
त्रि॒व॒न्धु॒रेण॑ त्रि॒वृता॑ सु॒पेश॑सा॒ रथे॒ना या॑तम् अश्विना ।
कण्वा॑सो वा॒म् ब्रह्म॑ कृण्वन्त्य् अध्व॒रे तेषां॒ सु शृ॑णु॒तं हव॑म् ॥ १ ०४७ ०२
अश्वि॑ना मधु॑मत्तमम् पा॒तं सोम॑म् ऋतावृधा ।
अथा॒द्य द॑स्रा॒ वसु॒ बिभ्र॑ता॒ रथे॑ दा॒श्वांस॒म् उप॑ गच्छतम् ॥ १ ०४७ ०३
त्रि॒ष॒ध॒स्थे ब॒र्हिषि॑ विश्ववेदसा॒ मध्वा॑ य॒ज्ञम् मि॑मिक्षतम् ।
कण्वा॑सो वां सु॒तसो॑मा अ॒भिद्य॑वो यु॒वां ह॑वन्ते अश्विना ॥ १ ०४७ ०४
याभि॒ः कण्व॑म् अ॒भिष्टि॑भि॒ः प्राव॑तं यु॒वम् अ॑श्विना ।
ताभि॒ः ष्व् अ॒१ स्माꣳ अ॑वतं शुभस् पती पा॒तं सोम॑म् ऋतावृधा ॥ १ ०४७ ०५
सु॒दासे॑ दस्रा॒ वसु॒ बिभ्र॑ता॒ रथे॒ पृक्षो॑ वहतम् अश्विना ।
र॒यिं स॑मु॒द्राद् उ॒त वा॑ दि॒वस् पर्य् अ॒स्मे ध॑त्तम् पु॒रु॒स्पृह॑म् ॥ १ ०४७ ०६
यन् ना॑सत्या परा॒वति॒ यद् वा॒ स्थो अधि॑ तु॒र्वशे॑ ।
अतो॒ रथे॑न सु॒वृता॑ न॒ आ ग॑तं सा॒कं सूर्य॑स्य र॒श्मिभि॑ः ॥ १ ०४७ ०७
अ॒र्वाञ्चा॑ वां॒ सप्त॑यो ऽध्वर॒श्रियो॒ वह॑न्तु॒ सव॒नेद् उप॑ ।
इष॑म् पृ॒ञ्चन्ता॑ सु॒कृते॑ सु॒दान॑व॒ आ ब॒र्हिः सी॑दतं नरा ॥ १ ०४७ ०८
तेन॑ नास॒त्या ग॑तं॒ रथे॑न॒ सूर्य॑त्वचा ।
येन॒ शश्व॑द् ऊ॒हथु॑र् दा॒शुषे॒ वसु॒ मध्व॒ः सोम॑स्य पी॒तये॑ ॥ १ ०४७ ०९
उ॒क्थेभि॑र् अ॒र्वाग् अव॑से पुरू॒वसू॑ अ॒र्कैश् च॒ नि ह्व॑यामहे ।
शश्व॒त् कण्वा॑नां॒ सद॑सि प्रि॒ये हि क॒ं सोम॑म् प॒पथु॑र् अश्विना ॥ १ ०४७ १०

स॒ह वा॒मेन॑ न उषो॒ व्य् उच्छा दुहितर् दिवः ।
स॒ह द्यु॒म्नेन॑ बृ॒हता वि॑भावरि रा॒या दे॑वि दास्व॑ती ॥ १ ०४८ ०१
अश्वा॑वती॒र् गोम॑तीर् विश्वसु॒विदो॒ भूरि॑ च्यवन्त॒ वस्त॑वे ।
उद् ई॑रय॒ प्रति॑ मा सू॒नृता॑ उष॒श् चोद॒ राधो॑ म॒घोना॑म् ॥ १ ०४८ ०२

उवासोषा उच्छाच् च नु देवी जीरा रथानाम् ।
ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः ॥ १ ०४८ ०३
उषो ये ते प्र यामेषु युञ्जते मनो दानाय सूरयः ।
अत्राह तत् कण्व एषां कण्वतमो नाम गृणाति नृणाम् ॥ १ ०४८ ०४
आ घा योषेव सूनर्य् उषा याति प्रभुञ्जती ।
जरयन्ती वृजनम् पद्वद् ईयत उत् पातयति पक्षिणः ॥ १ ०४८ ०५
वि या सृजति समनं व्य् अ १ र्थिनः पदं न वेत्य् ओदती ।
वयो नकिष् टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥ १ ०४८ ०६
एषायुक्त परावतः सूर्यस्योदयनाद् अधि ।
शतं रथेभिः सुभगोषा इयं वि यात्य् अभि मानुषान् ॥ १ ०४८ ०७
विश्वम् अस्या नानाम चक्षसे जगज् ज्योतिष् कृणोति सूनरी ।
अप द्वेषो मघोनी दुहिता दिव उषा उच्छद् अप स्रिधः ॥ १ ०४८ ०८
उष आ भाहि भानुना चन्द्रेण दुहितर् दिवः ।
आवहन्ती भूर्य् अस्मभ्यं सौभगं व्युच्छन्ती दिविष्टिषु ॥ १ ०४८ ०९
विश्वस्य हि प्राणनं जीवनं त्वे वि यद् उच्छसि सूनरि ।
सा नो रथेन बृहता विभावरि श्रुधि चित्रामघे हवम् ॥ १ ०४८ १०
उषो वाजं हि वंस्व यश् चित्रो मानुषे जने ।
तेना वह सुकृतो अध्वराँ उप ये त्वा गृणन्ति वह्नयः ॥ १ ०४८ ११
विश्वान् देवाँ आ वह सोमपीतये ऽन्तरिक्षाद् उषस् त्वम् ।
सास्मासु धा गोमद् अश्ववद् उक्थ्य १ म् उषो वाजं सुवीर्यम् ॥ १ ०४८ १२
यस्या रुशन्तो अर्चयः प्रति भद्रा अदृक्षत ।
सा नो रयिं विश्ववारं सुपेशसम् उषा ददातु सुग्म्यम् ॥ १ ०४८ १३
ये चिद् धि त्वाम् ऋषयः पूर्व ऊतये जुहूरे ऽवसे महि ।
सा न स्तोमाँ अभि गृणीहि राधसोषः शुक्रेण शोचिषा ॥ १ ०४८ १४
उषो यद् अद्य भानुना वि द्वाराव् ऋणवो दिवः ।
प्र नो यच्छताद् अवृकम् पृथु छर्दिः प्र देवि गोमतीर् इषः ॥ १ ०४८ १५
सं नो राया बृहता विश्वपेशसा मिमिक्ष्वा सम् इळाभिर् आ ।
सं द्युम्नेन विश्वतुरोषो महि सं वाजैर् वाजिनीवति ॥ १ ०४८ १६

उषो भद्रेभिर् आ गहि दिवश् चिद् रोचनाद् अधि ।
वहन्त्व् अरुणप्सव उप त्वा सोमिनो गृहम् ॥ १ ०४९ ०१
सुपेशसं सुखं रथं यम् अध्यस्था उषस् त्वम् ।
तेना सुश्रवसं जनम् प्रावाद्य दुहितर् दिवः ॥ १ ०४९ ०२
वयश् चित् ते पतत्रिणो द्विपच् चतुष्पद् अर्जुनि ।
उषः प्रारन्न् ऋतूꣳर् अनु दिवो अन्तेभ्यस् परि ॥ १ ०४९ ०३
व्युच्छन्ती हि रश्मिभिर् विश्वम् आभासि रोचनम् ।
तां त्वाम् उषर् वसूयवो गीर्भिः कण्वा अहूषत ॥ १ ०४९ ०४

उद् उ त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ १ ०५० ०१
अप त्ये तायवो यथा नक्षत्रा यन्त्य् अक्तुभिः ।
सूराय विश्वचक्षसे ॥ १ ०५० ०२
अदृश्रम् अस्य केतवो वि रश्मयो जनाꣳ अनु ।
भ्राजन्तो अग्नयो यथा ॥ १ ०५० ०३
तरणिर् विश्वदर्शतो ज्योतिष्कृद् असि सूर्य ।
विश्वम् आ भासि रोचनम् ॥ १ ०५० ०४
प्रत्यङ् देवानां विशः प्रत्यङ्ङ् उद् एषि मानुषान् ।
प्रत्यङ् विश्वं स्वर् दृशे ॥ १ ०५० ०५
येना पावक चक्षसा भुरण्यन्तं जनाꣳ अनु ।
त्वं वरुण पश्यसि ॥ १ ०५० ०६
वि द्याम् एषि रजस् पृथ्व् अहा मिमानो अक्तुभिः ।
पश्यञ् जन्मानि सूर्य ॥ १ ०५० ०७
सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केशं विचक्षण ॥ १ ०५० ०८

अयु॑क्त स॒प्त शु॒न्ध्युव॒ः सूरो॒ रथ॑स्य न॒प्त्यः ।
ताभि॑र् याति॒ स्वयु॑क्तिभिः ॥ १ ०५० ०९
उद् व॒यं तम॑सस् परि॒ ज्योति॑ष् पश्य॑न्त॒ उत्त॑रम् ।
दे॒वं दे॑व॒त्रा सूर्य॒म् अग॑न्म॒ ज्योति॑र् उत्त॒मम् ॥ १ ०५० १०
उ॒द्यन्न् अ॒द्य मि॑त्रमह आ॒रोह॒न्न् उत्त॑रां॒ दिव॑म् ।
हृ॒द्रो॒गम् मम॑ सूर्य हरि॒माणं॑ च नाशय ॥ १ ०५० ११
शुके॑षु मे हरि॒माणं॑ रोप॒णाका॑सु दध्मसि ।
अथो॑ हारिद्र॒वेषु॑ मे हरि॒माणं॒ नि द॑ध्मसि ॥ १ ०५० १२
उद् अ॑गाद् अ॒यम् आ॑दि॒त्यो विश्वे॑न॒ सह॑सा स॒ह ।
द्वि॒षन्त॒म् मह्यं॑ र॒न्धय॒न् मो अ॒हं द्वि॑ष॒ते र॑धम् ॥ १ ०५० १३

अ॒भि त्यम् मे॒षम् पु॑रुहू॒तम् ऋ॒ग्मिय॒म् इन्द्रं॑ गी॒र्भिर् म॑दता॒ वस्वो॑ अर्ण॒वम् ।
यस्य॒ द्यावो॒ न वि॒चर॑न्ति॒ मानु॑षा भु॒जे मंहि॑ष्ठम् अ॒भि विप्र॑म् अर्चत ॥ १ ०५१ ०१
अ॒भीम् अ॑वन्वन् स्वभि॒ष्टिम् ऊ॒तयो॑ ऽन्तरिक्ष॒प्रां तवि॑षीभि॒र् आवृ॑तम् ।
इन्द्रं॒ दक्षा॑स ऋ॒भवो॑ मद॒च्युतं॑ श॒तक्र॑तुं॒ जव॑नी सू॒नृतारु॑हत् ॥ १ ०५१ ०२
त्वं गो॒त्रम् अङ्गि॑रोभ्यो ऽवृणो॒र् अपो॒तात्र॑ये श॒तदु॑रेषु गातु॒वित् ।
स॒सेन॑ चिद् वि॒मदा॒याव॑हो॒ वस्व् आ॒जाव् अद्रिं॑ वावसा॒नस्य॑ न॒र्तय॑न् ॥ १ ०५१ ०३
त्वम् अ॒पाम् अ॑पि॒धाना॑वृणो॒र् अपाधा॑रयः॒ पर्व॑ते॒ दानु॑म॒द् वसु॑ ।
वृ॒त्रं यद् इ॑न्द्र॒ शव॒साव॑धी॒र् अहि॒म् आद् इत् सूर्यं॑ दि॒व्य् आरो॑हयो दृ॒शे ॥ १ ०५१ ०४
त्वम् मा॒याभि॒र् अप॑ मा॒यिनो॑ ऽधमः स्व॒धाभि॒र् ये अधि॒ शुप्ता॒व् अजु॑ह्वत ।
त्वम् पिप्रो॒र् नृम॑णः॒ प्रारु॑जः॒ पुरः॒ प्र ऋ॒जिश्वा॑नं दस्यु॒हत्ये॑ष्व् आविथ ॥ १ ०५१ ०५
त्वं कुत्सं॑ शुष्ण॒हत्ये॑ष्व् आवि॒थार॑न्धयो ऽतिथि॒ग्वाय॒ शम्ब॑रम् ।
म॒हान्तं॑ चिद् अर्बु॒दं नि क्र॑मीः प॒दा स॒नाद् ए॒व द॑स्यु॒हत्या॑य जज्ञिषे ॥ १ ०५१ ०६
त्वे विश्वा॒ तवि॑षी स॒ध्र्यग् घि॒ता तव॒ राधः॑ सोमपी॒थाय॑ हर्षते ।
तव॒ वज्र॑श् चिकिते बा॒ह्वोर् हि॒तो वृ॒श्चा शत्रो॒र् अव॒ विश्वा॑नि॒ वृष्ण्या॑ ॥ १ ०५१ ०७
वि जा॑नीह्य् आर्या॒न् ये च॒ दस्य॑वो ब॒र्हिष्म॑ते रन्धया॒ शास॑द् अव्र॒तान् ।
शाकी॑ भव॒ यज॑मानस्य चोदि॒ता विश्वेत् ता ते॑ सध॒मादे॑षु चाकन ॥ १ ०५१ ०८

अनुव्रताय रन्धयन्न् अपव्रतान् आभूभिर् इन्द्रः श्नथयन्न् अनाभुवः ।
वृद्धस्य चिद् वर्धतो द्याम् इनक्षत स्तवानो वम्रो वि जघान संदिहः ॥ १ ०५१ ०९
तक्षद् यत् त उशना सहसा सहो वि रोदसी मज्मना बाधते शवः ।
आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणम् अवहन्न् अभि श्रवः ॥ १ ०५१ १०
मन्दिष्ट यद् उशने काव्ये सचाँ इन्द्रो वङ्कू वङ्कुतराधि तिष्ठति ।
उग्रो ययिं निर् अपः स्रोतसासृजद् वि शुष्णस्य दृंहिता ऐरयत् पुरः ॥ १ ०५१ ११
आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मन्दसे ।
इन्द्र यथा सुतसोमेषु चाकनो ऽनर्वाणं श्लोकम् आ रोहसे दिवि ॥ १ ०५१ १२
अददा अर्भाम् महते वचस्यवे कक्षीवते वृचयाम् इन्द्र सुन्वते ।
मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत् ता ते सवनेषु प्रवाच्या ॥ १ ०५१ १३
इन्द्रो अश्रायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः ।
अश्वयुर् गव्यू रथयुर् वसूयुर् इन्द्र इद् रायः क्षयति प्रयन्ता ॥ १ ०५१ १४
इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसे ऽवाचि ।
अस्मिन्न् इन्द्र वृजने सर्ववीराः स्मत् सूरिभिस् तव शर्मन् स्याम ॥ १ ०५१ १५

त्यं सु मेषम् महया स्वर्विदं शतं यस्य सुभ्वः साकम् ईरते ।
अत्यं न वाजं हवनस्यदं रथम् एन्द्रं ववृत्याम् अवसे सुवृक्तिभिः ॥ १ ०५२ ०१
स पर्वतो न धरुणेष्व् अच्युतः सहस्रमूतिस् तविषीषु वावृधे ।
इन्द्रो यद् वृत्रम् अवधीन् नदीवृतम् उब्जन्न् अर्णांसि जर्हृषाणो अन्धसा ॥ १ ०५२ ०२
स हि द्वरो द्वरिषु वव्र ऊधनि चन्द्रबुध्नो मदवृद्धो मनीषिभिः ।
इन्द्रं तम् अह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिर् अन्धसः ॥ १ ०५२ ०३
आ यम् पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्व१ः स्वा अभिष्टयः ।
तं वृत्रहत्ये अनु तस्थुर् ऊतयः शुष्मा इन्द्रम् अवाता अह्रुतप्सवः ॥ १ ०५२ ०४
अभि स्ववृष्टिम् मदे अस्य युध्यतो रघ्वीर् इव प्रवणे सस्रुर् ऊतयः ।
इन्द्रो यद् वज्री धृषमाणो अन्धसा भिनद् वलस्य परिधींर् इव त्रितः ॥ १ ०५२ ०५
परीं घृणा चरति तित्विषे शवो ऽपो वृत्वी रजसो बुध्नम् आशयत् ।

वृत्रस्य यत् प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोर् इन्द्र तन्यतुम् ॥ १ ०५२ ०६
ह्रदं न हि त्वा न्यृषन्त्य् ऊर्मयो ब्रह्माणीन्द्र तव यानि वर्धना ।
त्वष्टा चित् ते युज्यं वावृधे शवस् ततक्ष वज्रम् अभिभूत्योजसम् ॥ १ ०५२ ०७
जघन्वाँ उ हरिभिः सम्भृतक्रतव् इन्द्र वृत्रम् मनुषे गातुयन्न् अपः ।
अयच्छथा बाह्वोर् वज्रम् आयसम् अधारयो दिव्य् आ सूर्यं दृशे ॥ १ ०५२ ०८
बृहत् स्वश्चन्द्रम् अमवद् यद् उक्थ्यम् अकृण्वत भियसा रोहणं दिवः ।
यन् मानुषप्रधना इन्द्रम् ऊतयः स्वर् नृषाचो मरुतो ऽमदन्न् अनु ॥ १ ०५२ ०९
द्यौश् चिद् अस्यामवाँ अहेः स्वनाद् अयोयवीद् भियसा वज्र इन्द्र ते ।
वृत्रस्य यद् बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच् छिरः ॥ १ ०५२ १०
यद् इन् न्व् ऐन्द्र पृथिवी दशभुजिर् अहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन् विश्रुतं सहो द्याम् अनु शवसा बर्हणा भुवत् ॥ १ ०५२ ११
त्वम् अस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः ।
चकृषे भूमिम् प्रतिमानम् ओजसो ऽपः स्वः परिभूर् एष्य् आ दिवम् ॥ १ ०५२ १२
त्वम् भुवः प्रतिमानम् पृथिव्या ऋष्ववीरस्य बृहतः पतिर् भूः ।
विश्वम् आप्रा अन्तरिक्षम् महित्वा सत्यम् अद्धा नकिर् अन्यस् त्वावान् ॥ १ ०५२ १३
न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तम् आनशुः ।
नोत स्ववृष्टिम् मदे अस्य युध्यत एको अन्यच् चकृषे विश्वम् आनुषक् ॥ १ ०५२ १४
आर्चन्न् अत्र मरुतः सस्मिन्न् आजौ विश्वे देवासो अमदन्न् अनु त्वा ।
वृत्रस्य यद् भृष्टिमता वधेन नि त्वम् इन्द्र प्रत्य् आनं जघन्थ ॥ १ ०५२ १५

न्य् ऊ ३ षु वाचम् प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः ।
नू चिद् धि रत्नं ससताम् इवाविदन् न दुष्टुतिर् द्रविणोदेषु शस्यते ॥ १ ०५३ ०१
दुरो अश्वस्य दुर इन्द्र गोर् असि दुरो यवस्य वसुन इनस् पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस् तम् इदं गृणीमसि ॥ १ ०५३ ०२
शचीव इन्द्र पुरुकृद् द्युमत्तम तवेद् इदम् अभितश् चेकिते वसु ।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः कामम् ऊनयीः ॥ १ ०५३ ०३
एभिर् द्युभिः सुमना एभिर् इन्दुभिर् निरुन्धानो अमतिं गोभिर् अश्विना ।

इन्द्रेण दस्युं दरयन्त इन्दुभिर् युतद्वेषसः सम् इषा रभेमहि ॥ १ ०५३ ०४
सम् इन्द्र राया सम् इषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैर् अभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥ १ ०५३ ०५
ते त्वा मदा अमदन् तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत् कारवे दश वृत्राण्य् अप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥ १ ०५३ ०६
युधा युधम् उप घेद् एषि धृष्णुया पुरा पुरं सम् इदं हंस्य् ओजसा ।
नम्या यद् इन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥ १ ०५३ ०७
त्वं करञ्जम् उत पर्णयं वधीस् तेजिष्ठयातिथिग्वस्य वर्तनी ।
त्वं शता वङ्गृदस्याभिनत् पुरो ऽनानुदः परिषूता ऋजिश्वना ॥ १ ०५३ ०८
त्वम् एताञ् जनराज्ञो द्विर् दशाबन्धुना सुश्रवसोपजग्मुषः ।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥ १ ०५३ ०९
त्वम् आविथ सुश्रवसं तवोतिभिस् तव त्रामभिर् इन्द्र तूर्वयाणम् ।
त्वम् अस्मै कुत्सम् अतिथिग्वम् आयुम् महे राज्ञे यूने अरन्धनायः ॥ १ ०५३ १०
य उदृचीन्द्र देवगोपाः सखायस् ते शिवतमा असाम ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥ १ ०५३ ११

मा नो अस्मिन् मघवन् पृत्स्व् अंहसि नहि ते अन्तः शवसः परीणशे ।
अक्रन्दयो नद्यो ३ रोरुवद् वना कथा न क्षोणीर् भियसा सम् आरत ॥ १ ०५४ ०१
अर्चा शक्राय शाकिने शचीवते शृण्वन्तम् इन्द्रम् महयन्न् अभि ष्टुहि ।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते ॥ १ ०५४ ०२
अर्चा दिवे बृहते शूष्य १ं वचः स्वक्षत्रं यस्य धृषतो धृषन् मनः ।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ॥ १ ०५४ ०३
त्वं दिवो बृहतः सानु कोपयो ऽव त्मना धृषता शम्बरम् भिनत् ।
यन् मायिनो व्रन्दिनो मन्दिना धृषच् छितां गभस्तिम् अशनिम् पृतन्यसि ॥ १ ०५४ ०४
नि यद् वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद् व्रन्दिनो रोरुवद् वना ।
प्राचीनेन मनसा बर्हणावता यद् अद्या चित् कृणवः कस् त्वा परि ॥ १ ०५४ ०५

त्वम् आ॑वि॒थ नर्यं॑ तु॒र्वशं॒ यदुं॒ त्वं तु॒र्वीतिं॑ व॒य्यं॑ शतक्रतो ।
त्वं र॒थम् एत॑शं॒ कृत्व्ये॒ धने॒ त्वम् पुरो॑ नव॒तिं द॑म्भयो॒ नव॑ ॥ १ ०५४ ०६
स घा॒ राजा॒ सत्प॑तिः शूशुव॒ज् जनो॑ रा॒तह॑व्यः॒ प्रति॒ यः शास॒म् इन्व॑ति ।
उ॒क्था वा॒ यो अ॑भिगृ॒णाति॒ राध॑सा॒ दानु॑र् अस्मा॒ उप॑रा पिन्वते दि॒वः ॥ १ ०५४ ०७
अस॑मं क्ष॒त्रम् अस॑मा मनी॒षा प्र सो॑म॒पा अप॑सा सन्तु॒ नेमे॑ ।
ये त॑ इन्द्र द॒दुषो॑ व॒र्धय॑न्ति॒ महि॑ क्ष॒त्रं स्थवि॑रं॒ वृष्ण्यं॑ च ॥ १ ०५४ ०८
तुभ्येद् ए॒ते ब॑हु॒ला अद्रि॑दुग्धाश् चमू॒षद॑श् चम॒सा इ॑न्द्र॒पानाः॑ ।
व्य् अश्नुहि त॒र्पया॒ काम॑म् एषा॒म् अथा॒ मनो॑ वसु॒देया॑य कृष्व ॥ १ ०५४ ०९
अ॒पाम् अ॑तिष्ठद् ध॒रुण॑ह्वरं॒ तमो॑ ऽन्तर् वृ॒त्रस्य॑ ज॒ठरे॑षु॒ पर्व॑तः ।
अ॒भीम् इन्द्रो॑ न॒द्यो॑ व॒व्रिणा॑ हि॒ता विश्वा॑ अनु॒ष्ठाः प्र॑व॒णेषु॑ जिघ्नते ॥ १ ०५४ १०
स शेवृ॑धम् अधि॑ धा द्यु॒म्नम् अ॒स्मे महि॑ क्ष॒त्रं ज॑ना॒षाळ् इ॑न्द्र॒ तव्य॑म् ।
रक्षा॑ च नो म॒घोनः॑ पा॒हि सू॒रीन् रा॒ये च॑ नः स्वप॒त्या इ॒षे धाः॑ ॥ १ ०५४ ११

दि॒वश् चि॑द् अस्य वरि॒मा वि प॑प्रथ॒ इन्द्रं॒ न म॒ह्ना पृ॑थि॒वी च॒न प्रति॑ ।
भी॒मस् तुवि॑ष्माञ् चर्ष॒णिभ्य॑ आत॒पः शिशी॑ते॒ वज्रं॒ तेज॑से॒ न वंस॑गः ॥ १ ०५५ ०१
सो अ॑र्ण॒वो न न॒द्यः॑ समु॒द्रियः॒ प्रति॑ गृभ्णाति॒ विश्रि॑ता॒ वरी॑मभिः ।
इन्द्रः॒ सोम॑स्य पी॒तये॑ वृषायते स॒नात् स यु॒ध्म ओज॑सा पनस्यते ॥ १ ०५५ ०२
त्वं तम् इ॑न्द्र॒ पर्व॑तं॒ न भोज॑से म॒हो नृ॒म्णस्य॒ धर्म॑णाम् इरज्यसि ।
प्र वी॒र्ये॑ण दे॒वताति॑ चेकिते॒ विश्व॑स्मा उ॒ग्रः कर्म॑णे पु॒रोहि॑तः ॥ १ ०५५ ०३
स इद् वने॑ नम॒स्युभि॑र् वचस्यते॒ चारु॒ जने॑षु प्रब्रुवा॒ण इ॑न्द्रि॒यम् ।
वृषा॒ छन्दु॑र् भवति हर्य॒तो वृषा॒ क्षेमे॑ण॒ धेना॑म् म॒घवा॒ यद् इन्व॑ति ॥ १ ०५५ ०४
स इन् म॒हानि॑ समि॒थानि॑ म॒ज्मना॑ कृ॒णोति॑ यु॒ध्म ओज॑सा॒ जने॑भ्यः ।
अधा॑ च॒न श्रद् द॑धति॒ त्विषी॑मत॒ इन्द्रा॑य॒ वज्रं॑ नि॒घनि॑घ्नते व॒धम् ॥ १ ०५५ ०५
स हि श्र॑व॒स्युः सद॑नानि कृ॒त्रिमा॑ क्ष्म॒या वृ॑धा॒न ओज॑सा विना॒शय॑न् ।
ज्योतीं॑षि कृ॒ण्वन्न् अ॑वृ॒काणि॒ यज्य॒वे ऽव॑ सु॒क्रतुः॒ सर्त॒वा अ॒पः सृ॑जत् ॥ १ ०५५ ०६
दा॒नाय॒ मनः॑ सोमपावन्न् अस्तु ते ऽर्वाञ्चा॒ हरी॑ वन्दनश्रु॒द् आ कृ॑धि ।
यमि॑ष्ठासः॒ सार॑थयो॒ य इ॑न्द्र ते॒ न त्वा॒ केता॒ आ द॑भ्नुवन्ति॒ भूर्ण॑यः ॥ १ ०५५ ०७

अप्रक्षितं वसु बिभर्षि हस्तयोर् अषाळ्हं सहस् तन्वि श्रुतो दधे ।
आवृतासो ऽवतासो न कर्तृभिस् तनूषु ते क्रतव इन्द्र भूरयः ॥ १ ०५५ ०८

एष प्र पूर्वीर् अव तस्य चम्रिषो ऽत्यो न योषाम् उद् अयंस्त भुर्वणिः ।
दक्षम् महे पाययते हिरण्ययं रथम् आवृत्या हरियोगम् ऋभ्वसम् ॥ १ ०५६ ०१
तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥ १ ०५६ ०२
स तुर्वणिर् महाँ अरेणु पौंस्ये गिरेर् भृष्टिर् न भ्राजते तुजा शवः ।
येन शुष्णम् मायिनम् आयसो मदे दुध्र आभूषु रामयन् नि दामनि ॥ १ ०५६ ०३
देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्य् उषसं न सूर्यः ।
यो धृष्णुना शवसा बाधते तम इयर्ति रेणुम् बृहद् अर्हरिष्वणिः ॥ १ ०५६ ०४
वि यत् तिरो धरुणम् अच्युतं रजो ऽतिष्ठिपो दिव आतासु बर्हणा ।
स्वर्मीळ्हे यन् मद इन्द्र हर्ष्याहन् वृत्रं निर् अपाम् औब्जो अर्णवम् ॥ १ ०५६ ०५
त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥ १ ०५६ ०६

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिम् भरे ।
अपाम् इव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥ १ ०५७ ०१
अध ते विश्वम् अनु हासद् इष्टय आपो निम्नेव सवना हविष्मतः ।
यत् पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥ १ ०५७ ०२
अस्मै भीमाय नमसा सम् अध्वर उषो न शुभ्र आ भरा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिर् अकारि हरितो नायसे ॥ १ ०५७ ०३
इमे त इन्द्र ते वयम् पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वद् अन्यो गिर्वणो गिरः सघत् क्षोणीर् इव प्रति नो हर्य तद् वचः ॥ १ ०५७
०४
भूरि त इन्द्र वीर्यं तव स्मस्य् अस्य स्तोतुर् मघवन् कामम् आ पृण ।

अनु ते द्यौर् बृहती वीर्यम् मम इयं च ते पृथिवी नेम ओजसे ॥ १ ०५७ ०५
त्वं तम् इन्द्र पर्वतम् महाम् उरुं वज्रेण वज्रिन् पर्वशश् चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥ १ ०५७ ०६

नू चित् सहोजा अमृतो नि तुन्दते होता यद् दूतो अभवद् विवस्वतः ।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥ १ ०५८ ०१
आ स्वम् अद्म युवमानो अजरस् तृष्व् अविष्यन्न् अतसेषु तिष्ठति ।
अत्यो न पृष्ठम् प्रुषितस्य रोचते दिवो न सानु स्तनयन्न् अचिक्रदत् ॥ १ ०५८ ०२
क्राणा रुद्रेभिर् वसुभिः पुरोहितो होता निषत्तो रयिषाळ् अमर्त्यः ।
रथो न विक्ष्व् ऋञ्जसान आयुषु व्य् आनुषग् वार्या देव ऋण्वति ॥ १ ०५८ ०३
वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यद् अग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥ १ ०५८ ०४
तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्न् अक्षितम् पाजसा रज स्थातुश् चरथम् भयते पतत्रिणः ॥ १ ०५८ ०५
दधुष् ट्वा भृगवो मानुषेष्व् आ रयिं न चारुं सुहवं जनेभ्यः ।
होतारम् अग्ने अतिथिं वरेण्यम् मित्रं न शेवं दिव्याय जन्मने ॥ १ ०५८ ०६
होतारं सप्त जुह्वो यजिष्ठं यं वाघतो वृणते अध्वरेषु ।
अग्निं विश्वेषाम् अरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम् ॥ १ ०५८ ०७
अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गृणन्तम् अंहस उरुष्योर्जो नपात् पूर्भिर् आयसीभिः ॥ १ ०५८ ०८
भवा वरूथं गृणते विभावो भवा मघवन् मघवद्भ्यः शर्म ।
उरुष्याग्ने अंहसो गृणन्तम् प्रातर् मक्षू धियावसुर् जगम्यात् ॥ १ ०५८ ०९

वया इद् अग्ने अग्नयस् ते अन्ये त्वे विश्वे अमृता मादयन्ते ।
वैश्वानर नाभिर् असि क्षितीनां स्थूणेव जनाँ उपमिद् ययन्थ ॥ १ ०५९ ०१
मूर्धा दिवो नाभिर् अग्निः पृथिव्या अथाभवद् अरती रोदस्योः ।

तं त्वा देवासो ऽजनयन्त देवं वैश्वानर ज्योतिर् इद् आर्याय ॥ १ ०५९ ०२
आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरे ऽग्ना वसूनि ।
या पर्वतेष्व् ओषधीष्व् अप्सु या मानुषेष्व् असि तस्य राजा ॥ १ ०५९ ०३
बृहती इव सूनवे रोदसी गिरो होता मनुष्यो ३ न दक्षः ।
स्वर्वते सत्यशुष्माय पूर्वीर् वैश्वानराय नृतमाय यह्वीः ॥ १ ०५९ ०४
दिवश् चित् ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वम् ।
राजा कृष्टीनाम् असि मानुषीणां युधा देवेभ्यो वरिवश् चकर्थ ॥ १ ०५९ ०५
प्र नू महित्वं वृषभस्य वोचं यम् पूरवो वृत्रहणं सचन्ते ।
वैश्वानरो दस्युम् अग्निर् जघन्वाँ अधूनोत् काष्ठा अव शम्बरम् भेत् ॥ १ ०५९ ०६
वैश्वानरो महिम्ना विश्वकृष्टिर् भरद्वाजेषु यजतो विभावा ।
शातवनेये शतिनीभिर् अग्निः पुरुणीथे जरते सूनृतावान् ॥ १ ०५९ ०७

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम् ।
द्विजन्मानं रयिम् इव प्रशस्तं रातिम् भरद् भृगवे मातरिश्वा ॥ १ ०६० ०१
अस्य शासुर् उभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः ।
दिवश् चित् पूर्वो न्य् असादि होतापृच्छ्यो विश्पतिर् विक्षु वेधाः ॥ १ ०६० ०२
तं नव्यसी हृद आ जायमानम् अस्मत् सुकीर्तिर् मधुजिह्वम् अश्याः ।
यम् ऋत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त ॥ १ ०६० ०३
उशिक् पावको वसुर् मानुषेषु वरेण्यो होताधायि विक्षु ।
दमूना गृहपतिर् दम आँ अग्निर् भुवद् रयिपती रयीणाम् ॥ १ ०६० ०४
तं त्वा वयम् पतिम् अग्ने रयीणाम् प्र शंसामो मतिभिर् गोतमासः ।
आशुं न वाजम्भरम् मर्जयन्तः प्रातर् मक्षू धियावसुर् जगम्यात् ॥ १ ०६० ०५

अस्मा इद् उ प्र तवसे तुराय प्रयो न हर्मि स्तोमम् माहिनाय ।
ऋचीषमायाध्रिगव ओहम् इन्द्राय ब्रह्माणि राततमा ॥ १ ०६१ ०१
अस्मा इद् उ प्रय इव प्र यंसि भराम्य् आङ्गूषम् बाधे सुवृक्ति ।

इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त ॥ १ ०६१ ०२
अस्मा इद् उ त्यम् उपमं स्वर्षाम् भराम्य् आङ्गूषम् आस्येन ।
मंहिष्ठम् अच्छोक्तिभिर् मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥ १ ०६१ ०३
अस्मा इद् उ स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।
गिरश् च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वम् मेधिराय ॥ १ ०६१ ०४
अस्मा इद् उ सप्तिम् इव श्रवस्येन्द्रायार्कं जुह्वा ३ सम् अञ्जे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥ १ ०६१ ०५
अस्मा इद् उ त्वष्टा तक्षद् वज्रं स्वपस्तमं स्वर्य १ं रणाय ।
वृत्रस्य चिद् विदद् येन मर्म तुजन्न् ईशानस् तुजता कियेधाः ॥ १ ०६१ ०६
अस्येद् उ मातुः सवनेषु सद्यो महः पितुम् पपिवाञ् चार्व् अन्ना ।
मुषायद् विष्णुः पचतं सहीयान् विध्यद् वराहं तिरो अद्रिम् अस्ता ॥ १ ०६१ ०७
अस्मा इद् उ ग्नाश् चिद् देवपत्नीर् इन्द्रायार्कम् अहिहत्य ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानम् परि ष्टः ॥ १ ०६१ ०८
अस्येद् एव प्र रिरिचे महित्वं दिवस् पृथिव्याः पर्य् अन्तरिक्षात् ।
स्वराळ् इन्द्रो दम आ विश्वगूर्तः स्वरिर् अमत्रो ववक्षे रणाय ॥ १ ०६१ ०९
अस्येद् एव शवसा शुषन्तं वि वृश्चद् वज्रेण वृत्रम् इन्द्रः ।
गा न व्राणा अवनीर् अमुञ्चद् अभि श्रवो दावने सचेताः ॥ १ ०६१ १०
अस्येद् उ त्वेषसा रन्त सिन्धवः परि यद् वज्रेण सीम् अयच्छत् ।
ईशानकृद् दाशुषे दशस्यन् तुर्वीतये गाधं तुर्वणिः कः ॥ १ ०६१ ११
अस्मा इद् उ प्र भरा तूतुजानो वृत्राय वज्रम् ईशानः कियेधाः ।
गोर् न पर्व वि रदा तिरश्चेष्यन्न् अर्णांस्य् अपां चरध्यै ॥ १ ०६१ १२
अस्येद् उ प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यद् इष्णान आयुधान्य् ऋघायमाणो निरिणाति शत्रून् ॥ १ ०६१ १३
अस्येद् उ भिया गिरयश् च दृळ्हा द्यावा च भूमा जनुषस् तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद् वीर्याय नोधाः ॥ १ ०६१ १४
अस्मा इद् उ त्यद् अनु दाय्य् एषाम् एको यद् वव्ने भूरेर् ईशानः ।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विम् आवद् इन्द्रः ॥ १ ०६१ १५
एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन् ।

ऐषु विश्वपेशसं धियं धाः प्रातर् मक्षू धियावसुर् जगम्यात् ॥ १ ०६१ १६

प्र मन्महे शवसानाय शूषम् आङ्गूषं गिर्वणसे अङ्गिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १ ०६२ ०१
प्र वो महे महि नमो भरध्वम् आङ्गूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥ १ ०६२ ०२
इन्द्रस्याङ्गिरसां चेष्टौ विदत् सरमा तनयाय धासिम् ।
बृहस्पतिर् भिनद् अद्रिं विदद् गाः सम् उस्रियाभिर् वावशन्त नरः ॥ १ ०६२ ०३
स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो नवग्वैः ।
सरण्युभिः फलिगम् इन्द्र शक्र वलं रवेण दरयो दशग्वैः ॥ १ ०६२ ०४
गृणानो अङ्गिरोभिर् दस्म वि वर् उषसा सूर्येण गोभिर् अन्धः ।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरम् अस्तभायः ॥ १ ०६२ ०५
तद् उ प्रयक्षतमम् अस्य कर्म दस्मस्य चारुतमम् अस्ति दंसः ।
उपह्वरे यद् उपरा अपिन्वन् मध्वर्णसो नद्यश् चतस्रः ॥ १ ०६२ ०६
द्विता वि वव्रे सनजा सनीळे अयास्य स्तवमानेभिर् अर्कैः ।
भगो न मेने परमे व्योमन्न् अधारयद् रोदसी सुदंसाः ॥ १ ०६२ ०७
सनाद् दिवम् परि भूमा विरूपे पुनर्भुवा युवती स्वेभिर् एवैः ।
कृष्णेभिर् अक्तोषा रुशद्भिर् वपुर्भिर् आ चरतो अन्यान्या ॥ १ ०६२ ०८
सनेमि सख्यं स्वपस्यमानः सूनुर् दाधार शवसा सुदंसाः ।
आमासु चिद् दधिषे पक्वम् अन्तः पयः कृष्णासु रुशद् रोहिणीषु ॥ १ ०६२ ०९
सनात् सनीळा अवनीर् अवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पुरू सहस्रा जनयो न पत्नीर् दुवस्यन्ति स्वसारो अह्रयाणम् ॥ १ ०६२ १०
सनायुवो नमसा नव्यो अर्कैर् वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीर् उशतीर् उशन्तं स्पृशन्ति त्वा शवसावन् मनीषाः ॥ १ ०६२ ११
सनाद् एव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस् तव नः शचीभिः ॥ १ ०६२ १२
सनायते गोतम इन्द्र नव्यम् अतक्षद् ब्रह्म हरियोजनाय ।

सुनीथाय नः शवसान नोधाः प्रातर् मक्षू धियावसुर् जगम्यात् ॥ १ ०६२ १३

त्वम् महाँ इन्द्र यो ह शुष्मैर् द्यावा जज्ञानः पृथिवी अमे धाः ।
यद् ध ते विश्वा गिरयश् चिद् अभ्वा भिया दृळ्हासः किरणा नैजन् ॥ १ ०६३ ०१
आ यद् धरी इन्द्र विव्रता वेर् आ ते वज्रं जरिता बाह्वोर् धात् ।
येनाविहर्यतक्रतो अमित्रान् पुर इष्णासि पुरुहूत पूर्वीः ॥ १ ०६३ ०२
त्वं सत्य इन्द्र धृष्णुर् एतान् त्वम् ऋभुक्षा नर्यस् त्वं षाट् ।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥ १ ०६३ ०३
त्वं ह त्यद् इन्द्र चोदीः सखा वृत्रं यद् वज्रिन् वृषकर्मन्न् उभ्नाः ।
यद् ध शूर वृषमणः पराचैर् वि दस्यूꣳर् योनाव् अकृतो वृथाषाट् ॥ १ ०६३ ०४
त्वं ह त्यद् इन्द्रारिषण्यन् दृळ्हस्य चिन् मर्तानाम् अजुष्टौ ।
व्य् अ१स्मद् आ काष्ठा अर्वते वर् घनेव वज्रिस् छ्नथिह्य् अमित्रान् ॥ १ ०६३ ०५
त्वां ह त्यद् इन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते ।
तव स्वधाव इयम् आ समर्य ऊतिर् वाजेष्व् अतसाय्या भूत् ॥ १ ०६३ ०६
त्वं ह त्यद् इन्द्र सप्त युध्यन् पुरो वज्रिन् पुरुकुत्साय दर्दः ।
बर्हिर् न यत् सुदासे वृथा वर्ग् अंहो राजन् वरिवः पूरवे कः ॥ १ ०६३ ०७
त्वं त्यां न इन्द्र देव चित्राम् इषम् आपो न पीपयः परिज्मन् ।
यया शूर प्रत्य् अस्मभ्यं यंसि त्मनम् ऊर्जं न विश्वध क्षरध्यै ॥ १ ०६३ ०८
अकारि त इन्द्र गोतमेभिर् ब्रह्माण्य् ओक्ता नमसा हरिभ्याम् ।
सुपेशसं वाजम् आ भरा नः प्रातर् मक्षू धियावसुर् जगम्यात् ॥ १ ०६३ ०९

वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिम् प्र भरा मरुद्भ्यः ।
अपो न धीरो मनसा सुहस्त्यो गिरः सम् अञ्जे विदथेष्व् आभुवः ॥ १ ०६४ ०१
ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥ १ ०६४ ०२
युवानो रुद्रा अजरा अभोग्घनो ववक्षुर् अध्रिगावः पर्वता इव ।

दृळ्हा चिद् विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥ १ ०६४ ०३
चित्रैर् अञ्जिभिर् वपुषे व्य् अञ्जते वक्षस्सु रुक्माँ अधि येतिरे शुभे ।
अंसेष्व् एषां नि मिमृक्षुर् ऋष्टयः साकं जज्ञिरे स्वधया दिवो नरः ॥ १ ०६४ ०४
ईशानकृतो धुनयो रिशादसो वातान् विद्युतस् तविषीभिर् अक्रत ।
दुहन्त्य् ऊधर् दिव्यानि धूतयो भूमिम् पिन्वन्ति पयसा परिज्रयः ॥ १ ०६४ ०५
पिन्वन्त्य् अपो मरुतः सुदानवः पयो घृतवद् विदथेष्व् आभुवः ।
अत्यं न मिहे वि नयन्ति वाजिनम् उत्सं दुहन्ति स्तनयन्तम् अक्षितम् ॥ १ ०६४ ०६
महिषासो मायिनश् चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यद् आरुणीषु तविषीर् अयुग्ध्वम् ॥ १ ०६४ ०७
सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः ।
क्षपो जिन्वन्तः पृषतीभिर् ऋष्टिभिः सम् इत् सबाधः शवसाहिमन्यवः ॥ १ ०६४ ०८
रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।
आ वन्धुरेष्व् अमतिर् न दर्शता विद्युन् न तस्थौ मरुतो रथेषु वः ॥ १ ०६४ ०९
विश्ववेदसो रयिभिः समोकसः सम्मिश्लासस् तविषीभिर् विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योर् अनन्तशुष्मा वृषखादयो नरः ॥ १ ०६४ १०
हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो ३ न पर्वतान् ।
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥ १ ०६४ ११
घृषुम् पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसम् मारुतं गणम् ऋजीषिणं वृषणं सश्चत श्रिये ॥ १ ०६४ १२
प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यम् आवत ।
अर्वद्भिर् वाजम् भरते धना नृभिर् आपृच्छ्यं क्रतुम् आ क्षेति पुष्यति ॥ १ ०६४ १३
चर्कृत्यम् मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मम् मघवत्सु धत्तन ।
धनस्पृतम् उक्थ्यं विश्वचर्षणिं तोकम् पुष्येम तनयं शतं हिमाः ॥ १ ०६४ १४
नू ष्ठिरम् मरुतो वीरवन्तम् ऋतीषाहं रयिम् अस्मासु धत्त ।
सहस्रिणं शतिनं शूशुवांसम् प्रातर् मक्षू धियावसुर् जगम्यात् ॥ १ ०६४ १५

पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम् ।

सजोषा धीराः पदैर् अनु ग्मन्न् उप त्वा सीदन् विश्वे यजत्राः ॥ १ ०६५ ०२
ऋतस्य देवा अनु व्रता गुर् भुवत् परिष्टिर् द्यौर् न भूम ।
वर्धन्तीम् आपः पन्वा सुशिश्विम् ऋतस्य योना गर्भे सुजातम् ॥ १ ०६५ ०४
पुष्टिर् न रण्वा क्षितिर् न पृथ्वी गिरिर् न भुज्म क्षोदो न शम्भु ।
अत्यो नाज्मन् सर्गप्रतक्तः सिन्धुर् न क्षोदः क ईं वराते ॥ १ ०६५ ०६
जामिः सिन्धूनाम् भ्रातेव स्वस्राम् इभ्यान् न राजा वनान्य् अत्ति ।
यद् वातजूतो वना व्य् अस्थाद् अग्निर् ह दाति रोमा पृथिव्याः ॥ १ ०६५ ०८
श्वसित्य् अप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशाम् उषर्भुत् ।
सोमो न वेधा ऋतप्रजातः पशुर् न शिश्वा विभुर् दूरेभाः ॥ १ ०६५ १०

रयिर् न चित्रा सूरो न संदृग् आयुर् न प्राणो नित्यो न सूनुः ।
तक्वा न भूर्णिर् वना सिषक्ति पयो न धेनुः शुचिर् विभावा ॥ १ ०६६ ०२
दाधार क्षेमम् ओको न रण्वो यवो न पक्वो जेता जनानाम् ।
ऋषिर् न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति ॥ १ ०६६ ०४
दुरोकशोचिः क्रतुर् न नित्यो जायेव योनाव् अरं विश्वस्मै ।
चित्रो यद् अभ्राट् छ्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु ॥ १ ०६६ ०६
सेनेव सृष्टामं दधात्य् अस्तुर् न दिद्युत् त्वेषप्रतीका ।
१ ०६६ ०८ यमो ह जातो यमो जनित्वं जारः कनीनाम् पतिर् जनीनाम् ॥
तं वश् चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ।
१ ०६६ १० सिन्धुर् न क्षोदः प्र नीचीर् ऐनोन् नवन्त गावः स्व १ र् दृशीके ॥

वनेषु जायुर् मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यम् ।
१ ०६७ ०२ क्षेमो न साधुः क्रतुर् न भद्रो भुवत् स्वाधीर् होता हव्यवाट् ॥
हस्ते दधानो नृम्णा विश्वान्य् अमे देवान् धाद् गुहा निषीदन् ।
१ ०६७ ०४ विदन्तीम् अत्र नरो धियंधा हृदा यत् तष्टान् मन्त्राँ अशंसन् ॥
अजो न क्षां दाधार पृथिवीं तस्तम्भ द्याम् मन्त्रेभिः सत्यैः ।

१ ०६७ ०६ प्रिया पदानि पश्वो नि पाहि विश्वायुर् अग्ने गुहा गुहं गाः ॥
य ईं चिकेत गुहा भवन्तम् आ यः ससाद धाराम् ऋतस्य ।
१ ०६७ ०८ वि ये चृतन्त्य् ऋता सपन्त आद् इद् वसूनि प्र ववाचास्मै ॥
वि यो वीरुत्सु रोधन् महित्वोत प्रजा उत प्रसूष्व् अन्तः ।
१ ०६७ १० चित्तिर् अपां दमे विश्वायुः सद्मेव धीराः सम्माय चक्रुः ॥

श्रीणन्न् उप स्थाद् दिवम् भुरण्यु स्थातुश् चरथम् अक्तून् व्य् ऊर्णोत् ।
१ ०६८ ०२ परि यद् एषाम् एको विश्वेषाम् भुवद् देवो देवानाम् महित्वा ॥
आद् इत् ते विश्वे क्रतुं जुषन्त शुष्काद् यद् देव जीवो जनिष्ठाः ।
१ ०६८ ०४ भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतम् एवैः ॥
ऋतस्य प्रेषा ऋतस्य धीतिर् विश्वायुर् विश्वे अपांसि चक्रुः ।
१ ०६८ ०६ यस् तुभ्यं दाशाद् यो वा ते शिक्षात् तस्मै चिकित्वान् रयिं दयस्व ॥
होता निषत्तो मनोर् अपत्ये स चिन् न्व् आसाम् पती रयीणाम् ।
१ ०६८ ०८ इच्छन्त रेतो मिथस् तनूषु सं जानत स्वैर् दक्षैर् अमूराः ॥
पितुर् न पुत्राः क्रतुं जुषन्त श्रोषन् ये अस्य शासं तुरासः ।
१ ०६८ १० वि राय और्णोद् दुरः पुरुक्षुः पिपेश नाकं स्तृभिर् दमूनाः ॥

शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः ।
१ ०६९ ०२ परि प्रजातः क्रत्वा बभूथ भुवो देवानाम् पिता पुत्रः सन् ॥
वेधा अदृप्तो अग्निर् विजानन्न् ऊधर् न गोनां स्वाद्मा पितूनाम् ।
१ ०६९ ०४ जने न शेव आहूर्यः सन् मध्ये निषत्तो रण्वो दुरोणे ॥
पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् ।
१ ०६९ ०६ विशो यद् अह्वे नृभिः सनीळा अग्निर् देवत्वा विश्वान्य् अश्याः ॥
नकिष् ट एता व्रता मिनन्ति नृभ्यो यद् एभ्यः श्रुष्टिं चकर्थ ।
१ ०६९ ०८ तत् तु ते दंसो यद् अहन् समानैर् नृभिर् यद् युक्तो विवे रपांसि ॥
उषो न जारो विभावोस्रः संज्ञातरूपश् चिकेतद् अस्मै ।

१ ०६९ १० त्मना वहन्तो दुरो व्य् ऋण्वन् नवन्त विश्वे स्व १ र् दृशीके ॥

वनेम पूर्वीर् अर्यो मनीषा अग्निः सुशोको विश्वान्य् अश्याः ।
१ ०७० ०२ आ दैव्यानि व्रता चिकित्वान् आ मानुषस्य जनस्य जन्म ॥
गर्भो यो अपां गर्भो वनानां गर्भश् च स्थातां गर्भश् चरथाम् ।
१ ०७० ०४ अद्रौ चिद् अस्मा अन्तर् दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥
स हि क्षपावाँ अग्नी रयीणां दाशद् यो अस्मा अरं सूक्तैः ।
१ ०७० ०६ एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्तांश् च विद्वान् ॥
वर्धान् यम् पूर्वीः क्षपो विरूपा स्थातुश् च रथम् ऋतप्रवीतम् ।
१ ०७० ०८ अराधि होता स्व १ र् निषत्तः कृण्वन् विश्वान्य् अपांसि सत्या ॥
गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर् णः ।
१ ०७० १० वि त्वा नरः पुरुत्रा सपर्यन् पितुर् न जिव्रेर् वि वेदो भरन्त ॥
१ ०७० ११ साधुर् न गृध्नुर् अस्तेव शूरो यातेव भीमस् त्वेषः समत्सु ॥

उप प्र जिन्वन्न् उशतीर् उशन्तम् पतिं न नित्यं जनयः सनीळाः ।
स्वसारः श्यावीम् अरुषीम् अजुष्रञ् चित्रम् उच्छन्तीम् उषसं न गावः ॥ १ ०७१ ०१
वीळु चिद् दृळ्हा पितरो न उक्थैर् अद्रिं रुजन्न् अङ्गिरसो रवेण ।
चक्रुर् दिवो बृहतो गातुम् अस्मे अहः स्वर् विविदुः केतुम् उस्राः ॥ १ ०७१ ०२
दधन्न् ऋतं धनयन्न् अस्य धीतिम् आद् इद् अर्यो दिधिष्वो ३ विभृत्राः ।
अतृष्यन्तीर् अपसो यन्त्य् अच्छा देवाञ् जन्म प्रयसा वर्धयन्तीः ॥ १ ०७१ ०३
मथीद् यद् ईं विभृतो मातरिश्वा गृहे-गृहे श्येतो जेन्यो भूत् ।
आद् ईं राज्ञे न सहीयसे सचा सन्न् आ दूत्य १ म् भृगवाणो विवाय ॥ १ ०७१ ०४
महे यत् पित्र ईं रसं दिवे कर् अव त्सरत् पृशन्यश् चिकित्वान् ।
सृजद् अस्ता धृषता दिद्युम् अस्मै स्वायां देवो दुहितरि त्विषिं धात् ॥ १ ०७१ ०५
स्व आ यस् तुभ्यं दम आ विभाति नमो वा दाशाद् उशतो अनु द्यून् ।
वर्धो अग्ने वयो अस्य द्विबर्हा यासद् राया सरथं यं जुनासि ॥ १ ०७१ ०६

अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः ।
न जामिभिर् वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान् ॥ १ ०७१ ०७
आ यद् इषे नृपतिं तेज आनट् छुचि रेतो निषिक्तं द्यौर् अभीके ।
अग्निः शर्धम् अनवद्यं युवानं स्वाध्यं जनयत् सूदयच् च ॥ १ ०७१ ०८
मनो न यो ऽध्वनः सद्य एत्य् एकः सत्रा सूरो वस्व ईशे ।
राजाना मित्रावरुणा सुपाणी गोषु प्रियम् अमृतं रक्षमाणा ॥ १ ०७१ ०९
मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष् कविः सन् ।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेर् अधीहि ॥ १ ०७१ १०

नि काव्या वेधसः शश्वतस् कर् हस्ते दधानो नर्या पुरूणि ।
अग्निर् भुवद् रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥ १ ०७२ ०१
अस्मे वत्सम् परि षन्तं न विन्दन्न् इच्छन्तो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियंधास् तस्थुः पदे परमे चार्व् अग्नेः ॥ १ ०७२ ०२
तिस्रो यद् अग्ने शरदस् त्वाम् इच् छुचिं घृतेन शुचयः सपर्यान् ।
नामानि चिद् दधिरे यज्ञियान्य् असूदयन्त तन्वः सुजाताः ॥ १ ०७२ ०३
आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः ।
विदन् मर्तो नेमधिता चिकित्वान् अग्निम् पदे परमे तस्थिवांसम् ॥ १ ०७२ ०४
संजानाना उप सीदन्न् अभिज्ञु पत्नीवन्तो नमस्यं नमस्यन् ।
रिरिक्वांसस् तन्वः कृण्वत स्वाः सखा सख्युर् निमिषि रक्षमाणाः ॥ १ ०७२ ०५
त्रिः सप्त यद् गुह्यानि त्वे इत् पदाविदन् निहिता यज्ञियासः ।
तेभी रक्षन्ते अमृतं सजोषाः पशूञ् च स्थातॄञ् चरथं च पाहि ॥ १ ०७२ ०६
विद्वाँ अग्ने वयुनानि क्षितीनां व्य् आनुषक् छुरुधो जीवसे धाः ।
अन्तर्विद्वाँ अध्वनो देवयानान् अतन्द्रो दूतो अभवो हविर्वाट् ॥ १ ०७२ ०७
स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्य् ऋतज्ञा अजानन् ।
विदद् गव्यं सरमा दृळ्हम् ऊर्वं येना नु कम् मानुषी भोजते विट् ॥ १ ०७२ ०८
आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ।
मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैर् अदितिर् धायसे वेः ॥ १ ०७२ ०९

अधि श्रियं नि दधुश् चारुम् अस्मिन् दिवो यद् अक्षी अमृता अकृण्वन् ।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीर् अग्ने अरुषीर् अजानन् ॥ १ ०७२ १०

रयिर् न यः पितृवित्तो वयोधाः सुप्रणीतिश् चिकितुषो न शासुः ।
स्योनशीर् अतिथिर् न प्रीणानो होतेव सद्म विधतो वि तारीत् ॥ १ ०७३ ०१
देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा ।
पुरुप्रशस्तो अमतिर् न सत्य आत्मेव शेवो दिधिषाय्यो भूत् ॥ १ ०७३ ०२
देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा ।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी ॥ १ ०७३ ०३
तं त्वा नरो दम आ नित्यम् इद्धम् अग्ने सचन्त क्षितिषु ध्रुवासु ।
अधि द्युम्नं नि दधुर् भूर्य् अस्मिन् भवा विश्वायुर् धरुणो रयीणाम् ॥ १ ०७३ ०४
वि पृक्षो अग्ने मघवानो अश्युर् वि सूरयो ददतो विश्वम् आयुः ।
सनेम वाजं समिथेष्व् अर्यो भागं देवेषु श्रवसे दधानाः ॥ १ ०७३ ०५
ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः ।
परावतः सुमतिम् भिक्षमाणा वि सिन्धवः समया सस्रुर् अद्रिम् ॥ १ ०७३ ०६
त्वे अग्ने सुमतिम् भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः ।
नक्ता च चक्रुर् उषसा विरूपे कृष्णं च वर्णम् अरुणं च सं धुः ॥ १ ०७३ ०७
यान् राये मर्तान् सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वम् भुवनं सिसक्ष्य् आपप्रिवान् रोदसी अन्तरिक्षम् ॥ १ ०७३ ०८
अर्वद्भिर् अग्ने अर्वतो नृभिर् नॄन् वीरैर् वीरान् वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥ १ ०७३ ०९
एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।
शकेम रायः सुधुरो यमं ते ऽधि श्रवो देवभक्तं दधानाः ॥ १ ०७३ १०

उपप्रयन्तो अध्वरम् मन्त्रं वोचेमाग्नये ।
आरे अस्मे च शृण्वते ॥ १ ०७४ ०१

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु ।
अरक्षद् दाशुषे गयम् ॥ १ ०७४ ०२
उत ब्रुवन्तु जन्तव उद् अग्निर् वृत्रहाजनि ।
धनंजयो रणे-रणे ॥ १ ०७४ ०३
यस्य दूतो असि क्षये वेषि हव्यानि वीतये ।
दस्मत् कृणोष्य् अध्वरम् ॥ १ ०७४ ०४
तम् इत् सुहव्यम् अङ्गिरः सुदेवं सहसो यहो ।
जना आहुः सुबर्हिषम् ॥ १ ०७४ ०५
आ च वहासि ताँ इह देवाँ उप प्रशस्तये ।
हव्या सुश्चन्द्र वीतये ॥ १ ०७४ ०६
न योर् उपब्दिर् अश्व्यः शृण्वे रथस्य कच् चन ।
यद् अग्ने यासि दूत्यम् ॥ १ ०७४ ०७
त्वोतो वाज्य् अह्रयो ऽभि पूर्वस्माद् अपरः ।
प्र दाश्वाँ अग्ने अस्थात् ॥ १ ०७४ ०८
उत द्युमत् सुवीर्यम् बृहद् अग्ने विवाससि ।
देवेभ्यो देव दाशुषे ॥ १ ०७४ ०९

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् ।
हव्या जुह्वान आसनि ॥ १ ०७५ ०१
अथा ते अङ्गिरस्तमाग्ने वेधस्तम प्रियम् ।
वोचेम ब्रह्म सानसि ॥ १ ०७५ ०२
कस् ते जामिर् जनानाम् अग्ने को दाश्वध्वरः ।
को ह कस्मिन्न् असि श्रितः ॥ १ ०७५ ०३
त्वं जामिर् जनानाम् अग्ने मित्रो असि प्रियः ।
सखा सखिभ्य ईड्यः ॥ १ ०७५ ०४
यजा नो मित्रावरुणा यजा देवाँ ऋतम् बृहत् ।
अग्ने यक्षि स्वं दमम् ॥ १ ०७५ ०५

का त उपेतिर् मनसो वराय भुवद् अग्ने शंतमा का मनीषा ।
को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम ॥ १ ०७६ ०१
एह्य् अग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥ १ ०७६ ०२
प्र सु विश्वान् रक्षसो धक्ष्य् अग्ने भवा यज्ञानाम् अभिशस्तिपावा ।
अथा वह सोमपतिं हरिभ्याम् आतिथ्यम् अस्मै चकृमा सुदाव्ने ॥ १ ०७६ ०३
प्रजावता वचसा वह्निर् आसा च हुवे नि च सत्सीह देवैः ।
वेषि होत्रम् उत पोत्रं यजत्र बोधि प्रयन्तर् जनितर् वसूनाम् ॥ १ ०७६ ०४
यथा विप्रस्य मनुषो हविर्भिर् देवाँ अयजः कविभिः कविः सन् ।
एवा होतः सत्यतर त्वम् अद्याग्ने मन्द्रया जुह्वा यजस्व ॥ १ ०७६ ०५

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
यो मर्त्येष्व् अमृत ऋतावा होता यजिष्ठ इत् कृणोति देवान् ॥ १ ०७७ ०१
यो अध्वरेषु शंतम ऋतावा होता तम् ऊ नमोभिर् आ कृणुध्वम् ।
अग्निर् यद् वेर् मर्ताय देवान् स चा बोधाति मनसा यजाति ॥ १ ०७७ ०२
स हि क्रतुः स मर्यः स साधुर् मित्रो न भूद् अद्भुतस्य रथीः ।
तम् मेधेषु प्रथमं देवयन्तीर् विश उप ब्रुवते दस्मम् आरीः ॥ १ ०७७ ०३
स नो नृणां नृतमो रिशादा अग्निर् गिरो ऽवसा वेतु धीतिम् ।
तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म ॥ १ ०७७ ०४
एवाग्निर् गोतमेभिर् ऋतावा विप्रेभिर् अस्तोष्ट जातवेदाः ।
स एषु द्युम्नम् पीपयत् स वाजं स पुष्टिं याति जोषम् आ चिकित्वान् ॥ १ ०७७ ०५

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे ।
द्युम्नैर् अभि प्र णोनुमः ॥ १ ०७८ ०१

तम् उ त्वा गोतमो गिरा रायस्कामो दुवस्यति ।
द्युम्नैर् अभि प्र णोनुमः ॥ १ ०७८ ०२
तम् उ त्वा वाजसातमम् अङ्गिरस्वद् धवामहे ।
द्युम्नैर् अभि प्र णोनुमः ॥ १ ०७८ ०३
तम् उ त्वा वृत्रहन्तमं यो दस्यूँर् अवधूनुषे ।
द्युम्नैर् अभि प्र णोनुमः ॥ १ ०७८ ०४
अवोचाम रहूगणा अग्नये मधुमद् वचः ।
द्युम्नैर् अभि प्र णोनुमः ॥ १ ०७८ ०५

हिरण्यकेशो रजसो विसारे ऽहिर् धुनिर् वात इव ध्रजीमान् ।
शुचिभ्राजा उषसो नवेदा यशस्वतीर् अपस्युवो न सत्याः ॥ १ ०७९ ०१
आ ते सुपर्णा अमिनन्तँ एवैः कृष्णो नोनाव वृषभो यदीदम् ।
शिवाभिर् न स्मयमानाभिर् आगात् पतन्ति मिह स्तनयन्त्य् अभ्रा ॥ १ ०७९ ०२
यद् ईम् ऋतस्य पयसा पियानो नयन्न् ऋतस्य पथिभी रजिष्ठैः ।
अर्यमा मित्रो वरुणः परिज्मा त्वचम् पृञ्चन्त्य् उपरस्य योनौ ॥ १ ०७९ ०३
अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे धेहि जातवेदो महि श्रवः ॥ १ ०७९ ०४
स इधानो वसुष् कविर् अग्निर् ईळेन्यो गिरा ।
रेवद् अस्मभ्यम् पुर्वणीक दीदिहि ॥ १ ०७९ ०५
क्षपो राजन्न् उत त्मनाग्ने वस्तोर् उतोषसः ।
स तिग्मजम्भ रक्षसो दह प्रति ॥ १ ०७९ ०६
अवा नो अग्न ऊतिभिर् गायत्रस्य प्रभर्मणि ।
विश्वासु धीषु वन्द्य ॥ १ ०७९ ०७
आ नो अग्ने रयिम् भर सत्रासाहं वरेण्यम् ।
विश्वासु पृत्सु दुष्टरम् ॥ १ ०७९ ०८
आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् ।
मार्डीकं धेहि जीवसे ॥ १ ०७९ ०९

प्र पूतास् तिग्मशोचिषे वाचो गोतमाग्नये ।
भरस्व सुम्नयुर् गिरः ॥ १ ०७९ १०
यो नो अग्ने ऽभिदासत्य् अन्ति दूरे पदीष्ट सः ।
अस्माकम् इद् वृधे भव ॥ १ ०७९ ११
सहस्राक्षो विचर्षणिर् अग्नी रक्षांसि सेधति ।
होता गृणीत उक्थ्यः ॥ १ ०७९ १२

इत्था हि सोम इन् मदे ब्रह्मा चकार वर्धनम् ।
शविष्ठ वज्रिन्न् ओजसा पृथिव्या निः शशा अहिम् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०१
स त्वामदद् वृषा मदः सोमः श्येनाभृतः सुतः ।
येना वृत्रं निर् अद्भ्यो जघन्थ वज्रिन्न् ओजसार्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०२
प्रेह्य् अभीहि धृष्णुहि न ते वज्रो नि यंसते ।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपो ऽर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०३
निर् इन्द्र भूम्या अधि वृत्रं जघन्थ निर् दिवः ।
सृजा मरुत्वतीर् अव जीवधन्या इमा अपो ऽर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०४
इन्द्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः ।
अभिक्रम्याव जिघ्नते ऽपः सर्माय चोदयन्न् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०५
अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा ।
मन्दान इन्द्रो अन्धसः सखिभ्यो गातुम् इच्छत्य् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०६
इन्द्र तुभ्यम् इद् अद्रिवो ऽनुत्तं वज्रिन् वीर्यम् ।
यद् ध त्यम् मायिनम् मृगं तम् उ त्वम् माययावधीर् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०७
वि ते वज्रासो अस्थिरन् नवतिं नाव्या३ अनु ।
महत् त इन्द्र वीर्यम् बाह्वोस् ते बलं हितम् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०८
सहस्रं साकम् अर्चत परि ष्टोभत विंशतिः ।
शतैनम् अन्व् अनोनवुर् इन्द्राय ब्रह्मोद्यतम् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ०९

इन्द्रो वृत्रस्य तविषीं निर् अहन् सहसा सहः ।
महत् तद् अस्य पौंस्यं वृत्रं जघन्वाँ असृजद् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० १०
इमे चित् तव मन्यवे वेपेते भियसा मही ।
यद् इन्द्र वज्रिन्न् ओजसा वृत्रम् मरुत्वाँ अवधीर् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० ११
न वेपसा न तन्यतेन्द्रं वृत्रो वि बीभयत् ।
अभ्य् एनं वज्र आयसः सहस्रभृष्टिर् आयतार्चन्न् अनु स्वराज्यम् ॥ १ ०८० १२
यद् वृत्रं तव चाशनिं वज्रेण समयोधयः ।
अहिम् इन्द्र जिघांसतो दिवि ते बद्बधे शवो ऽर्चन्न् अनु स्वराज्यम् ॥ १ ०८० १३
अभिष्टने ते अद्रिवो यत् स्था जगच् च रेजते ।
त्वष्टा चित् तव मन्यव इन्द्र वेविज्यते भियार्चन्न् अनु स्वराज्यम् ॥ १ ०८० १४
नहि नु याद् अधीमसीन्द्रं को वीर्या परः ।
तस्मिन् नृम्णम् उत क्रतुं देवा ओजांसि सं दधुर् अर्चन्न् अनु स्वराज्यम् ॥ १ ०८० १५
याम् अथर्वा मनुष् पिता दध्यङ् धियम् अत्नत ।
तस्मिन् ब्रह्माणि पूर्वथेन्द्र उक्था सम् अग्मतार्चन्न् अनु स्वराज्यम् ॥ १ ०८० १६

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तम् इन् महत्स्व् आजिषूतेम् अर्भे हवामहे स वाजेषु प्र नो ऽविषत् ॥ १ ०८१ ०१
असि हि वीर सेन्यो ऽसि भूरि पराददिः ।
असि दभ्रस्य चिद् वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ १ ०८१ ०२
यद् उदीरत आजयो धृष्णवे धीयते धना ।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधो ऽस्माँ इन्द्र वसौ दधः ॥ १ ०८१ ०३
क्रत्वा महाँ अनुष्वधम् भीम आ वावृधे शवः ।
श्रिय ऋष्व उपाकयोर् नि शिप्री हरिवान् दधे हस्तयोर् वज्रम् आयसम् ॥ १ ०८१ ०४
आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।
न त्वावाँ इन्द्र कश् चन न जातो न जनिष्यते ऽति विश्वं ववक्षिथ ॥ १ ०८१ ०५
यो अर्यो मर्तभोजनम् पराददाति दाशुषे ।
इन्द्रो अस्मभ्यं शिक्षतु वि भजा भूरि ते वसु भक्षीय तव राधसः ॥ १ ०८१ ०६

मदे॑-म॒दे हि नो॑ द॒दिर् यू॒था गवा॑म् ऋजु॒क्रतुः॑ ।
सं गृ॑भाय पु॒रू श॒तोभ॑याह॒स्त्या वसु॑ शिशी॒हि रा॒य आ भ॑र ॥ १ ०८१ ०७
मा॒दय॑स्व सु॒ते सचा॒ शव॑से शू॒र राध॑से ।
वि॒द्मा हि त्वा॑ पुरु॒वसु॒म् उप॒ कामा॑न् ससृ॒ज्महे ऽथा॑ नो ऽवि॒ता भ॑व ॥ १ ०८१ ०८
ए॒ते त॑ इन्द्र ज॒न्तवो॒ विश्व॑म् पुष्यन्ति॒ वार्य॑म् ।
अ॒न्तर् हि ख्यो जना॑नाम् अ॒र्यो वेदो॒ अदा॑शुषां॒ तेषां॑ नो॒ वेद॒ आ भ॑र ॥ १ ०८१ ०९

उपो॒ षु शृ॑णु॒ही गिरो॒ मघ॑वन् मात॑था इव ।
य॒दा नः॑ सू॒नृता॑वतः॒ कर॒ आद् अ॒र्थया॑स॒ इद् योजा॑ न्व् ऐन्द्र ते॒ हरी॑ ॥ १ ०८२ ०१
अक्ष॒न्न् अमी॑मदन्त॒ ह्य् अव॑ प्रि॒या अ॑धूषत ।
अस्तो॑षत॒ स्वभा॑नवो॒ विप्रा॒ नवि॑ष्ठया म॒ती योजा॑ न्व् ऐन्द्र ते॒ हरी॑ ॥ १ ०८२ ०२
सु॒सं॒दृशं॑ त्वा व॒यम् मघ॑वन् वन्दिषी॒महि॑ ।
प्र नू॒नम् पू॒र्णव॑न्धुर स्तु॒तो या॑हि॒ वशाँ॒ अनु॒ योजा॑ न्व् ऐन्द्र ते॒ हरी॑ ॥ १ ०८२ ०३
स घा॒ तं वृष॑णं रथ॒म् अधि॑ तिष्ठाति गो॒विद॑म् ।
यः पात्रं॑ हारियोज॒नम् पू॒र्णम् इ॑न्द्र॒ चिके॑तति॒ योजा॑ न्व् ऐन्द्र ते॒ हरी॑ ॥ १ ०८२ ०४
यु॒क्तस् ते॑ अस्तु॒ दक्षि॑ण उ॒त स॒व्यः श॑तक्रतो ।
तेन॑ जा॒याम् उप॑ प्रि॒याम् म॑न्दा॒नो या॒ह्य् अन्ध॑सो॒ योजा॑ न्व् ऐन्द्र ते॒ हरी॑ ॥ १ ०८२ ०५
यु॒नज्मि॑ ते॒ ब्रह्म॑णा के॒शिना॒ हरी॒ उप॒ प्र या॑हि दधि॒षे गभ॑स्त्योः ।
उत् त्वा॑ सु॒तासो॑ र॒भसा अ॑मन्दिषुः पू॒षण्वा॑न् वज्रि॒न् सम् उ॒ पत्न्या॑मदः ॥ १ ०८२ ०६

अश्वा॑वति प्रथ॒मो गोषु॑ गच्छति सुप्रा॒वीर् इ॑न्द्र॒ मर्त्य॑स् तवो॒तिभिः॑ ।
तम् इत् पृ॑णक्षि॒ वसु॑ना॒ भवी॑यसा॒ सिन्धु॒म् आपो॒ यथा॒भितो॒ विचे॑तसः ॥ १ ०८३ ०१
आपो॒ न दे॒वीर् उप॑ यन्ति हो॒त्रिय॑म् अ॒वः प॑श्यन्ति॒ वित॑तं॒ यथा॒ रजः॑ ।
प्रा॒चैर् दे॒वासः॒ प्र ण॑यन्ति देव॒युम् ब्र॑ह्म॒प्रियं॑ जोषयन्ते व॒रा इ॑व ॥ १ ०८३ ०२
अधि॒ द्वयो॑र् अदधा उ॒क्थ्य१ं॒ वचो॑ य॒तस्रु॑चा मिथु॒ना या स॑प॒र्यतः॑ ।
अस॑यत्तो व्र॒ते ते॑ क्षेति॒ पुष्य॑ति भ॒द्रा श॒क्तिर् यज॑मानाय सुन्व॒ते ॥ १ ०८३ ०३

आद् अङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया ।
सर्वम् पणेः सम् अविन्दन्त भोजनम् अश्वावन्तं गोमन्तम् आ पशुं नरः ॥ १ ०८३ ०४
यज्ञैर् अथर्वा प्रथमः पथस् तते ततः सूर्यो व्रतपा वेन आजनि ।
आ गा आजद् उशना काव्यः सचा यमस्य जातम् अमृतं यजामहे ॥ १ ०८३ ०५
बर्हिर् वा यत् स्वपत्याय वृज्यते ऽर्को वा श्लोकम् आघोषते दिवि ।
ग्रावा यत्र वदति कारुर् उक्थ्य१स् तस्येद् इन्द्रो अभिपित्वेषु रण्यति ॥ १ ०८३ ०६

असावि सोम इन्द्र ते शविष्ठ धृष्णव् आ गहि ।
आ त्वा पृणक्त्व् इन्द्रियं रजः सूर्यो न रश्मिभिः ॥ १ ०८४ ०१
इन्द्रम् इद् धरी वहतो ऽप्रतिधृष्टशवसम् ।
ऋषीणां च स्तुतीर् उप यज्ञं च मानुषाणाम् ॥ १ ०८४ ०२
आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी ।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ १ ०८४ ०३
इमम् इन्द्र सुतम् पिब ज्येष्ठम् अमर्त्यम् मदम् ।
शुक्रस्य त्वाभ्य् अक्षरन् धारा ऋतस्य सादने ॥ १ ०८४ ०४
इन्द्राय नूनम् अर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुर् इन्दवो ज्येष्ठं नमस्यता सहः ॥ १ ०८४ ०५
नकिष् ट्वद् रथीतरो हरी यद् इन्द्र यच्छसे ।
नकिष् ट्वानु मज्मना नकिः स्वश्व आनशे ॥ १ ०८४ ०६
य एक इद् विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ १ ०८४ ०७
कदा मर्तम् अराधसम् पदा क्षुम्पम् इव स्फुरत् ।
कदा नः शुश्रवद् गिर इन्द्रो अङ्ग ॥ १ ०८४ ०८
यश् चिद् धि त्वा बहुभ्य आ सुतावाँ आविवासति ।
उग्रं तत् पत्यते शव इन्द्रो अङ्ग ॥ १ ०८४ ०९
स्वादोर् इत्था विषूवतो मध्वः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर् वृष्णा मदन्ति शोभसे वस्वीर् अनु स्वराज्यम् ॥ १ ०८४ १०

ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीर् अनु स्वराज्यम् ॥ १ ०८४ ११
ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
व्रतान्य् अस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीर् अनु स्वराज्यम् ॥ १ ०८४ १२
इन्द्रो दधीचो अस्थभिर् वृत्राण्य् अप्रतिष्कुतः ।
जघान नवतीर् नव ॥ १ ०८४ १३
इच्छन्न् अश्वस्य यच् छिरः पर्वतेष्व् अपश्रितम् ।
तद् विदच् छर्यणावति ॥ १ ०८४ १४
अत्राह गोर् अमन्वत नाम त्वष्टुर् अपीच्यम् ।
इत्था चन्द्रमसो गृहे ॥ १ ०८४ १५
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून् हृत्स्वसो मयोभून् य एषाम् भृत्याम् ऋणधत् स जीवात् ॥ १ ०८४ १६
क ईषते तुज्यते को बिभाय को मंसते सन्तम् इन्द्रं को अन्ति ।
कस् तोकाय क इभायोत राये ऽधि ब्रवत् तन्वे को जनाय ॥ १ ०८४ १७
को अग्निम् ईट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर् ध्रुवेभिः ।
कस्मै देवा आ वहान् आशु होम को मंसते वीतिहोत्रः सुदेवः ॥ १ ०८४ १८
त्वम् अङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वद् अन्यो मघवन्न् अस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ १ ०८४ १९
मा ते राधांसि मा त ऊतयो वसो ऽस्मान् कदा चना दभन् ।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥ १ ०८४ २०

प्र ये शुम्भन्ते जनयो न सप्तयो यामन् रुद्रस्य सूनवः सुदंससः ।
रोदसी हि मरुतश् चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः ॥ १ ०८५ ०१
त उक्षितासो महिमानम् आशत दिवि रुद्रासो अधि चक्रिरे सदः ।
अर्चन्तो अर्कं जनयन्त इन्द्रियम् अधि श्रियो दधिरे पृश्निमातरः ॥ १ ०८५ ०२
गोमातरो यच् छुभयन्ते अञ्जिभिस् तनूषु शुभ्रा दधिरे विरुक्मतः ।
बाधन्ते विश्वम् अभिमातिनम् अप वर्त्मान्य् एषाम् अनु रीयते घृतम् ॥ १ ०८५ ०३

वि ये भ्राजन्ते सुमखास ऋष्टिभिः प्रच्यावयन्तो अच्युता चिद् ओजसा ।
मनोजुवो यन् मरुतो रथेष्व् आ वृषव्रातासः पृषतीर् अयुग्ध्वम् ॥ १ ०८५ ०४
प्र यद् रथेषु पृषतीर् अयुग्ध्वं वाजे अद्रिम् मरुतो रंहयन्तः ।
उतारुषस्य वि ष्यन्ति धाराश् चर्मेवोदभिर् व्य् उन्दन्ति भूम ॥ १ ०८५ ०५
आ वो वहन्तु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः ।
सीदता बर्हिर् उरु वः सदस् कृतम् मादयध्वम् मरुतो मध्वो अन्धसः ॥ १ ०८५ ०६
ते ऽवर्धन्त स्वतवसो महित्वना नाकं तस्थुर् उरु चक्रिरे सदः ।
विष्णुर् यद् धावद् वृषणम् मदच्युतं वयो न सीदन्न् अधि बर्हिषि प्रिये ॥ १ ०८५ ०७
शूरा इवेद् युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे ।
भयन्ते विश्वा भुवना मरुद्भ्यो राजान इव त्वेषसंदृशो नरः ॥ १ ०८५ ०८
त्वष्टा यद् वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।
धत्त इन्द्रो नर्य् अपांसि कर्तवे ऽहन् वृत्रं निर् अपाम् औब्जद् अर्णवम् ॥ १ ०८५ ०९
ऊर्ध्वं नुनुद्रे ऽवतं त ओजसा दादृहाणं चिद् बिभिदुर् वि पर्वतम् ।
धमन्तो वाणम् मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥ १ ०८५ १०
जिह्मं नुनुद्रे ऽवतं तया दिशासिञ्चन्न् उत्सं गोतमाय तृष्णजे ।
आ गच्छन्तीम् अवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः ॥ १ ०८५ ११
या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।
अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥ १ ०८५ १२

मरुतो यस्य हि क्षये पाथा दिवो विमहसः ।
स सुगोपातमो जनः ॥ १ ०८६ ०१
यज्ञैर् वा यज्ञवाहसो विप्रस्य वा मतीनाम् ।
मरुतः शृणुता हवम् ॥ १ ०८६ ०२
उत वा यस्य वाजिनो ऽनु विप्रम् अतक्षत ।
स गन्ता गोमति व्रजे ॥ १ ०८६ ०३
अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु ।
उक्थम् मदश् च शस्यते ॥ १ ०८६ ०४

अस्य श्रोषन्त्व् आ भुवो विश्वा यश् चर्षणीर् अभि ।
सूरं चित् सस्रुषीर् इषः ॥ १ ०८६ ०५
पूर्वीभिर् हि ददाशिम शरद्भिर् मरुतो वयम् ।
अवोभिश् चर्षणीनाम् ॥ १ ०८६ ०६
सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः ।
यस्य प्रयांसि पर्षथ ॥ १ ०८६ ०७
शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।
विदा कामस्य वेनतः ॥ १ ०८६ ०८
यूयं तत् सत्यशवस आविष् कर्त महित्वना ।
विध्यता विद्युता रक्षः ॥ १ ०८६ ०९
गूहता गुह्यं तमो वि यात विश्वम् अत्रिणम् ।
ज्योतिष् कर्ता यद् उश्मसि ॥ १ ०८६ १०

प्रत्वक्षसः प्रतवसो विरप्शिनो ऽनानता अविथुरा ऋजीषिणः ।
जुष्टतमासो नृतमासो अञ्जिभिर् व्य् आनज्रे के चिद् उस्रा इव स्तृभिः ॥ १ ०८७ ०१
उपह्वरेषु यद् अचिध्वं ययिं वय इव मरुतः केन चित् पथा ।
श्चोतन्ति कोशा उप वो रथेष्व् आ घृतम् उक्षता मधुवर्णम् अर्चते ॥ १ ०८७ ०२
प्रैषाम् अज्मेषु विथुरेव रेजते भूमिर् यामेषु यद् ध युञ्जते शुभे ।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयम् महित्वम् पनयन्त धूतयः ॥ १ ०८७ ०३
स हि स्वसृत् पृषदश्वो युवा गणो ऽया ईशानस् तविषीभिर् आवृतः ।
असि सत्य ऋणयावानेद्यो ऽस्या धियः प्राविताथा वृषा गणः ॥ १ ०८७ ०४
पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा ।
यद् ईम् इन्द्रं शम्य् ऋक्वाण आशताद् इन् नामानि यज्ञियानि दधिरे ॥ १ ०८७ ०५
श्रियसे कम् भानुभिः सम् मिमिक्षिरे ते रश्मिभिस् त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥ १ ०८७ ०६

आ विद्युन्मद्भिर् मरुतः स्वर्कै रथेभिर् यात ऋष्टिमद्भिर् अश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥ १ ०८८ ०१
ते ऽरुणेभिर् वरम् आ पिशङ्गैः शुभे कं यान्ति रथतूर्भिर् अश्वैः ।
रुक्मो न चित्रः स्वधितीवान् पव्या रथस्य जङ्घनन्त भूम ॥ १ ०८८ ०२
श्रिये कं वो अधि तनूषु वाशीर् मेधा वना न कृणवन्त ऊर्ध्वा ।
युष्मभ्यं कम् मरुतः सुजातास् तुविद्युम्नासो धनयन्ते अद्रिम् ॥ १ ०८८ ०३
अहानि गृध्राः पर्य् आ व आगुर् इमां धियं वार्कार्यां च देवीम् ।
ब्रह्म कृण्वन्तो गोतमासो अर्कैर् ऊर्ध्वं नुनुद्र उत्सधिम् पिबध्यै ॥ १ ०८८ ०४
एतत् त्यन् न योजनम् अचेति सस्वर् ह यन् मरुतो गोतमो वः ।
पश्यन् हिरण्यचक्रान् अयोदंष्ट्रान् विधावतो वराहून् ॥ १ ०८८ ०५
एषा स्या वो मरुतो ऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।
अस्तोभयद् वृथासाम् अनु स्वधां गभस्त्योः ॥ १ ०८८ ०६

आ नो भद्राः क्रतवो यन्तु विश्वतो ऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदम् इद् वृधे असन्न् अप्रायुवो रक्षितारो दिवे-दिवे ॥ १ ०८९ ०१
देवानाम् भद्रा सुमतिर् ऋजूयतां देवानां रातिर् अभि नो नि वर्तताम् ।
देवानां सख्यम् उप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥ १ ०८९ ०२
तान् पूर्वया निविदा हूमहे वयम् भगम् मित्रम् अदितिं दक्षम् अस्रिधम् ।
अर्यमणं वरुणं सोमम् अश्विना सरस्वती नः सुभगा मयस् करत् ॥ १ ०८९ ०३
तन् नो वातो मयोभु वातु भेषजं तन् माता पृथिवी तत् पिता द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुवस् तद् अश्विना शृणुतं धिष्ण्या युवम् ॥ १ ०८९ ०४
तम् ईशानं जगतस् तस्थुषस् पतिं धियंजिन्वम् अवसे हूमहे वयम् ।
पूषा नो यथा वेदसाम् असद् वृधे रक्षिता पायुर् अदब्धः स्वस्तये ॥ १ ०८९ ०५
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस् तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर् दधातु ॥ १ ०८९ ०६
पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्न् इह ॥ १ ०८९ ०७

भद्रं कर्णेभिः शृणुयाम देवा भद्रम् पश्येमाक्षभिर् यजत्राः ।
स्थिरैर् अङ्गैस् तुष्टुवांसस् तनूभिर् व्य् अशेम देवहितं यद् आयुः ॥ १ ०८९ ०८
शतम् इन् नु शरदो अन्ति देवा यत्रा नश् चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर् गन्तोः ॥ १ ०८९ ०९
अदितिर् द्यौर् अदितिर् अन्तरिक्षम् अदितिर् माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर् जातम् अदितिर् जनित्वम् ॥ १ ०८९ १०

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् ।
अर्यमा देवैः सजोषाः ॥ १ ०९० ०१
ते हि वस्वो वसवानास् ते अप्रमूरा महोभिः ।
व्रता रक्षन्ते विश्वाहा ॥ १ ०९० ०२
ते अस्मभ्यं शर्म यंसन्न् अमृता मर्त्येभ्यः ।
बाधमाना अप द्विषः ॥ १ ०९० ०३
वि नः पथः सुविताय चियन्त्व् इन्द्रो मरुतः ।
पूषा भगो वन्द्यासः ॥ १ ०९० ०४
उत नो धियो गोअग्राः पूषन् विष्णव् एवयावः ।
कर्ता नः स्वस्तिमतः ॥ १ ०९० ०५
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर् नः सन्त्व् ओषधीः ॥ १ ०९० ०६
मधु नक्तम् उतोषसो मधुमत् पार्थिवं रजः ।
मधु द्यौर् अस्तु नः पिता ॥ १ ०९० ०७
मधुमान् नो वनस्पतिर् मधुमाँ अस्तु सूर्यः ।
माध्वीर् गावो भवन्तु नः ॥ १ ०९० ०८
शं नो मित्रः शं वरुणः शं नो भवत्व् अर्यमा ।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुर् उरुक्रमः ॥ १ ०९० ०९

त्वं सो॑म॒ प्र चि॑कितो मनी॒षा त्वं रजि॑ष्ठ॒म् अनु॑ नेषि॒ पन्था॑म् ।
तव॒ प्रणी॑ती पि॒तरो॑ न इन्दो दे॒वेषु॒ रत्न॑म् अभजन्त॒ धीराः॑ ॥ १ ०९१ ०१
त्वं सो॑म॒ क्रतु॑भिः सु॒क्रतु॑र् भू॒स् त्वं दक्षैः॑ सु॒दक्षो॑ वि॒श्ववे॑दाः ।
त्वं वृषा॑ वृ॒षत्वेभि॑र् महि॒त्वा द्यु॒म्नेभि॑र् द्यु॒म्न्य् अभवो नृ॒चक्षाः॑ ॥ १ ०९१ ०२
राज्ञो॒ नु ते॒ वरु॑णस्य व्र॒तानि॑ बृ॒हद् ग॑भी॒रं तव॑ सोम॒ धाम॑ ।
शुचि॒ष् ट्वम् अ॑सि प्रि॒यो न मि॒त्रो द॒क्षाय्यो॑ अर्य॒मेवा॑सि सोम ॥ १ ०९१ ०३
या ते॒ धामा॑नि दि॒वि या पृ॑थि॒व्यां या पर्व॑ते॒ष्व् ओष॑धीष्व् अ॒प्सु ।
तेभि॑र् नो॒ विश्वैः॑ सु॒मना॒ अहे॑ळन् राज॑न् सोम॒ प्रति॑ ह॒व्या गृ॑भाय ॥ १ ०९१ ०४
त्वं सो॑मासि॒ सत्प॑ति॒स् त्वं राजो॒त वृ॑त्र॒हा ।
त्वम् भ॒द्रो अ॑सि॒ क्रतुः॑ ॥ १ ०९१ ०५
त्वं च॑ सोम नो॒ वशो॑ जी॒वातुं॒ न म॑रामहे ।
प्रि॒यस्तो॑त्रो॒ वन॒स्पतिः॑ ॥ १ ०९१ ०६
त्वं सो॑म म॒हे भगं॒ त्वं यून॑ ऋताय॒ते ।
दक्षं॑ दधासि जी॒वसे॑ ॥ १ ०९१ ०७
त्वं नः॑ सोम वि॒श्वतो॒ रक्षा॑ राजन्न् अघाय॒तः ।
न रि॑ष्ये॒त् त्वाव॑तः॒ सखा॑ ॥ १ ०९१ ०८
सोम॒ यास् ते॑ मयो॒भुव॑ ऊ॒तयः॒ सन्ति॑ दा॒शुषे॑ ।
ताभि॑र् नो ऽवि॒ता भ॑व ॥ १ ०९१ ०९
इ॒मं य॒ज्ञम् इ॒दं वचो॑ जुजु॒षा॒ण उ॒पाग॑हि ।
सोम॒ त्वं नो॑ वृ॒धे भ॑व ॥ १ ०९१ १०
सोम॑ गी॒र्भिष् ट्वा॑ व॒यं व॒र्धया॑मो वचो॒विदः॑ ।
सु॒मृ॒ळी॒को न॒ आ वि॑श ॥ १ ०९१ ११
ग॒य॒स्फानो॑ अमीव॒हा व॑सु॒वित् पु॑ष्टि॒वर्ध॑नः ।
सु॒मि॒त्रः सो॑म नो भव ॥ १ ०९१ १२
सोम॑ रार॒न्धि नो॑ हृ॒दि गावो॒ न यव॑से॒ष्व् आ ।
मर्य॑ इव॒ स्व ओ॒क्ये ॥ १ ०९१ १३
यः सो॑म स॒ख्ये तव॑ रा॒रण॑द् देव॒ मर्त्यः॑ ।
तं दक्षः॑ सचते क॒विः ॥ १ ०९१ १४

उरुष्या णो अभिशस्तेः सोम नि पाह्य् अंहसः ।
सखा सुशेव एधि नः ॥ १ ०९१ १५
आ प्यायस्व सम् एतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य संगथे ॥ १ ०९१ १६
आ प्यायस्व मदिन्तम सोम विश्वेभिर् अंशुभिः ।
भवा नः सुश्रवस्तमः सखा वृधे ॥ १ ०९१ १७
सं ते पयांसि सम् उ यन्तु वाजाः सं वृष्ण्यान्य् अभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्य् उत्तमानि धिष्व ॥ १ ०९१ १८
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूर् अस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरो ऽवीरहा प्र चरा सोम दुर्यान् ॥ १ ०९१ १९
सोमो धेनुं सोमो अर्वन्तम् आशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयम् पितृश्रवणं यो ददाशद् अस्मै ॥ १ ०९१ २०
अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षाम् अप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वाम् अनु मदेम सोम ॥ १ ०९१ २१
त्वम् इमा ओषधीः सोम विश्वास् त्वम् अपो अजनयस् त्वं गाः ।
त्वम् आ ततन्थोर्व् अ १ न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ १ ०९१ २२
देवेन नो मनसा देव सोम रायो भागं सहसावन्न् अभि युध्य ।
मा त्वा तनद् ईशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥ १ ०९१ २३

एता उ त्या उषसः केतुम् अक्रत पूर्वे अर्धे रजसो भानुम् अञ्जते ।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावो ऽरुषीर् यन्ति मातरः ॥ १ ०९२ ०१
उद् अपप्तन्न् अरुणा भानवो वृथा स्वायुजो अरुषीर् गा अयुक्षत ।
अक्रन्न् उषासो वयुनानि पूर्वथा रुशन्तम् भानुम् अरुषीर् अशिश्रयुः ॥ १ ०९२ ०२
अर्चन्ति नारीर् अपसो न विष्टिभिः समानेन योजनेना परावतः ।
इषं वहन्तीः सुकृते सुदानवे विश्वेद् अह यजमानाय सुन्वते ॥ १ ०९२ ०३
अधि पेशांसि वपते नृतूर् इवापोर्णुते वक्ष उस्रेव बर्जहम् ।
ज्योतिर् विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्य् उ १ षा आवर् तमः ॥ १ ०९२ ०४

प्रत्य् अर्ची रुशद् अस्या अदर्शि वि तिष्ठते बाधते कृष्णम् अभ्वम् ।
स्वरुं न पेशो विदथेष्व् अञ्जञ् चित्रं दिवो दुहिता भानुम् अश्रेत् ॥ १ ०९२ ०५
अतारिष्म तमसस् पारम् अस्योषा उच्छन्ती वयुना कृणोति ।
श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥ १ ०९२ ०६
भास्वती नेत्री सूनृतानां दिव स्तवे दुहिता गोतमेभिः ।
प्रजावतो नृवतो अश्वबुध्यान् उषो गोअग्राँ उप मासि वाजान् ॥ १ ०९२ ०७
उषस् तम् अश्यां यशसं सुवीरं दासप्रवर्गं रयिम् अश्वबुध्यम् ।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहन्तम् ॥ १ ०९२ ०८
विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुर् उर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती विश्वस्य वाचम् अविदन् मनायोः ॥ १ ०९२ ०९
पुनः-पुनर् जायमाना पुराणी समानं वर्णम् अभि शुम्भमाना ।
श्वघ्नीव कृत्नुर् विज आमिनाना मर्तस्य देवी जरयन्त्य् आयुः ॥ १ ०९२ १०
व्यूर्ण्वती दिवो अन्ताँ अबोध्य् अप स्वसारं सनुतर् युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥ १ ०९२ ११
पशून् न चित्रा सुभगा प्रथाना सिन्धुर् न क्षोद उर्विया व्य् अश्वैत् ।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर् दृशाना ॥ १ ०९२ १२
उषस् तच् चित्रम् आ भरास्मभ्यं वाजिनीवति ।
येन तोकं च तनयं च धामहे ॥ १ ०९२ १३
उषो अद्येह गोमत्य् अश्वावति विभावरि ।
रेवद् अस्मे व्य् उच्छ सूनृतावति ॥ १ ०९२ १४
युक्ष्वा हि वाजिनीवत्य् अश्वाँ अद्यारुणाँ उषः ।
अथा नो विश्वा सौभगान्य् आ वह ॥ १ ०९२ १५
अश्विना वर्तिर् अस्मद् आ गोमद् दस्रा हिरण्यवत् ।
अर्वाग् रथं समनसा नि यच्छतम् ॥ १ ०९२ १६
याव् इत्था श्लोकम् आ दिवो ज्योतिर् जनाय चक्रथुः ।
आ न ऊर्जं वहतम् अश्विना युवम् ॥ १ ०९२ १७
एह देवा मयोभुवा दस्रा हिरण्यवर्तनी ।
उषर्बुधो वहन्तु सोमपीतये ॥ १ ०९२ १८

अग्नी॑षोमाव् इ॒मं सु मे॑ शृणु॒तं वृ॑षणा॒ हव॑म् ।
प्रति॑ सू॒क्तानि॑ हर्य॒तम् भव॑तं दा॒शुषे॒ मयः॑ ॥ १ ०९३ ०१
अग्नी॑षोमा॒ यो अ॒द्य वा॑म् इ॒दं वचः॑ सप॒र्यति॑ ।
तस्मै॑ धत्तं सु॒वीर्यं॑ गवा॒म् पोषं॒ स्वश्व्य॑म् ॥ १ ०९३ ०२
अग्नी॑षोमा॒ य आहु॑तिं॒ यो वां॒ दाशा॑द् ध॒विष्कृ॑तिम् ।
स प्र॒जया॑ सु॒वीर्यं॒ विश्व॒म् आयु॒र् व्य् अश्नवत् ॥ १ ०९३ ०३
अग्नी॑षोमा॒ चेति॒ तद् वी॒र्यं॑ वां॒ यद् अमु॑ष्णीतम् अव॒सम् प॒णिं गाः ।
अवा॑तिरतम् बृस॑यस्य॒ शेषो ऽवि॑न्दतं॒ ज्योति॒र् एक॑म् ब॒हुभ्यः॑ ॥ १ ०९३ ०४
यु॒वम् ए॒तानि॑ दि॒वि रो॑च॒नान्य् अ॒ग्निश् च॑ सोम॒ सक्र॑तू अधत्तम् ।
यु॒वं सिन्धूँ॑र् अ॒भिश॑स्तेर् अव॒द्याद् अग्नी॑षोमा॒व् अमु॑ञ्चतं गृभी॒तान् ॥ १ ०९३ ०५
आन्यं दि॒वो मा॑त॒रिश्वा॑ जभा॒राम॑थ्नाद् अ॒न्यम् परि॑ श्ये॒नो अद्रेः॑ ।
अग्नी॑षोमा॒ ब्रह्म॑णा वावृधा॒नोरुं य॒ज्ञाय॑ चक्रथुर् उ॒लोक॑म् ॥ १ ०९३ ०६
अग्नी॑षोमा ह॒विषः॒ प्रस्थि॑तस्य वी॒तं हर्य॑तं वृषणा जु॒षेथा॑म् ।
सु॒शर्मा॑णा॒ स्वव॑सा॒ हि भू॒तम् अथा॑ धत्तं॒ यज॑माना॒य शं योः ॥ १ ०९३ ०७
यो अ॒ग्नीषोमा॑ ह॒विषा॑ सप॒र्याद् दे॑व॒द्रीचा॒ मन॑सा॒ यो घृ॒तेन॑ ।
तस्य॑ व्र॒तं र॑क्षतम् पा॒तम् अंह॑सो वि॒शे जना॑य॒ महि॒ शर्म॑ यच्छतम् ॥ १ ०९३ ०८
अग्नी॑षोमा॒ सवे॑दसा॒ सहू॑ती वनतं॒ गिरः॑ ।
सं दे॑व॒त्रा ब॑भूवथुः ॥ १ ०९३ ०९
अग्नी॑षोमाव् अ॒नेन॑ वां॒ यो वां॑ घृ॒तेन॒ दाश॑ति ।
तस्मै॑ दीदयतम् बृ॒हत् ॥ १ ०९३ १०
अग्नी॑षोमाव् इ॒मानि॑ नो यु॒वं ह॒व्या जु॑जोषतम् ।
आ या॑त॒म् उप॑ नः॒ सचा॑ ॥ १ ०९३ ११
अग्नी॑षोमा पिपृ॒तम् अर्व॑तो न॒ आ प्या॑यन्ताम् उ॒स्रिया॑ हव्य॒सूदः॑ ।
अ॒स्मे बला॑नि म॒घव॑त्सु धत्तं कृणु॒तं नो॑ अध्व॒रं श्रु॑ष्टि॒मन्त॑म् ॥ १ ०९३ १२

इमं स्तोमम् अर्हते जातवेदसे रथम् इव सम् महेमा मनीषया ।
भद्रा हि नः प्रमतिर् अस्य संसद्य् अग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ०१
यस्मै त्वम् आयजसे स साधत्य् अनर्वा क्षेति दधते सुवीर्यम् ।
स तूताव नैनम् अश्नोत्य् अंहतिर् अग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ०२
शकेम त्वा समिधं साधया धियस् त्वे देवा हविर् अदन्त्य् आहुतम् ।
त्वम् आदित्याँ आ वह तान् ह्य् उ१ श्मस्य् अग्ने सख्ये मा रिषामा वयं तव ॥ १
०९४ ०३
भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणा-पर्वणा वयम् ।
जीवातवे प्रतरं साधया धियो ऽग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ०४
विशां गोपा अस्य चरन्ति जन्तवो द्विपच् च यद् उत चतुष्पद् अक्तुभिः ।
चित्रः प्रकेत उषसो महाँ अस्य् अग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ०५
त्वम् अध्वर्युर् उत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्य् अग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ०६
यो विश्वतः सुप्रतीकः सदृङ्ङ् असि दूरे चित् सन् तळिद् इवाति रोचसे ।
रात्र्याश् चिद् अन्धो अति देव पश्यस्य् अग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४
०७
पूर्वो देवा भवतु सुन्वतो रथो ऽस्माकं शंसो अभ्य् अस्तु दूढ्यः ।
तद् आ जानीतोत पुष्यता वचो ऽग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ०८
वधैर् दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिद् अत्रिणः ।
अथा यज्ञाय गृणते सुगं कृध्य् अग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ०९
यद् अयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।
आद् इन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ १०
अध स्वनाद् उत बिभ्युः पतत्रिणो द्रप्सा यत् ते यवसादो व्य् अस्थिरन् ।
सुगं तत् ते तावकेभ्यो रथेभ्यो ऽग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ ११
अयम् मित्रस्य वरुणस्य धायसे ऽवयाताम् मरुतां हेळो अद्भुतः ।
मृळा सु नो भूत्व् एषाम् मनः पुनर् अग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ १२
देवो देवानाम् असि मित्रो अद्भुतो वसुर् वसूनाम् असि चारुर् अध्वरे ।
शर्मन् स्याम तव सप्रथस्तमे ऽग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ १३

तत् ते भद्रं यत् समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ।
दधासि रत्नं द्रविणं च दाशुषे ऽग्ने सख्ये मा रिषामा वयं तव ॥ १ ०९४ १४
यस्मै त्वं सुद्रविणो ददाशो ऽनागास्त्वम् अदिते सर्वताता ।
यम् भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥ १ ०९४ १५
स त्वम् अग्ने सौभगत्वस्य विद्वान् अस्माकम् आयुः प्र तिरेह देव ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ०९४ १६

द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्सम् उप धापयेते ।
हरिर् अन्यस्याम् भवति स्वधावाञ् छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥ १ ०९५ ०१
दशेमं त्वष्टुर् जनयन्त गर्भम् अतन्द्रासो युवतयो विभृत्रम् ।
तिग्मानीकं स्वयशसं जनेषु विरोचमानम् परि षीं नयन्ति ॥ १ ०९५ ०२
त्रीणि जाना परि भूषन्त्य् अस्य समुद्र एकं दिव्य् एकम् अप्सु ।
पूर्वाम् अनु प्र दिशम् पार्थिवानाम् ऋतून् प्रशासद् वि दधाव् अनुष्ठु ॥ १ ०९५ ०३
क इमं वो निण्यम् आ चिकेत वत्सो मातॄर् जनयत स्वधाभिः ।
बह्वीनां गर्भो अपसाम् उपस्थान् महान् कविर् निश् चरति स्वधावान् ॥ १ ०९५ ०४
आविष्ट्यो वर्धते चारुर् आसु जिह्मानाम् ऊर्ध्वः स्वयशा उपस्थे ।
उभे त्वष्टुर् बिभ्यतुर् जायमानात् प्रतीची सिंहम् प्रति जोषयेते ॥ १ ०९५ ०५
उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुर् एवैः ।
स दक्षाणां दक्षपतिर् बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः ॥ १ ०९५ ०६
उद् यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् ।
उच् छुक्रम् अत्कम् अजते सिमस्मान् नवा मातृभ्यो वसना जहाति ॥ १ ०९५ ०७
त्वेषं रूपं कृणुत उत्तरं यत् सम्पृञ्चानः सदने गोभिर् अद्भिः ।
कविर् बुध्नम् परि मर्मृज्यते धीः सा देवताता समितिर् बभूव ॥ १ ०९५ ०८
उरु ते ज्रयः पर्य् एति बुध्नं विरोचमानम् महिषस्य धाम ।

विश्वेभिर् अग्ने स्वयशोभिर् इद्धो ऽदब्धेभिः पायुभिः पाह्य् अस्मान् ॥ १ ०९५ ०९
धन्वन् स्रोतः कृणुते गातुम् ऊर्मिं शुक्रैर् ऊर्मिभिर् अभि नक्षति क्षाम् ।
विश्वा सनानि जठरेषु धत्ते ऽन्तर् नवासु चरति प्रसूषु ॥ १ ०९५ १०
एवा नो अग्ने समिधा वृधानो रेवत् पावक श्रवसे वि भाहि ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ०९५ ११

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळ् अधत्त विश्वा ।
आपश् च मित्रं धिषणा च साधन् देवा अग्निं धारयन् द्रविणोदाम् ॥ १ ०९६ ०१
स पूर्वया निविदा कव्यतायोर् इमाः प्रजा अजनयन् मनूनाम् ।
विवस्वता चक्षसा द्याम् अपश् च देवा अग्निं धारयन् द्रविणोदाम् ॥ १ ०९६ ०२
तम् ईळत प्रथमं यज्ञसाधं विश आरीर् आहुतम् ऋञ्जसानम् ।
ऊर्जः पुत्रम् भरतं सृप्रदानुं देवा अग्निं धारयन् द्रविणोदाम् ॥ १ ०९६ ०३
स मातरिश्वा पुरुवारपुष्टिर् विदद् गातुं तनयाय स्वर्वित् ।
विशां गोपा जनिता रोदस्योर् देवा अग्निं धारयन् द्रविणोदाम् ॥ १ ०९६ ०४
नक्तोषासा वर्णम् आमेम्याने धापयेते शिशुम् एकं समीची ।
द्यावाक्षामा रुक्मो अन्तर् वि भाति देवा अग्निं धारयन् द्रविणोदाम् ॥ १ ०९६ ०५
रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर् मन्मसाधनो वेः ।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन् द्रविणोदाम् ॥ १ ०९६ ०६
नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् ।
सतश् च गोपाम् भवतश् च भूरेर् देवा अग्निं धारयन् द्रविणोदाम् ॥ १ ०९६ ०७
द्रविणोदा द्रविणसस् तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।
द्रविणोदा वीरवतीम् इषं नो द्रविणोदा रासते दीर्घम् आयुः ॥ १ ०९६ ०८
एवा नो अग्ने समिधा वृधानो रेवत् पावक श्रवसे वि भाहि ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ०९६ ०९

अप नः शोशुचद् अघम् अग्ने शुशुग्ध्य् आ रयिम् ।

अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०१
सु॒क्षे॒त्रि॒या सु॑गातु॒या व॑सू॒या च॑ यजामहे ।
अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०२
प्र यद् भन्दि॑ष्ठ एषा॒म् प्रास्माका॑सश् च सू॒रयः॑ ।
अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०३
प्र यत् ते॑ अग्ने सू॒रयो॒ जाये॑महि॒ प्र ते॑ व॒यम् ।
अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०४
प्र यद् अ॒ग्नेः सह॑स्वतो वि॒श्वतो॒ यन्ति॑ भा॒नवः॑ ।
अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०५
त्वं हि वि॑श्वतोमुख वि॒श्वतः॑ परि॒भूर् असि॑ ।
अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०६
द्विषो॑ नो विश्वतोमु॒खाति॑ ना॒वेव॑ पारय ।
अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०७
स नः॒ सिन्धु॑म् इव ना॒वयाति॑ पर्षा स्व॒स्तये॑ ।
अप॑ नः॒ शोशु॑चद् अ॒घम् ॥ १ ०९७ ०८

वै॒श्वा॒नरस्य॑ सु॒मतौ स्या॑म॒ राजा॒ हि क॒म् भुव॑नानाम् अभि॒श्रीः ।
इ॒तो जा॒तो विश्व॑म् इ॒दं वि च॑ष्टे वैश्वा॒नरो य॑तते॒ सूर्ये॑ण ॥ १ ०९८ ०१
पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्याम् पृ॒ष्टो विश्वा॒ ओष॑धी॒र् आ वि॑वेश ।
वै॒श्वा॒नरः सह॑सा पृ॒ष्टो अ॒ग्निः स नो॒ दिवा॒ स रि॒षः पा॑तु॒ नक्त॑म् ॥ १ ०९८ ०२
वैश्वा॑नर॒ तव॒ तत् स॒त्यम् अ॑स्त्व् अ॒स्मान् रायो॑ म॒घवा॑नः सचन्ताम् ।
तन् नो॑ मि॒त्रो वरु॑णो मामहन्ता॒म् अदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥ १ ०९८ ०३

जा॒तवे॑दसे सुनवा॒म सोम॑म् अरातीय॒तो नि द॑हाति॒ वेदः॑ ।
स नः॑ पर्ष॒द् अति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिन्धुं॑ दु॒रि॒तात्य् अ॒ग्निः ॥ १ ०९९ ०१

स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश् च सम्राट् ।
सतीनसत्वा हव्यो भरेषु मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०१
यस्यानाप्तः सूर्यस्येव यामो भरे-भरे वृत्रहा शुष्मो अस्ति ।
वृषन्तमः सखिभिः स्वेभिर् एवैर् मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०२
दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः ।
तरद्द्वेषाः सासहिः पौंस्येभिर् मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०३
सो अङ्गिरोभिर् अङ्गिरस्तमो भूद् वृषा वृषभिः सखिभिः सखा सन् ।
ऋग्मिभिर् ऋग्मी गातुभिर् ज्येष्ठो मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०४
स सूनुभिर् न रुद्रेभिर् ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान् ।
सनीळेभिः श्रवस्यानि तूर्वन् मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०५
स मन्युमीः समदनस्य कर्तास्माकेभिर् नृभिः सूर्यं सनत् ।
अस्मिन्न् अहन् सत्पतिः पुरुहूतो मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०६
तम् ऊतयो रणयञ् छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम् ।
स विश्वस्य करुणस्येश एको मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०७
तम् अप्सन्त शवस उत्सवेषु नरो नरम् अवसे तं धनाय ।
सो अन्धे चित् तमसि ज्योतिर् विदन् मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०८
स सव्येन यमति व्राधतश् चित् स दक्षिणे संगृभीता कृतानि ।
स कीरिणा चित् सनिता धनानि मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ०९
स ग्रामेभिः सनिता स रथेभिर् विदे विश्वाभिः कृष्टिभिर् न्व् अ १ द्य ।
स पौंस्येभिर् अभिभूर् अशस्तीर् मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० १०
स जामिभिर् यत् समजाति मीळ्हे ऽजामिभिर् वा पुरुहूत एवैः ।
अपां तोकस्य तनयस्य जेषे मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० ११
स वज्रभृद् दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा ।
चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० १२
तस्य वज्रः क्रन्दति स्मत् स्वर्षा दिवो न त्वेषो रवथः शिमीवान् ।
तं सचन्ते सनयस् तं धनानि मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० १३
यस्याजस्रं शवसा मानम् उक्थम् परिभुजद् रोदसी विश्वतः सीम् ।

स पारिषत् क्रतुभिर् मन्दसानो मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० १४
न यस्य देवा देवता न मर्ता आपश् चन शवसो अन्तम् आपुः ।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश् च मरुत्वान् नो भवत्व् इन्द्र ऊती ॥ १ १०० १५
रोहिच् छ्यावा सुमदंशुर् ललामीर् द्युक्षा राय ऋज्राश्वस्य ।
वृषण्वन्तम् बिभ्रती धूर्षु रथम् मन्द्रा चिकेत नाहुषीषु विक्षु ॥ १ १०० १६
एतत् त्यत् त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः ।
ऋज्राश्वः प्रष्टिभिर् अम्बरीषः सहदेवो भयमानः सुराधाः ॥ १ १०० १७
दस्यूञ् छिम्यूंश् च पुरुहूत एवैर् हत्वा पृथिव्यां शर्वा नि बर्हीत् ।
सनत् क्षेत्रं सखिभिः श्वित्न्येभिः सनत् सूर्यं सनद् अपः सुवज्रः ॥ १ १०० १८
विश्वाहेन्द्रो अधिवक्ता नो अस्त्व् अपरिह्वृताः सनुयाम वाजम् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ १०० १९

प्र मन्दिने पितुमद् अर्चता वचो यः कृष्णगर्भा निरहन्न् ऋजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणम् मरुत्वन्तं सख्याय हवामहे ॥ १ १०१ ०१
यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन् पिप्रुम् अव्रतम् ।
इन्द्रो यः शुष्णम् अशुषं न्य् आवृणङ् मरुत्वन्तं सख्याय हवामहे ॥ १ १०१ ०२
यस्य द्यावापृथिवी पौंस्यम् महद् यस्य व्रते वरुणो यस्य सूर्यः ।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतम् मरुत्वन्तं सख्याय हवामहे ॥ १ १०१ ०३
यो अश्वानां यो गवां गोपतिर् वशी य आरितः कर्मणि-कर्मणि स्थिरः ।
वीळोश् चिद् इन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ॥ १ १०१ ०४
यो विश्वस्य जगतः प्राणतस् पतिर् यो ब्रह्मणे प्रथमो गा अविन्दत् ।
इन्द्रो यो दस्यूṃर् अधराँ अवातिरन् मरुत्वन्तं सख्याय हवामहे ॥ १ १०१ ०५
यः शूरेभिर् हव्यो यश् च भीरुभिर् यो धावद्भिर् हूयते यश् च जिग्युभिः ।
इन्द्रं यं विश्वा भुवनाभि संदधुर् मरुत्वन्तं सख्याय हवामहे ॥ १ १०१ ०६
रुद्राणाम् एति प्रदिशा विचक्षणो रुद्रेभिर् योषा तनुते पृथु ज्रयः ।
इन्द्रम् मनीषा अभ्य् अर्चति श्रुतम् मरुत्वन्तं सख्याय हवामहे ॥ १ १०१ ०७
यद् वा मरुत्वः परमे सधस्थे यद् वावमे वृजने मादयासे ।

अत आ याह्य अध्वरं नो अच्छा त्वाया हविश् चकृमा सत्यराधः ॥ १ १०१ ०८
त्वायेन्द्र सोमं सुषुमा सुदक्ष त्वाया हविश् चकृमा ब्रह्मवाहः ।
अधा नियुत्वः सगणो मरुद्भिर् अस्मिन् यज्ञे बर्हिषि मादयस्व ॥ १ १०१ ०९
मादयस्व हरिभिर् ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने ।
आ त्वा सुशिप्र हरयो वहन्तूशन् हव्यानि प्रति नो जुषस्व ॥ १ १०१ १०
मरुत्स्तोत्रस्य वृजनस्य गोपा वयम् इन्द्रेण सनुयाम वाजम् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ १०१ ११

इमां ते धियम् प्र भरे महो महीम् अस्य स्तोत्रे धिषणा यत् त आनजे ।
तम् उत्सवे च प्रसवे च सासहिम् इन्द्रं देवासः शवसामदन्न् अनु ॥ १ १०२ ०१
अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।
अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कम् इन्द्र चरतो वितर्तुरम् ॥ १ १०२ ०२
तं स्मा रथम् मघवन् प्राव सातये जैत्रं यं ते अनुमदाम संगमे ।
आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ् छर्म यच्छ नः ॥ १ १०२ ०३
वयं जयेम त्वया युजा वृतम् अस्माकम् अंशम् उद् अवा भरे-भरे ।
अस्मभ्यम् इन्द्र वरिवः सुगं कृधि प्र शत्रूणाम् मघवन् वृष्ण्या रुज ॥ १ १०२ ०४
नाना हि त्वा हवमाना जना इमे धनानां धर्तर् अवसा विपन्यवः ।
अस्माकं स्मा रथम् आ तिष्ठ सातये जैत्रं हीन्द्र निभृतम् मनस् तव ॥ १ १०२ ०५
गोजिता बाहू अमितक्रतुः सिमः कर्मन्-कर्मञ् छतमूतिः खजंकरः ।
अकल्प इन्द्रः प्रतिमानम् ओजसाथा जना वि ह्वयन्ते सिषासवः ॥ १ १०२ ०६
उत् ते शतान् मघवन्न् उच् च भूयस उत् सहस्राद् रिरिचे कृष्टिषु श्रवः ।
अमात्रं त्वा धिषणा तित्विषे मह्य् अधा वृत्राणि जिघ्नसे पुरंदर ॥ १ १०२ ०७
त्रिविष्टिधातु प्रतिमानम् ओजसस् तिस्रो भूमीर् नृपते त्रीणि रोचना ।
अतीदं विश्वम् भुवनं ववक्षिथाशत्रुर् इन्द्र जनुषा सनाद् असि ॥ १ १०२ ०८
त्वां देवेषु प्रथमं हवामहे त्वम् बभूथ पृतनासु सासहिः ।
सेमं नः कारुम् उपमन्युम् उद्भिदम् इन्द्रः कृणोतु प्रसवे रथम् पुरः ॥ १ १०२ ०९
त्वं जिगेथ न धना रुरोधिथार्भेष्व् आजा मघवन् महत्सु च ।

त्वाम् उ॒ग्रम् अव॑से॒ सं शि॑शीम॒स्य् अथा॑ न इन्द्र॒ हव॑नेषु चोदय ॥ १ १०२ १०
वि॒श्वाहेन्द्रो॑ अधिव॒क्ता नो॑ अ॒स्त्व् अप॑रिह्वृताः सनुयाम॒ वाज॑म् ।
तन् नो॑ मि॒त्रो वरु॑णो मामहन्ता॒म् अदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥ १ १०२ ११

तत् त॑ इन्द्रि॒यम् प॑र॒मम् प॑रा॒चैर् अधा॑रयन्त क॒वयः॑ पु॒रेदम् ।
क्ष॒मेदम् अ॒न्यद् दि॒व्य् अ १॒ न्यद् अ॑स्य॒ सम् ई॑ पृच्यते सम॒नेव॑ के॒तुः ॥ १ १०३ ०१
स धा॑रयत् पृथि॒वीम् प॒प्रथ॑च् च॒ वज्रे॑ण ह॒त्वा निर् अ॒पः स॑सर्ज ।
अह॒न्न् अहि॒म् अभि॑नद् रौहि॒णं व्य् अह॒न् व्यंसम् म॒घवा॒ शची॑भिः ॥ १ १०३ ०२
स जा॒तूभ॑र्मा श्र॒द्दधा॑न॒ ओजः॒ पुरो॑ विभि॒न्दन्न् अच॑र॒द् वि दासीः॑ ।
वि॒द्वान् व॑ज्रि॒न् दस्य॑वे हे॒तिम् अ॒स्यार्य॒ं सहो॑ वर्धया द्यु॒म्नम् इ॑न्द्र ॥ १ १०३ ०३
तद् ऊ॒चुषे॒ मानु॑षे॒मा यु॒गानि॑ की॒र्तेन्य॑म् म॒घवा॒ नाम॒ बिभ्र॑त् ।
उ॒प॒प्र॒यन् द॑स्युह॒त्याय॑ व॒ज्री यद् ध॑ सू॒नुः श्रव॑से॒ नाम॑ द॒धे ॥ १ १०३ ०४
तद् अ॑स्ये॒दम् प॑श्यता॒ भूरि॑ पु॒ष्टं श्रद् इन्द्र॑स्य धत्तन वी॒र्या॑य ।
स गा अ॑वि॒न्दत् सो अ॑विन्द॒द् अश्वा॒न् स ओष॑धीः॒ सो अ॒पः स वना॑नि ॥ १ १०३ ०५
भूरि॑कर्मणे वृ॒षभा॒य वृष्णे॑ स॒त्यशु॑ष्माय सुनवा॒म सोम॑म् ।
य आ॒दृत्या॑ परिप॒न्थीव॒ शूरो ऽय॑ज्वनो वि॒भज॒न्न् एति॒ वेदः॑ ॥ १ १०३ ०६
तद् इ॑न्द्र॒ प्रेव॑ वी॒र्यं॑ चक॒र्थ यत् स॒सन्तं॒ वज्रे॒णाबो॑धयो॒ ऽहि॑म् ।
अनु॑ त्वा॒ पत्नी॑र् हृषि॒तं वय॑श् च॒ विश्वे॑ दे॒वासो॑ अमद॒न्न् अनु॑ त्वा ॥ १ १०३ ०७
शुष्ण॒म् पिप्रुं॒ कुय॑वं वृ॒त्रम् इ॑न्द्र य॒दाव॑धी॒र् वि पुरः॒ शम्ब॑रस्य ।
तन् नो॑ मि॒त्रो वरु॑णो मामहन्ता॒म् अदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥ १ १०३ ०८

योनि॑ष् ट इन्द्र नि॒षदे॑ अकारि॒ तम् आ नि षी॑द स्वा॒नो नार्वा॑ ।
वि॒मुच्या॒ वयो॑ ऽव॒सायाश्वा॑न् दो॒षा वस्तो॒र् वही॑यसः प्रपि॒त्वे ॥ १ १०४ ०१
ओ त्ये न॒र इन्द्र॑म् ऊ॒तये॑ गु॒र् नू चि॒त् तान् स॒द्यो अध्व॑नो जगम्यात् ।
दे॒वासो॑ म॒न्युं दास॑स्य श्चम्न॒न् ते न॒ आ व॑क्षन् सुवि॒ताय॒ वर्ण॑म् ॥ १ १०४ ०२
अव॒ त्मना॑ भरते॒ केत॑वेदा॒ अव॒ त्मना॑ भरते॒ फेन॑म् उ॒दन् ।

क्षीरेण स्नातः कुयवस्य योषे हते ते स्याताम् प्रवणे शिफायाः ॥ १ १०४ ०३
युयोप नाभिर् उपरस्यायोः प्र पूर्वाभिस् तिरते राष्टि शूरः ।
अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर् भरन्ते ॥ १ १०४ ०४
प्रति यत् स्या नीथादर्शि दस्योर् ओको नाच्छा सदनं जानती गात् ।
अध स्मा नो मघवञ् चर्कृताद् इन् मा नो मघेव निष्षपी परा दाः ॥ १ १०४ ०५
स त्वं न इन्द्र सूर्ये सो अप्स्व् अनागास्त्व आ भज जीवशंसे ।
मान्तराम् भुजम् आ रीरिषो नः श्रद्धितं ते महत इन्द्रियाय ॥ १ १०४ ०६
अधा मन्ये श्रत् ते अस्मा अधायि वृषा चोदस्व महते धनाय ।
मा नो अकृते पुरुहूत योनाव् इन्द्र क्षुध्यद्भ्यो वय आसुतिं दाः ॥ १ १०४ ०७
मा नो वधीर् इन्द्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः ।
आण्डा मा नो मघवञ् छक्र निर् भेन् मा नः पात्रा भेत् सहजानुषाणि ॥ १ १०४ ०८
अर्वाङ् एहि सोमकामं त्वाहुर् अयं सुतस् तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ॥ १ १०४ ०९

चन्द्रमा अप्स्व् अ १ न्तर् आ सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तम् मे अस्य रोदसी ॥ १ १०५ ०१
अर्थम् इद् वा उ अर्थिन आ जाया युवते पतिम् ।
तुञ्जाते वृष्ण्यम् पयः परिदाय रसं दुहे वित्तम् मे अस्य रोदसी ॥ १ १०५ ०२
मो षु देवा अदः स्व १ र् अव पादि दिवस् परि ।
मा सोम्यस्य शम्भुवः शूने भूम कदा चन वित्तम् मे अस्य रोदसी ॥ १ १०५ ०३
यज्ञम् पृच्छाम्य् अवमं स तद् दूतो वि वोचति ।
क्व ऋतम् पूर्व्यं गतं कस् तद् बिभर्ति नूतनो वित्तम् मे अस्य रोदसी ॥ १ १०५ ०४
अमी ये देवा स्थन त्रिष्व् आ रोचने दिवः ।
कद् व ऋतं कद् अनृतं क्व प्रत्ना व आहुतिर् वित्तम् मे अस्य रोदसी ॥ १ १०५ ०५
कद् व ऋतस्य धर्णसि कद् वरुणस्य चक्षणम् ।
कद् अर्यम्णो महस् पथाति क्रामेम दूढ्यो वित्तम् मे अस्य रोदसी ॥ १ १०५ ०६
अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।

तम् मा व्यन्त्य् आध्यो वृको न तृष्णजम् मृगं वित्तम् मे अस्य रोदसी ॥ १ १०५ ०७
सम् मा तपन्त्य् अभितः सपत्नीर् इव पर्शवः ।
मूषो न शिश्ना व्य् अदन्ति माध्य स्तोतारं ते शतक्रतो वित्तम् मे अस्य रोदसी ॥ १ १०५ ०८
अमी ये सप्त रश्मयस् तत्रा मे नाभिर् आतता ।
त्रितस् तद् वेदाप्त्यः स जामित्वाय रेभति वित्तम् मे अस्य रोदसी ॥ १ १०५ ०९
अमी ये पञ्चोक्षणो मध्ये तस्थुर् महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर् वित्तम् मे अस्य रोदसी ॥ १ १०५ १०
सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीर् अपो वित्तम् मे अस्य रोदसी ॥ १ १०५ ११
नव्यं तद् उक्थ्यं हितं देवासः सुप्रवाचनम् ।
ऋतम् अर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तम् मे अस्य रोदसी ॥ १ १०५ १२
अग्ने तव त्यद् उक्थ्यं देवेष्व् अस्त्य् आप्यम् ।
स नः सत्तो मनुष्वद् आ देवान् यक्षि विदुष्टरो वित्तम् मे अस्य रोदसी ॥ १ १०५ १३
सत्तो होता मनुष्वद् आ देवाँ अच्छा विदुष्टरः ।
अग्निर् हव्या सुषूदति देवो देवेषु मेधिरो वित्तम् मे अस्य रोदसी ॥ १ १०५ १४
ब्रह्मा कृणोति वरुणो गातुविदं तम् ईमहे ।
व्य् ऊर्णोति हृदा मतिं नव्यो जायताम् ऋतं वित्तम् मे अस्य रोदसी ॥ १ १०५ १५
असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तम् मर्तासो न पश्यथ वित्तम् मे अस्य रोदसी ॥ १ १०५ १६
त्रितः कूपे ऽवहितो देवान् हवत ऊतये ।
तच् छुश्राव बृहस्पतिः कृण्वन्न् अंहूरणाद् उरु वित्तम् मे अस्य रोदसी ॥ १ १०५ १७
अरुणो मा सकृद् वृकः पथा यन्तं ददर्श हि ।
उज् जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तम् मे अस्य रोदसी ॥ १ १०५ १८
एनाङ्गूषेण वयम् इन्द्रवन्तो ऽभि ष्याम वृजने सर्ववीराः ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ १०५ १९

इन्द्र॑म् मि॒त्रं वरु॑णम् अ॒ग्निम् ऊ॒तये॒ मारु॑तं॒ शर्धो॒ अदि॑तिं हवामहे ।
रथं॒ न दु॒र्गाद् व॑सवः सुदानवो॒ विश्व॑स्मान् नो॒ अंह॑सो॒ निष् पि॑पर्तन ॥ १ १०६ ०१
त आ॑दित्या॒ आ ग॑ता स॒र्वता॑तये भू॒त दे॑वा वृत्र॒तूर्ये॑षु श॒म्भुवः॑ ।
रथं॒ न दु॒र्गाद् व॑सवः सुदानवो॒ विश्व॑स्मान् नो॒ अंह॑सो॒ निष् पि॑पर्तन ॥ १ १०६ ०२
अव॑न्तु नः पि॒तरः॑ सुप्रवाच॒ना उ॒त दे॒वी दे॒वपु॑त्रे ऋता॒वृधा॑ ।
रथं॒ न दु॒र्गाद् व॑सवः सुदानवो॒ विश्व॑स्मान् नो॒ अंह॑सो॒ निष् पि॑पर्तन ॥ १ १०६ ०३
नरा॒शंसं॑ वा॒जिनं॑ वा॒जय॑न्न् इ॒ह क्ष॒यद्वी॑रम् पू॒षणं॑ सु॒म्नैर् ई॑महे ।
रथं॒ न दु॒र्गाद् व॑सवः सुदानवो॒ विश्व॑स्मान् नो॒ अंह॑सो॒ निष् पि॑पर्तन ॥ १ १०६ ०४
बृह॑स्पते॒ सद॒म् इन् नः॑ सु॒गं कृ॑धि॒ शं योर् यत् ते॒ मनु॑र्हितं॒ तद् ई॑महे ।
रथं॒ न दु॒र्गाद् व॑सवः सुदानवो॒ विश्व॑स्मान् नो॒ अंह॑सो॒ निष् पि॑पर्तन ॥ १ १०६ ०५
इन्द्रं॒ कुत्सो॑ वृत्र॒हणं॒ शची॒पतिं॑ का॒टे निबा॑ळ्ह॒ ऋषि॑र् अह्वद् ऊ॒तये॑ ।
रथं॒ न दु॒र्गाद् व॑सवः सुदानवो॒ विश्व॑स्मान् नो॒ अंह॑सो॒ निष् पि॑पर्तन ॥ १ १०६ ०६
दे॒वैर् नो॑ दे॒व्य् अदि॑ति॒र् नि पा॑तु दे॒वस् त्रा॒ता त्रा॑यता॒म् अप्र॑युच्छन् ।
तन् नो॑ मि॒त्रो वरु॑णो मामहन्ता॒म् अदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥ १ १०६ ०७

य॒ज्ञो दे॒वाना॒म् प्रत्य् ए॑ति सु॒म्नम् आदि॑त्यासो॒ भव॑ता मृळ॒यन्तः॑ ।
आ वो॒ ऽर्वाची॑ सुम॒तिर् व॑वृत्याद् अं॒होश् चि॒द् या व॑रिवो॒वित्त॒रास॑त् ॥ १ १०७ ०१
उप॑ नो दे॒वा अव॒सा ग॑म॒न्त्व् अङ्गि॑रसां॒ साम॑भि स्तू॒यमा॑नाः ।
इन्द्र॑ इन्द्रि॒यैर् म॒रुतो॑ म॒रुद्भि॑र् आदि॒त्यैर् नो॒ अदि॑तिः॒ शर्म॑ यंसत् ॥ १ १०७ ०२
तन् न॒ इन्द्र॒स् तद् वरु॑ण॒स् तद् अ॒ग्निस् तद् अ॑र्य॒मा तत् स॑वि॒ता चनो॑ धात् ।
तन् नो॑ मि॒त्रो वरु॑णो मामहन्ता॒म् अदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥ १ १०७ ०३

य इ॑न्द्राग्नी चि॒त्रत॑मो॒ रथो॑ वाम् अ॒भि विश्वा॑नि॒ भुव॑नानि॒ चष्टे॑ ।
तेना या॑तं स॒रथं॑ तस्थि॒वांसाथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥ १ १०८ ०१
याव॑द् इ॒दम् भुव॑नं॒ विश्व॒म् अस्त्य् उ॑रु॒व्यचा॑ वरि॒मता॑ गभी॒रम् ।
तावाँ॑ अ॒यम् पात॑वे॒ सोमो॑ अ॒स्त्व् अर॑म् इन्द्राग्नी॒ मन॑से यु॒वभ्या॑म् ॥ १ १०८ ०२

चक्राथे हि सध्र्य१ङ् नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः ।
ताव् इन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥ १ १०८ ०३
समिद्धेष्व् अग्निष्व् आनजाना यतस्रुचा बर्हिर् उ तिस्तिराणा ।
तीव्रैः सोमैः परिषिक्तेभिर् अर्वाग् एन्द्राग्नी सौमनसाय यातम् ॥ १ १०८ ०४
यानीन्द्राग्नी चक्रथुर् वीर्याणि यानि रूपाण्य् उत वृष्ण्यानि ।
या वाम् प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥ १ १०८ ०५
यद् अब्रवम् प्रथमं वां वृणानो ऽयं सोमो असुरैर् नो विहव्यः ।
तां सत्यां श्रद्धाम् अभ्य् आ हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ १ १०८ ०६
यद् इन्द्राग्नी मदथः स्वे दुरोणे यद् ब्रह्मणि राजनि वा यजत्रा ।
अतः परि वृषणाव् आ हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ १ १०८ ०७
यद् इन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्युष्व् अनुषु पूरुषु स्थः ।
अतः परि वृषणाव् आ हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ १ १०८ ०८
यद् इन्द्राग्नी अवमस्याम् पृथिव्याम् मध्यमस्याम् परमस्याम् उत स्थः ।
अतः परि वृषणाव् आ हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ १ १०८ ०९
यद् इन्द्राग्नी परमस्याम् पृथिव्याम् मध्यमस्याम् अवमस्याम् उत स्थः ।
अतः परि वृषणाव् आ हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ १ १०८ १०
यद् इन्द्राग्नी दिवि ष्ठो यत् पृथिव्यां यत् पर्वतेष्व् ओषधीष्व् अप्सु ।
अतः परि वृषणाव् आ हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ १ १०८ ११
यद् इन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।
अतः परि वृषणाव् आ हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ १ १०८ १२
एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ १०८ १३

वि ह्य् अख्यम् मनसा वस्य इच्छन्न् इन्द्राग्नी ज्ञास उत वा सजातान् ।
नान्या युवत् प्रमतिर् अस्ति मह्यं स वां धियं वाजयन्तीम् अतक्षम् ॥ १ १०९ ०१
अश्रवं हि भूरिदावत्तरा वां विजामातुर् उत वा घा स्यालात् ।
अथा सोमस्य प्रयती युवभ्याम् इन्द्राग्नी स्तोमं जनयामि नव्यम् ॥ १ १०९ ०२

मा छेद्म रश्मीर् इति नाधमानाः पितॄणां शक्तीर् अनुयच्छमानाः ।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्य् अद्री धिषणाया उपस्थे ॥ १ १०९ ०३
युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोमम् उशती सुनोति ।
ताव् अश्विना भद्रहस्ता सुपाणी आ धावतम् मधुना पृङ्क्तम् अप्सु ॥ १ १०९ ०४
युवाम् इन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
ताव् आसद्या बर्हिषि यज्ञे अस्मिन् प्र चर्षणी मादयेथां सुतस्य ॥ १ १०९ ०५
प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश् च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्य् अन्या ॥ १ १०९ ०६
आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वम् पितरो न आसन् ॥ १ १०९ ०७
पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतम् भरेषु ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ १०९ ०८

ततम् मे अपस् तद् उ तायते पुनः स्वादिष्ठा धीतिर् उचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य सम् उ तृप्णुत ऋभवः ॥ १ ११० ०१
आभोगयम् प्र यद् इच्छन्त ऐतनापाकाः प्राञ्चो मम के चिद् आपयः ।
सौधन्वनासश् चरितस्य भूमनागच्छत सवितुर् दाशुषो गृहम् ॥ १ ११० ०२
तत् सविता वो ऽमृतत्वम् आसुवद् अगोह्यं यच् छ्रवयन्त ऐतन ।
त्यं चिच् चमसम् असुरस्य भक्षणम् एकं सन्तम् अकृणुता चतुर्वयम् ॥ १ ११० ०३
विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वम् आनशुः ।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे सम् अपृच्यन्त धीतिभिः ॥ १ ११० ०४
क्षेत्रम् इव वि ममुस् तेजनेनँ एकम् पात्रम् ऋभवो जेहमानम् ।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥ १ ११० ०५
आ मनीषाम् अन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।
तरणित्वा ये पितुर् अस्य सश्चिर ऋभवो वाजम् अरुहन् दिवो रजः ॥ १ ११० ०६
ऋभुर् न इन्द्रः शवसा नवीयान् ऋभुर् वाजेभिर् वसुभिर् वसुर् ददिः ।
युष्माकं देवा अवसाहनि प्रिये ऽभि तिष्ठेम पृत्सुतीर् असुन्वताम् ॥ १ ११० ०७

निश् चर्मण ऋभवो गाम् अपिंशत सं वत्सेनासृजता मातरम् पुनः ।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥ १ ११० ०८
वाजेभिर् नो वाजसाताव् अविड्ढ्य् ऋभुमाँ इन्द्र चित्रम् आ दर्षि राधः ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ११० ०९

तक्षन् रथं सुवृतं विद्मनापसस् तक्षन् हरी इन्द्रवाहा वृषण्वसू ।
तक्षन् पितृभ्याम् ऋभवो युवद् वयस् तक्षन् वत्साय मातरं सचाभुवम् ॥ १ १११ ०१
आ नो यज्ञाय तक्षत ऋभुमद् वयः क्रत्वे दक्षाय सुप्रजावतीम् इषम् ।
यथा क्षयाम सर्ववीरया विशा तन् नः शर्धाय धासथा स्व् ऐन्द्रियम् ॥ १ १११ ०२
आ तक्षत सातिम् अस्मभ्यम् ऋभवः सातिं रथाय सातिम् अर्वते नरः ।
सातिं नो जैत्रीं सम् महेत विश्वहा जामिम् अजामिम् पृतनासु सक्षणिम् ॥ १ १११ ०३
ऋभुक्षणम् इन्द्रम् आ हुव ऊतय ऋभून् वाजान् मरुतः सोमपीतये ।
उभा मित्रावरुणा नूनम् अश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥ १ १११ ०४
ऋभुर् भराय सं शिशातु सातिं समर्यजिद् वाजो अस्माँ अविष्टु ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ १११ ०५

ईळे द्यावापृथिवी पूर्वचित्तये ऽग्निं घर्मं सुरुचं यामन्न् इष्टये ।
याभिर् भरे कारम् अंशाय जिन्वथस् ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ०१
युवोर् दानाय सुभरा असश्चतो रथम् आ तस्थुर् वचसं न मन्तवे ।
याभिर् धियो ऽवथः कर्मन्न् इष्टये ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ०२
युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना ।
याभिर् धेनुम् अस्व १ म् पिन्वथो नरा ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ०३
याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर् विभूषति ।
याभिस् त्रिमन्तुर् अभवद् विचक्षणस् ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२

०४
याभी रेभं निवृतं सितम् अद्भ्य उद् वन्दनम् ऐरयतं स्वर् दृशे ।
याभिः कण्वम् प्र सिषासन्तम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२
०५
याभिर् अन्तकं जसमानम् आरणे भुज्युं याभिर् अव्यथिभिर् जिजिन्वथुः ।
याभिः कर्कन्धुं वय्यं च जिन्वथस् ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ०६
याभिः शुचन्तिं धनसां सुषंसदं तप्तं घर्मम् ओम्यावन्तम् अत्रये ।
याभिः पृश्निगुम् पुरुकुत्सम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ०७
याभिः शचीभिर् वृषणा परावृजम् प्रान्धं श्रोणं चक्षस एतवे कृथः ।
याभिर् वर्तिकां ग्रसिताम् अमुञ्चतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ०८
याभिः सिन्धुम् मधुमन्तम् असश्चतं वसिष्ठं याभिर् अजराव् अजिन्वतम् ।
याभिः कुत्सं श्रुतर्यं नर्यम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ०९
याभिर् विश्पलां धनसाम् अथर्व्यं सहस्रमीळ्ह आजाव् अजिन्वतम् ।
याभिर् वशम् अश्व्यम् प्रेणिम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२
१०
याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।
कक्षीवन्तं स्तोतारं याभिर् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ ११
याभी रसां क्षोदसोद्नः पिपिन्वथुर् अनश्वं याभी रथम् आवतं जिषे ।
याभिस् त्रिशोक उस्रिया उदाजत ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १२
याभिः सूर्यम् परियाथः परावति मन्धातारं क्षैत्रपत्येष्व् आवतम् ।
याभिर् विप्रम् प्र भरद्वाजम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १३
याभिर् महाम् अतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम् ।
याभिः पूर्भिद्ये त्रसदस्युम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १४
याभिर् वम्रं विपिपानम् उपस्तुतं कलिं याभिर् वित्तजानिं दुवस्यथः ।
याभिर् व्यश्वम् उत पृथिम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १५
याभिर् नरा शयवे याभिर् अत्रये याभिः पुरा मनवे गातुम् ईषथुः ।
याभिः शारीर् आजतं स्यूमरश्मये ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १६
याभिः पठर्वा जठरस्य मज्मनाग्निर् नादीदेच् चित इद्धो अज्मन्न् आ ।

याभिः शर्यातम् अवथो महाधने ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १७
याभिर् अङ्गिरो मनसा निरण्यथो ऽग्रं गच्छथो विवरे गोअर्णसः ।
याभिर् मनुं शूरम् इषा समावतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १८
याभिः पत्नीर् विमदाय न्यूहथुर् आ घ वा याभिर् अरुणीर् अशिक्षतम् ।
याभिः सुदास ऊहथुः सुदेव्य १ं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ १९
याभिः शंताती भवथो ददाशुषे भुज्युं याभिर् अवथो याभिर् अध्रिगुम् ।
ओम्यावतीं सुभराम् ऋतस्तुभं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ २०
याभिः कृशानुम् असने दुवस्यथो जवे याभिर् यूनो अर्वन्तम् आवतम् ।
मधु प्रियम् भरथो यत् सरड्भ्यस् ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ २१
याभिर् नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।
याभी रथाँ अवथो याभिर् अर्वतस् ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ २२
याभिः कुत्सम् आर्जुनेयं शतक्रतू प्र तुर्वीतिम् प्र च दभीतिम् आवतम् ।
याभिर् ध्वसन्तिम् पुरुषन्तिम् आवतं ताभिर् ऊ षु ऊतिभिर् अश्विना गतम् ॥ १ ११२ २३
अप्नस्वतीम् अश्विना वाचम् अस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्ये ऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥ १ ११२ २४
द्युभिर् अक्तुभिः परि पातम् अस्मान् अरिष्टेभिर् अश्विना सौभगेभिः ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ११२ २५

इदं श्रेष्ठं ज्योतिषां ज्योतिर् आगाच् चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायँ एवा रात्र्य् उषसे योनिम् आरैक् ॥ १ ११३ ०१
रुशद्वत्सा रुशती श्वेत्यागाद् आरैग् उ कृष्णा सदनान्य् अस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ १ ११३ ०२
समानो अध्वा स्वस्रोर् अनन्तस् तम् अन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥ १ ११३ ०३
भास्वती नेत्री सूनृतानाम् अचेति चित्रा वि दुरो न आवः ।
प्रार्प्या जगद् व्य् उ नो रायो अख्यद् उषा अजीगर् भुवनानि विश्वा ॥ १ ११३ ०४

जिह्मश्ये ३ चरितवे मघोन्य् आभोगय इष्टये राय उ त्वम् ।
दभ्रम् पश्यद्भ्य उर्विया विचक्ष उषा अजीगर् भुवनानि विश्वा ॥ १ ११३ ०५
क्षत्राय त्वं श्रवसे त्वम् महीया इष्टये त्वम् अर्थम् इव त्वम् इत्यै ।
विसदृशा जीविताभिप्रचक्ष उषा अजीगर् भुवनानि विश्वा ॥ १ ११३ ०६
एषा दिवो दुहिता प्रत्य् अदर्शि व्युच्छन्ती युवतिः शुक्रवासाः ।
विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्य् उच्छ ॥ १ ११३ ०७
परायतीनाम् अन्व् एति पाथ आयतीनाम् प्रथमा शश्वतीनाम् ।
व्युच्छन्ती जीवम् उदीरयन्त्य् उषा मृतं कं चन बोधयन्ती ॥ १ ११३ ०८
उषो यद् अग्निं समिधे चकर्थ वि यद् आवश् चक्षसा सूर्यस्य ।
यन् मानुषान् यक्ष्यमाणाँ अजीगस् तद् देवेषु चकृषे भद्रम् अप्नः ॥ १ ११३ ०९
कियात्य् आ यत् समया भवाति या व्यूषुर् याश् च नूनं व्युच्छान् ।
अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषम् अन्याभिर् एति ॥ १ ११३ १०
ईयुष् टे ये पूर्वतराम् अपश्यन् व्युच्छन्तीम् उषसम् मर्त्यासः ।
अस्माभिर् ऊ नु प्रतिचक्ष्याभूद् ओ ते यन्ति ये अपरीषु पश्यान् ॥ १ ११३ ११
यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती ।
सुमङ्गलीर् बिभ्रती देववीतिम् इहाद्योषः श्रेष्ठतमा व्य् उच्छ ॥ १ ११३ १२
शश्वत् पुरोषा व्य् उवास देव्य् अथो अद्येदं व्य् आवो मघोनी ।
अथो व्य् उच्छाद् उत्तराँ अनु द्यून् अजरामृता चरति स्वधाभिः ॥ १ ११३ १३
व्य् अ १ ञ्जिभिर् दिव आतास्व् अद्यौद् अप कृष्णां निर्णिजं देव्य् आवः ।
प्रबोधयन्त्य् अरुणेभिर् अश्वैर् ओषा याति सुयुजा रथेन ॥ १ ११३ १४
आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।
ईयुषीणाम् उपमा शश्वतीनां विभातीनाम् प्रथमोषा व्य् अश्वैत् ॥ १ ११३ १५
उद् ईर्ध्वं जीवो असुर् न आगाद् अप प्रागात् तम आ ज्योतिर् एति ।
आरैक् पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥ १ ११३ १६
स्यूमना वाच उद् इयर्ति वह्नि स्तवानो रेभ उषसो विभातीः ।
अद्या तद् उच्छ गृणते मघोन्य् अस्मे आयुर् नि दिदीहि प्रजावत् ॥ १ ११३ १७
या गोमतीर् उषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय ।
वायोर् इव सूनृतानाम् उदर्के ता अश्वदा अश्नवत् सोमसुत्वा ॥ १ ११३ १८

माता देवानाम् अदितिर् अनीकं यज्ञस्य केतुर् बृहती वि भाहि ।
प्रशस्तिकृद् ब्रह्मणे नो व्य् उ १ च्छा नो जने जनय विश्ववारे ॥ १ ११३ १९
यच् चित्रम् अप्न उषसो वहन्तीजानाय शशमानाय भद्रम् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ११३ २०

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शम् असद् द्विपदे चतुष्पदे विश्वम् पुष्टं ग्रामे अस्मिन्न् अनातुरम् ॥ १ ११४ ०१
मृळा नो रुद्रोत नो मयस् कृधि क्षयद्वीराय नमसा विधेम ते ।
यच् छं च योश् च मनुर् आयेजे पिता तद् अश्याम तव रुद्र प्रणीतिषु ॥ १ ११४ ०२
अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्न् इद् विशो अस्माकम् आ चरारिष्टवीरा जुहवाम ते हविः ॥ १ ११४ ०३
त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविम् अवसे नि ह्वयामहे ।
आरे अस्मद् दैव्यं हेळो अस्यतु सुमतिम् इद् वयम् अस्या वृणीमहे ॥ १ ११४ ०४
दिवो वराहम् अरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद् भेषजा वार्याणि शर्म वर्म छर्दिर् अस्मभ्यं यंसत् ॥ १ ११४ ०५
इदम् पित्रे मरुताम् उच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥ १ ११४ ०६
मा नो महान्तम् उत मा नो अर्भकम् मा न उक्षन्तम् उत मा न उक्षितम् ।
मा नो वधीः पितरम् मोत मातरम् मा नः प्रियास् तन्वो रुद्र रीरिषः ॥ १ ११४ ०७
मा नस् तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर् हविष्मन्तः सदम् इत् त्वा हवामहे ॥ १ ११४ ०८
उप ते स्तोमान् पशुपा इवाकरं रास्वा पितर् मरुतां सुम्नम् अस्मे ।
भद्रा हि ते सुमतिर् मृळयत्तमाथा वयम् अव इत् ते वृणीमहे ॥ १ ११४ ०९
आरे ते गोघ्नम् उत पूरुषघ्नं क्षयद्वीर सुम्नम् अस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥ १ ११४ १०
अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ११४ ११

चित्रं देवानाम् उद् अगाद् अनीकं चक्षुर् मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस् तस्थुषश् च ॥ १ ११५ ०१
सूर्यो देवीम् उषसं रोचमानाम् मर्यो न योषाम् अभ्य् एति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥ १ ११५ ०२
भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठम् अस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥ १ ११५ ०३
तत् सूर्यस्य देवत्वं तन् महित्वम् मध्या कर्तोर् विततं सं जभार ।
यदेद् अयुक्त हरितः सधस्थाद् आद् रात्री वासस् तनुते सिमस्मै ॥ १ ११५ ०४
तन् मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योर् उपस्थे ।
अनन्तम् अन्यद् रुशद् अस्य पाजः कृष्णम् अन्यद् धरितः सम् भरन्ति ॥ १ ११५ ०५
अद्या देवा उदिता सूर्यस्य निर् अंहसः पिपृता निर् अवद्यात् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ १ ११५ ०६

नासत्याभ्याम् बर्हिर् इव प्र वृञ्जे स्तोमाँ इयर्म्य् अभ्रियेव वातः ।
याव् अर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥ १ ११६ ०१
वीळुपत्मभिर् आशुहेमभिर् वा देवानां वा जूतिभिः शाशदाना ।
तद् रासभो नासत्या सहस्रम् आजा यमस्य प्रधने जिगाय ॥ १ ११६ ०२
तुग्रो ह भुज्युम् अश्विनोदमेघे रयिं न कश् चिन् ममृवाँ अवाहाः ।
तम् ऊहथुर् नौभिर् आत्मन्वतीभिर् अन्तरिक्षप्रुद्भिर् अपोदकाभिः ॥ १ ११६ ०३
तिस्रः क्षपस् त्रिर् अहातिव्रजद्भिर् नासत्या भुज्युम् ऊहथुः पतङ्गैः ।
समुद्रस्य धन्वन्न् आर्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥ १ ११६ ०४
अनारम्भणे तद् अवीरयेथाम् अनास्थाने अग्रभणे समुद्रे ।
यद् अश्विना ऊहथुर् भुज्युम् अस्तं शतारित्रां नावम् आतस्थिवांसम् ॥ १ ११६ ०५
यम् अश्विना ददथुः श्वेतम् अश्वम् अघाश्वाय शश्वद् इत् स्वस्ति ।
तद् वां दात्रम् महि कीर्तेन्यम् भूत् पैद्वो वाजी सदम् इद् धव्यो अर्यः ॥ १ ११६ ०६

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतम् पुरंधिम् ।
कारोतराच् छफाद् अश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः ॥ १ ११६ ०७
हिमेनाग्निं घ्रंसम् अवारयेथाम् पितुमतीम् ऊर्जम् अस्मा अधत्तम् ।
ऋबीसे अत्रिम् अश्विनावनीतम् उन् निन्यथुः सर्वगणं स्वस्ति ॥ १ ११६ ०८
परावतं नासत्यानुदेथाम् उच्चाबुध्नं चक्रथुर् जिह्मबारम् ।
क्षरन्न् आपो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥ १ ११६ ०९
जुजुरुषो नासत्योत वव्रिम् प्रामुञ्चतं द्रापिम् इव च्यवानात् ।
प्रातिरतं जहितस्यायुर् दस्राद् इत् पतिम् अकृणुतं कनीनाम् ॥ १ ११६ १०
तद् वां नरा शंस्यं राध्यं चाभिष्टिमन् नासत्या वरूथम् ।
यद् विद्वांसा निधिम् इवापगूळ्हम् उद् दर्शताद् ऊपथुर् वन्दनाय ॥ १ ११६ ११
तद् वां नरा सनये दंस उग्रम् आविष् कृणोमि तन्यतुर् न वृष्टिम् ।
दध्यङ् ह यन् मध्व् आथर्वणो वाम् अश्वस्य शीर्ष्णा प्र यद् ईम् उवाच ॥ १ ११६ १२
अजोहवीन् नासत्या करा वाम् महे यामन् पुरुभुजा पुरंधिः ।
श्रुतं तच् छासुर् इव वध्रिमत्या हिरण्यहस्तम् अश्विनाव् अदत्तम् ॥ १ ११६ १३
आस्नो वृकस्य वर्तिकाम् अभीके युवं नरा नासत्यामुमुक्तम् ।
उतो कविम् पुरुभुजा युवं ह कृपमाणम् अकृणुतं विचक्षे ॥ १ ११६ १४
चरित्रं हि वेर् इवाच्छेदि पर्णम् आजा खेलस्य परितक्म्यायाम् ।
सद्यो जङ्घाम् आयसीं विश्पलायै धने हिते सर्तवे प्रत्य् अधत्तम् ॥ १ ११६ १५
शतम् मेषान् वृक्ये चक्षदानम् ऋज्राश्वं तम् पितान्धं चकार ।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजाव् अनर्वन् ॥ १ ११६ १६
आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठद् अर्वता जयन्ती ।
विश्वे देवा अन्व् अमन्यन्त हृद्भिः सम् उ श्रिया नासत्या सचेथे ॥ १ ११६ १७
यद् अयातं दिवोदासाय वर्तिर् भरद्वाजायाश्विना हयन्ता ।
रेवद् उवाह सचनो रथो वां वृषभश् च शिंशुमारश् च युक्ता ॥ १ ११६ १८
रयिं सुक्षत्रं स्वपत्यम् आयुः सुवीर्यं नासत्या वहन्ता ।
आ जह्नावीं समनसोप वाजैस् त्रिर् अह्नो भागं दधतीम् अयातम् ॥ १ ११६ १९
परिविष्टं जाहुषं विश्वतः सीं सुगेभिर् नक्तम् ऊहथू रजोभिः ।
विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम् ॥ १ ११६ २०

एकस्या वस्तोर् आवतं रणाय वशम् अश्विना सनये सहस्रा ।
निर् अहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणाव् अरातीः ॥ १ ११६ २१
शरस्य चिद् आर्चत्कस्यावताद् आ नीचाद् उच्चा चक्रथुः पातवे वाः ।
शयवे चिन् नासत्या शचीभिर् जसुरये स्तर्यम् पिप्यथुर् गाम् ॥ १ ११६ २२
अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।
पशुं न नष्टम् इव दर्शनाय विष्णाप्वं ददथुर् विश्वकाय ॥ १ ११६ २३
दश रात्रीर् अशिवेना नव द्यून् अवनद्धं श्नथितम् अप्स्व् अ १ न्तः ।
विप्रुतं रेभम् उदनि प्रवृक्तम् उन् निन्यथुः सोमम् इव स्रुवेण ॥ १ ११६ २४
प्र वां दंसांस्य् अश्विनाव् अवोचम् अस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यन्न् अश्नुवन् दीर्घम् आयुर् अस्तम् इवेज् जरिमाणं जगम्याम् ॥ १ ११६ २५

मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम् ।
बर्हिष्मती रातिर् विश्रिता गीर् इषा यातं नासत्योप वाजैः ॥ १ ११७ ०१
यो वाम् अश्विना मनसो जवीयान् रथः स्वश्वो विश आजिगाति ।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिर् अस्मभ्यं यातम् ॥ १ ११७ ०२
ऋषिं नराव् अंहसः पाञ्चजन्यम् ऋबीसाद् अत्रिम् मुञ्चथो गणेन ।
मिनन्ता दस्योर् अशिवस्य माया अनुपूर्वं वृषणा चोदयन्ता ॥ १ ११७ ०३
अश्वं न गूळ्हम् अश्विना दुरेवैर् ऋषिं नरा वृषणा रेभम् अप्सु ।
सं तं रिणीथो विप्रुतं दंसोभिर् न वां जूर्यन्ति पूर्व्या कृतानि ॥ १ ११७ ०४
सुषुप्वांसं न निरृतेर् उपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् ।
शुभे रुक्मं न दर्शतं निखातम् उद् ऊपथुर् अश्विना वन्दनाय ॥ १ ११७ ०५
तद् वां नरा शंस्यम् पज्रियेण कक्षीवता नासत्या परिज्मन् ।
शफाद् अश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतम् मधूनाम् ॥ १ ११७ ०६
युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर् विश्वकाय ।
घोषायै चित् पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनाव् अदत्तम् ॥ १ ११७ ०७
युवं श्यावाय रुशतीम् अदत्तम् महः क्षोणस्याश्विना कण्वाय ।
प्रवाच्यं तद् वृषणा कृतं वां यन् नार्षदाय श्रवो अध्यधत्तम् ॥ १ ११७ ०८

पुरू वपांस्य् अश्विना दधाना नि पेदव ऊहथुर् आशुम् अश्वम् ।
सहस्रसां वाजिनम् अप्रतीतम् अहिहनं श्रवस्य १ं तरुत्रम् ॥ १ ११७ ०९
एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।
यद् वाम् पज्रासो अश्विना हवन्ते यातम् इषा च विदुषे च वाजम् ॥ १ ११७ १०
सूनोर् मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता ।
अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम् ॥ १ ११७ ११
कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।
हिरण्यस्येव कलशं निखातम् उद् ऊपथुर् दशमे अश्विनाहन् ॥ १ ११७ १२
युवं च्यवानम् अश्विना जरन्तम् पुनर् युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥ १ ११७ १३
युवं तुग्राय पूर्व्येभिर् एवैः पुनर्मन्याव् अभवतं युवाना ।
युवम् भुज्युम् अर्णसो निः समुद्राद् विभिर् ऊहथुर् ऋज्रेभिर् अश्वैः ॥ १ ११७ १४
अजोहवीद् अश्विना तौग्र्यो वाम् प्रोळ्हः समुद्रम् अव्यथिर् जगन्वान् ।
निष् टम् ऊहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥ १ ११७ १५
अजोहवीद् अश्विना वर्तिका वाम् आस्नो यत् सीम् अमुञ्चतं वृकस्य ।
वि जयुषा ययथुः सान्व् अद्रेर् जातं विष्वाचो अहतं विषेण ॥ १ ११७ १६
शतम् मेषान् वृक्ये मामहानं तमः प्रणीतम् अशिवेन पित्रा ।
आक्षी ऋज्राश्वे अश्विनाव् अधत्तं ज्योतिर् अन्धाय चक्रथुर् विचक्षे ॥ १ ११७ १७
शुनम् अन्धाय भरम् अह्वयत् सा वृकीर् अश्विना वृषणा नरेति ।
जारः कनीन इव चक्षदान ऋज्राश्वः शतम् एकं च मेषान् ॥ १ ११७ १८
मही वाम् ऊतिर् अश्विना मयोभूर् उत स्रामं धिष्ण्या सं रिणीथः ।
अथा युवाम् इद् अह्वयत् पुरंधिर् आगच्छतं सीं वृषणाव् अवोभिः ॥ १ ११७ १९
अधेनुं दस्रा स्तर्य १ं विषक्ताम् अपिन्वतं शयवे अश्विना गाम् ।
युवं शचीभिर् विमदाय जायां न्य् ऊहथुः पुरुमित्रस्य योषाम् ॥ १ ११७ २०
यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।
अभि दस्युम् बकुरेणा धमन्तोरु ज्योतिश् चक्रथुर् आर्याय ॥ १ ११७ २१
आथर्वणायाश्विना दधीचे ऽश्व्यं शिरः प्रत्य् ऐरयतम् ।
स वाम् मधु प्र वोचद् ऋतायन् त्वाष्ट्रं यद् दस्राव् अपिकक्ष्यं वाम् ॥ १ ११७ २२

सदा॑ कवी सु॒मतिम् आ च॑के वां॒ विश्वा॒ धियो॑ अश्विना॒ प्राव॑तम् मे ।
अ॒स्मे र॒यिं नास॑त्या बृ॒हन्त॑म् अपत्य॒साचं॒ श्रुत्यं॑ रराथाम् ॥ १ ११७ २३
हि॒र॑ण्यहस्तम् अश्विना॒ ररा॑णा पु॒त्रं न॑रा वध्रिम॒त्या अ॑दत्तम् ।
त्रिधा॑ ह॒ श्याव॑म् अश्विना॒ विक॑स्त॒म् उज् जी॒वस॑ ऐरयतं सुदानू ॥ १ ११७ २४
ए॒तानि॑ वाम् अश्विना वी॒र्या॑णि॒ प्र पू॒र्व्याण्य् आ॒यवो॑ ऽवोचन् ।
ब्रह्म॑ कृ॒ण्वन्तो॑ वृषणा यु॒वभ्यां॑ सु॒वीरा॑सो वि॒द॒थ॒म् आ व॑देम ॥ १ ११७ २५

आ वां॒ रथो॑ अश्विना श्ये॒नप॑त्वा सुमृळी॒कः स्ववाँ॑ यात्व् अ॒र्वाङ् ।
यो मर्त्य॑स्य॒ मन॑सो॒ जवी॑यान् त्रिवन्धु॒रो वृ॑षणा॒ वात॑रंहाः ॥ १ ११८ ०१
त्रि॒व॒न्धु॒रेण॑ त्रि॒वृता॒ रथे॑न त्रिच॒क्रेण॑ सु॒वृता या॑तम् अ॒र्वाक् ।
पिन्व॑तं॒ गा जिन्व॑त॒म् अर्व॑तो नो व॒र्धय॑तम् अश्विना वी॒रम् अ॒स्मे ॥ १ ११८ ०२
प्र॒वद्या॑मना सु॒वृता॒ रथे॑न॒ दस्रा॑व् इ॒मं शृ॑णुतं॒ श्लोक॒म् अद्रेः॑ ।
किम् अ॒ङ्ग वा॒म् प्रत्य् अव॑र्तिं॒ गमि॑ष्ठाहु॒र् विप्रा॑सो अश्विना पु॒राजाः ॥ १ ११८ ०३
आ वां॑ श्ये॒नासो॑ अश्विना वहन्तु॒ रथे॑ यु॒क्तास॑ आ॒शवः॑ पतं॒गाः ।
ये अ॒प्तुरो॑ दि॒व्यासो॒ न गृध्रा॑ अ॒भि प्रयो॑ नासत्या॒ वह॑न्ति ॥ १ ११८ ०४
आ वां॒ रथं॑ युव॒तिस् ति॒ष्ठद् अत्र॑ जु॒ष्ट्वी न॑रा दु॒हि॒ता सूर्य॑स्य ।
परि॑ वा॒म् अश्वा॒ वपु॑षः पतं॒गा वयो॑ वहन्त्व् अरु॒षा अ॒भीके॑ ॥ १ ११८ ०५
उद् वन्द॑नम् ऐरतं दं॒सना॑भि॒र् उद् रे॒भं द॑स्रा वृषणा॒ शची॑भिः ।
निष् टौग्र्य॑म् पा॑रयथः समु॒द्रात् पुन॒श् च्यवा॑नं चक्रथु॒र् युवा॑नम् ॥ १ ११८ ०६
यु॒वम् अत्र॒ये ऽव॑नीताय त॒प्तम् ऊर्ज॑म् ओ॒मान॑म् अश्विनाव् अधत्तम् ।
यु॒वं कण्वा॒यापि॑रिप्ता॒य चक्षुः॒ प्रत्य् अ॑धत्तं सुष्टु॒तिं जु॑जुषा॒णा ॥ १ ११८ ०७
यु॒वं धे॒नुं श॒यवे॑ नाधि॒तायापि॑न्वतम् अश्विना पू॒र्व्याय॑ ।
अमु॑ञ्चतं॒ वर्ति॑काम् अं॑हसो॒ निः प्रति॒ जङ्घां॑ वि॒श्पला॑या अधत्तम् ॥ १ ११८ ०८
यु॒वं श्वे॒तम् पे॒दव॒ इन्द्र॑जूतम् अहि॒हन॑म् अश्विनादत्त॒म् अश्व॑म् ।
जो॒हूत्र॑म् अ॒र्यो अ॒भिभू॑तिम् उ॒ग्रं स॑हस्र॒सां वृष॑णं वी॒ड्व॑ङ्गम् ॥ १ ११८ ०९
ता वां॑ नरा॒ स्व् अव॑से सुजा॒ता हवा॑महे अश्विना॒ नाध॑मानाः ।
आ न॒ उप॒ वसु॑मता॒ रथे॑न॒ गिरो॑ जुषा॒णा सु॑वि॒ताय॑ यातम् ॥ १ ११८ १०

आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः ।
हवे हि वाम् अश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥ १ ११८ ११

आ वां रथम् पुरुमायम् मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे ।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधाम् अभि प्रयः ॥ १ ११९ ०१
ऊर्ध्वा धीतिः प्रत्य् अस्य प्रयामन्य् अधायि शस्मन् सम् अयन्त आ दिशः ।
स्वदामि घर्मम् प्रति यन्त्य् ऊतय आ वाम् ऊर्जानी रथम् अश्विनारुहत् ॥ १ ११९ ०२
सं यन् मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे ।
युवोर् अह प्रवणे चेकिते रथो यद् अश्विना वहथः सूरिम् आ वरम् ॥ १ ११९ ०३
युवम् भुज्युम् भुरमाणं विभिर् गतं स्वयुक्तिभिर् निवहन्ता पितृभ्य आ ।
यासिष्टं वर्तिर् वृषणा विजेन्यं दिवोदासाय महि चेति वाम् अवः ॥ १ ११९ ०४
युवोर् अश्विना वपुषे युवायुजं रथं वाणी येमतुर् अस्य शर्ध्यम् ।
आ वाम् पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवाम् पती ॥ १ ११९ ०५
युवं रेभम् परिषूतेर् उरुष्यथो हिमेन घर्मम् परितप्तम् अत्रये ।
युवं शयोर् अवसम् पिप्यथुर् गवि प्र दीर्घेण वन्दनस् तार्य् आयुषा ॥ १ ११९ ०६
युवं वन्दनं निरृतं जरण्यया रथं न दस्रा करणा सम् इन्वथः ।
क्षेत्राद् आ विप्रं जनथो विपन्यया प्र वाम् अत्र विधते दंसना भुवत् ॥ १ ११९ ०७
अगच्छतं कृपमाणम् परावति पितुः स्वस्य त्यजसा निबाधितम् ।
स्वर्वतीर् इत ऊतीर् युवोर् अह चित्रा अभीके अभवन्न् अभिष्टयः ॥ १ ११९ ०८
उत स्या वाम् मधुमन् मक्षिकारपन् मदे सोमस्यौशिजो हुवन्यति ।
युवं दधीचो मन आ विवासथो ऽथा शिरः प्रति वाम् अश्व्यं वदत् ॥ १ ११९ ०९
युवम् पेदवे पुरुवारम् अश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैर् अभिद्युम् पृतनासु दुष्टरं चर्कृत्यम् इन्द्रम् इव चर्षणीसहम् ॥ १ ११९ १०

का राधद् धोत्राश्विना वां को वां जोष उभयोः ।
कथा विधात्य् अप्रचेताः ॥ १ १२० ०१

वि॒द्वांसा॑व् इद् दुरः॑ पृच्छेद् अवि॑द्वान् इ॒त्थाप॑रो अ॒चेताः ।
नू चि॒न् नु मर्ते॒ अक्रौ॑ ॥ १ १२० ०२
ता वि॒द्वांसा॑ हवामहे वां॒ ता नो॑ वि॒द्वांसा॒ मन्म॑ वोचेतम् अ॒द्य ।
प्रार्च॒द् दय॑मानो यु॒वाकुः॑ ॥ १ १२० ०३
वि पृ॑च्छामि पा॒क्या॒ ३॑ न दे॒वान् वष॑ट्कृतस्याद्भु॒तस्य॑ दस्रा ।
पा॒तं च॒ सह्य॑सो यु॒वं च॒ रभ्य॑सो नः ॥ १ १२० ०४
प्र या घोषे॒ भृग॑वाणे॒ न शोभे॒ यया॑ वा॒चा यज॑ति पज्रि॒यो वा॑म् ।
प्रैषयु॒र् न वि॒द्वान् ॥ १ १२० ०५
श्रु॒तं गा॑य॒त्रं तक॑वानस्या॒हं चि॒द् धि रि॒रेभा॑श्विना वाम् ।
आक्षी शु॑भस् पती॒ दन् ॥ १ १२० ०६
यु॒वं ह्य् आस्त॑म् म॒हो रन् यु॒वं वा॒ यन् नि॒रत॑तंसतम् ।
ता नो॑ वसू सुगो॒पा स्या॑तम् पा॒तं नो॒ वृका॑द् अघा॒योः ॥ १ १२० ०७
मा कस्मै॑ धातम् अ॒भ्य् अमि॒त्रिणे॑ नो॒ माकु॒त्रा॑ नो गृ॒हेभ्यो॑ धे॒नवो॑ गुः ।
स्त॒ना॒भुजो॑ अशि॑श्वीः ॥ १ १२० ०८
दु॒ही॒यन् मि॒त्रधि॑तये यु॒वाकु॑ रा॒ये च॑ नो मिमी॒तं वाज॑वत्यै ।
इ॒षे च॑ नो मिमीतं धे॒नुमत्यै॑ ॥ १ १२० ०९
अ॒श्विनो॑र् असनं॒ रथ॑म् अ॒नश्वं॑ वा॒जिनी॑वतोः ।
तेना॒हम् भूरि॑ चाकन ॥ १ १२० १०
अ॒यं स॑मह मा तनूह्याते॒ जना॒ँ अनु॑ ।
सो॒म॒पेयं॑ सु॒खो रथः॑ ॥ १ १२० ११
अध॒ स्वप्न॑स्य नि॒र् वि॒दे ऽभु॑ञ्जतश् च रे॒वतः॑ ।
उ॒भा ता बस्रि॑ नश्यतः ॥ १ १२० १२

कद् इ॒त्था नॄँः पात्रं॑ देवय॒तां श्रव॒द् गिरो॒ अङ्गि॑रसां तु॒रण्यन् ।
प्र यद् आन॒ड् विश॒ आ ह॒र्म्यस्यो॒रु क्रं॑सते अध्व॒रे यज॑त्रः ॥ १ १२१ ०१
स्तम्भी॑द् ध॒ द्यां स ध॒रुण॑म् प्रु॒षायद् ऋ॒भुर् वाजा॑य॒ द्रवि॑णं॒ नरो॒ गोः ।
अनु॑ स्व॒जाम् म॑हि॒षश् च॑क्षत॒ व्राम् मेना॒म् अश्व॑स्य॒ परि॑ मा॒तर॒ं गोः ॥ १ १२१ ०२

नक्षद् धवम् अरुणीः पूर्व्यं राट् तुरो विशाम् अङ्गिरसाम् अनु द्यून् ।
तक्षद् वज्रं नियुतं तस्तम्भद् द्यां चतुष्पदे नर्याय द्विपादे ॥ १ १२१ ०३
अस्य मदे स्वर्यं दा ऋतायापीवृतम् उस्रियाणाम् अनीकम् ।
यद् ध प्रसर्गे त्रिककुं निवर्तद् अप द्रुहो मानुषस्य दुरो वः ॥ १ १२१ ०४
तुभ्यम् पयो यत् पितराव् अनीतां राधः सुरेतस् तुरणे भुरण्यू ।
शुचि यत् ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥ १ १२१ ०५
अध प्र जज्ञे तरणिर् ममत्तु प्र रोच्य् अस्या उषसो न सूरः ।
इन्दुर् येभिर् आष्ट स्वेदुहव्यैः स्रुवेण सिञ्चञ् जरणाभि धाम ॥ १ १२१ ०६
स्विध्मा यद् वनधितिर् अपस्यात् सूरो अध्वरे परि रोधना गोः ।
यद् ध प्रभासि कृत्व्याँ अनु द्यून् अनर्विशे पश्विषे तुराय ॥ १ १२१ ०७
अष्टा महो दिव आदो हरी इह द्युम्नासाहम् अभि योधान उत्सम् ।
हरिं यत् ते मन्दिनं दुक्षन् वृधे गोरभसम् अद्रिभिर् वाताप्यम् ॥ १ १२१ ०८
त्वम् आयसम् प्रति वर्तयो गोर् दिवो अश्मानम् उपनीतम् ऋभ्वा ।
कुत्साय यत्र पुरुहूत वन्वञ् छुष्णम् अनन्तैः परियासि वधैः ॥ १ १२१ ०९
पुरा यत् सूरस् तमसो अपीतेस् तम् अद्रिवः फलिगं हेतिम् अस्य ।
शुष्णस्य चित् परिहितं यद् ओजो दिवस् परि सुग्रथितं तद् आदः ॥ १ १२१ १०
अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदताम् इन्द्र कर्मन् ।
त्वं वृत्रम् आशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥ १ १२१ ११
त्वम् इन्द्र नर्यो याँ अवो नॄन् तिष्ठा वातस्य सुयुजो वहिष्ठान् ।
यं ते काव्य उशना मन्दिनं दाद् वृत्रहणम् पार्यं ततक्ष वज्रम् ॥ १ १२१ १२
त्वं सूरो हरितो रामयो नॄन् भरच् चक्रम् एतशो नायम् इन्द्र ।
प्रास्य पारं नवतिं नाव्यानाम् अपि कर्तम् अवर्तयो ऽयज्यून् ॥ १ १२१ १३
त्वं नो अस्या इन्द्र दुर्हणायाः पाहि वज्रिवो दुरिताद् अभीके ।
प्र नो वाजान् रथ्यो ३ अश्वबुध्यान् इषे यन्धि श्रवसे सूनृतायै ॥ १ १२१ १४
मा सा ते अस्मत् सुमतिर् वि दसद् वाजप्रमहः सम् इषो वरन्त ।
आ नो भज मघवन् गोष्व् अर्यो मंहिष्ठास् ते सधमादः स्याम ॥ १ १२१ १५

प्र वः पान्तं रघुमन्यवो ऽन्धो यज्ञं रुद्राय मीळ्हुषे भरध्वम् ।
दिवो अस्तोष्य् असुरस्य वीरैर् इषुध्येव मरुतो रोदस्योः ॥ १ १२२ ०१
पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।
स्तरीर् नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥ १ १२२ ०२
ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतम् इन्द्रापर्वता युवं नस् तन् नो विश्वे वरिवस्यन्तु देवाः ॥ १ १२२ ०३
उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै ।
प्र वो नपातम् अपां कृणुध्वम् प्र मातरा रास्पिनस्यायोः ॥ १ १२२ ०४
आ वो रुवण्युम् औशिजो हुवध्यै घोषेव शंसम् अर्जुनस्य नंशे ।
प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिम् अग्नेः ॥ १ १२२ ०५
श्रुतम् मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम् ।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुर् अद्भिः ॥ १ १२२ ०६
स्तुषे सा वां वरुण मित्र रातिर् गवां शता पृक्षयामेषु पज्रे ।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन् ॥ १ १२२ ०७
अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः ।
जनो यः पज्रेभ्यो वाजिनीवान् अश्वावतो रथिनो मह्यं सूरिः ॥ १ १२२ ०८
जनो यो मित्रावरुणाव् अभिध्रुग् अपो न वां सुनोत्य् अक्ष्णयाध्रुक् ।
स्वयं स यक्ष्मं हृदये नि धत्त आप यद् ईं होत्राभिर् ऋतावा ॥ १ १२२ ०९
स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर् याति बाळ्हसृत्वा विश्वासु पृत्सु सदम् इच् छूरः ॥ १ १२२ १०
अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यन् निरवस्य राधः प्रशस्तये महिना रथवते ॥ १ १२२ ११
एतं शर्धं धाम यस्य सूरेर् इत्य् अवोचन् दशतयस्य नंशे ।
द्युम्नानि येषु वसुताती रारन् विश्वे सन्वन्तु प्रभृथेषु वाजम् ॥ १ १२२ १२
मन्दामहे दशतयस्य धासेर् द्विर् यत् पञ्च बिभ्रतो यन्त्य् अन्ना ।
किम् इष्टाश्व इष्टरश्मिर् एत ईशानासस् तरुष ऋञ्जते नॄन् ॥ १ १२२ १३
हिरण्यकर्णम् मणिग्रीवम् अर्णस् तन् नो विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सद्य आ जग्मुषीर् ओस्राश् चाकन्तूभयेष्व् अस्मे ॥ १ १२२ १४

चत्वारो मा मशर्शारस्य शिश्वस् त्रयो राज्ञ आयवसस्य जिष्णोः ।
रथो वाम् मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥ १ १२२ १५

पृथू रथो दक्षिणाया अयोज्य् ऐनं देवासो अमृतासो अस्थुः ।
कृष्णाद् उद् अस्थाद् अर्या ३ विहायाश् चिकित्सन्ती मानुषाय क्षयाय ॥ १ १२३ ०१
पूर्वा विश्वस्माद् भुवनाद् अबोधि जयन्ती वाजम् बृहती सनुत्री ।
उच्चा व्य् अख्यद् युवतिः पुनर्भूर् ओषा अगन् प्रथमा पूर्वहूतौ ॥ १ १२३ ०२
यद् अद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते ।
देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥ १ १२३ ०३
गृहं-गृहम् अहना यात्य् अच्छा दिवे-दिवे अधि नामा दधाना ।
सिषासन्ती द्योतना शश्वद् आगाद् अग्रम्-अग्रम् इद् भजते वसूनाम् ॥ १ १२३ ०४
भगस्य स्वसा वरुणस्य जामिर् उषः सूनृते प्रथमा जरस्व ।
पश्चा स दघ्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥ १ १२३ ०५
उद् ईरतां सूनृता उत् पुरंधीर् उद् अग्नयः शुशुचानासो अस्थुः ।
स्पार्हा वसूनि तमसापगूळ्हाविष् कृण्वन्त्य् उषसो विभातीः ॥ १ १२३ ०६
अपान्यद् एत्य् अभ्य् अ १ न्यद् एति विषुरूपे अहनी सं चरेते ।
परिक्षितोस् तमो अन्या गुहाकर् अद्यौद् उषाः शोशुचता रथेन ॥ १ १२३ ०७
सदृशीर् अद्य सदृशीर् इद् उ श्वो दीर्घं सचन्ते वरुणस्य धाम ।
अनवद्यास् त्रिंशतं योजनान्य् एकैका क्रतुम् परि यन्ति सद्यः ॥ १ १२३ ०८
जानत्य् अह्नः प्रथमस्य नाम शुक्रा कृष्णाद् अजनिष्ट श्वितीची ।
ऋतस्य योषा न मिनाति धामाहर्-अहर् निष्कृतम् आचरन्ती ॥ १ १२३ ०९
कन्येव तन्वा ३ शाशदानाँ एषि देवि देवम् इयक्षमाणम् ।
संस्मयमाना युवतिः पुरस्ताद् आविर् वक्षांसि कृणुषे विभाती ॥ १ १२३ १०
सुसंकाशा मातृमृष्टेव योषाविस् तन्वं कृणुषे दृशे कम् ।
भद्रा त्वम् उषो वितरं व्य् उच्छ न तत् ते अन्या उषसो नशन्त ॥ १ १२३ ११
अश्वावतीर् गोमतीर् विश्ववारा यतमाना रश्मिभिः सूर्यस्य ।
परा च यन्ति पुनर् आ च यन्ति भद्रा नाम वहमाना उषासः ॥ १ १२३ १२

ऋतस्य रश्मिम् अनुयच्छमाना भद्रम्-भद्रं क्रतुम् अस्मासु धेहि ।
उषो नो अद्य सुहवा व्य् उच्छास्मासु रायो मघवत्सु च स्युः ॥ १ १२३ १३

उषा उच्छन्ती समिधाने अग्ना उद्यन् सूर्य उर्विया ज्योतिर् अश्रेत् ।
देवो नो अत्र सविता न्व् अर्थम् प्रासावीद् द्विपत् प्र चतुष्पद् इत्यै ॥ १ १२४ ०१
अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।
ईयुषीणाम् उपमा शश्वतीनाम् आयतीनाम् प्रथमोषा व्य् अद्यौत् ॥ १ १२४ ०२
एषा दिवो दुहिता प्रत्य् अदर्शि ज्योतिर् वसाना समना पुरस्तात् ।
ऋतस्य पन्थाम् अन्व् एति साधु प्रजानतीव न दिशो मिनाति ॥ १ १२४ ०३
उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविर् अकृत प्रियाणि ।
अद्मसन् न ससतो बोधयन्ती शश्वत्तमागात् पुनर् एयुषीणाम् ॥ १ १२४ ०४
पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्य् अकृत प्र केतुम् ।
व्य् उ प्रथते वितरं वरीय ओभा पृणन्ती पित्रोर् उपस्था ॥ १ १२४ ०५
एवेद् एषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम् ।
अरेपसा तन्वा ३ शाशदाना नार्भाद् ईषते न महो विभाती ॥ १ १२४ ०६
अभ्रातेव पुंस एति प्रतीची गर्तारुग् इव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥ १ १२४ ०७
स्वसा स्वस्रे ज्यायस्यै योनिम् आरैग् अपैत्य् अस्याः प्रतिचक्ष्येव ।
व्युच्छन्ती रश्मिभिः सूर्यस्याञ्ज्य् अङ्क्ते समनगा इव व्राः ॥ १ १२४ ०८
आसाम् पूर्वासाम् अहसु स्वसॄणाम् अपरा पूर्वाम् अभ्य् एति पश्चात् ।
ताः प्रत्नवन् नव्यसीर् नूनम् अस्मे रेवद् उच्छन्तु सुदिना उषासः ॥ १ १२४ ०९
प्र बोधयोषः पृणतो मघोन्य् अबुध्यमानाः पणयः ससन्तु ।
रेवद् उच्छ मघवद्भ्यो मघोनि रेवत् स्तोत्रे सूनृते जारयन्ती ॥ १ १२४ १०
अवेयम् अश्वैद् युवतिः पुरस्ताद् युङ्क्ते गवाम् अरुणानाम् अनीकम् ।
वि नूनम् उच्छाद् असति प्र केतुर् गृहं-गृहम् उप तिष्ठाते अग्निः ॥ १ १२४ ११
उत् ते वयश् चिद् वसतेर् अपप्तन् नरश् च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वामम् उषो देवि दाशुषे मर्त्याय ॥ १ १२४ १२

अस्तोढ्वं स्तोम्या ब्रह्मणा मे ऽवीवृधध्वम् उशतीर् उषासः ।
युष्माकं देवीर् अवसा सनेम सहस्रिणं च शतिनं च वाजम् ॥ १ १२४ १३

प्राता रत्नम् प्रातरित्वा दधाति तं चिकित्वान् प्रतिगृह्या नि धत्ते ।
तेन प्रजां वर्धयमान आयू रायस् पोषेण सचते सुवीरः ॥ १ १२५ ०१
सुगुर् असत् सुहिरण्यः स्वश्वो बृहद् अस्मै वय इन्द्रो दधाति ।
यस् त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिम् उत्सिनाति ॥ १ १२५ ०२
आयम् अद्य सुकृतम् प्रातर् इच्छन्न् इष्टेः पुत्रं वसुमता रथेन ।
अंशोः सुतम् पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥ १ १२५ ०३
उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणन्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥ १ १२५ ०४
नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतम् अर्षन्ति सिन्धवस् तस्मा इयं दक्षिणा पिन्वते सदा ॥ १ १२५ ०५
दक्षिणावताम् इद् इमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावन्तो अमृतम् भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥ १ १२५ ०६
मा पृणन्तो दुरितम् एन आरन् मा जारिषुः सूरयः सुव्रतासः ।
अन्यस् तेषाम् परिधिर् अस्तु कश् चिद् अपृणन्तम् अभि सं यन्तु शोकाः ॥ १ १२५ ०७

अमन्दान् स्तोमान् प्र भरे मनीषा सिन्धाव् अधि क्षियतो भाव्यस्य ।
यो मे सहस्रम् अमिमीत सवान् अतूर्तो राजा श्रव इच्छमानः ॥ १ १२६ ०१
शतं राज्ञो नाधमानस्य निष्काञ् छतम् अश्वान् प्रयतान् सद्य आदम् ।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवो ऽजरम् आ ततान ॥ १ १२६ ०२
उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः ।
षष्टिः सहस्रम् अनु गव्यम् आगात् सनत् कक्षीवाँ अभिपित्वे अह्नाम् ॥ १ १२६ ०३
चत्वारिंशद् दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति ।

मदच्युतः कृशनावतो अत्यान् कक्षीवन्त उद् अमृक्षन्त पज्राः ॥ १ १२६ ०४
पूर्वाम् अनु प्रयतिम् आ ददे वस् त्रीन् युक्ताꣳ अष्टाव् अरिधायसो गाः ।
सुबन्धवो ये विश्या इव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः ॥ १ १२६ ०५
आगधिता परिगधिता या कशीकेव जङ्गहे ।
ददाति मह्यं यादुरी याशूनाम् भोज्या शता ॥ १ १२६ ०६
उपोप मे परा मृश मा मे दभ्राणि मन्यथाः ।
सर्वाहम् अस्मि रोमशा गन्धारीणाम् इवाविका ॥ १ १२६ ०७

अग्निं होतारम् मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिम् अनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥ १ १२७ ०१
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठम् अङ्गिरसां विप्र मन्मभिर् विप्रेभिः शुक्र मन्मभिः ।
परिज्मानम् इव द्यां होतारं चर्षणीनाम् ।
शोचिष्केशं वृषणं यम् इमा विशः प्रावन्तु जूतये विशः ॥ १ १२७ ०२
स हि पुरू चिद् ओजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर् न द्रुहंतरः ।
वीळु चिद् यस्य समृतौ श्रुवद् वनेव यत् स्थिरम् ।
निःषहमाणो यमते नायते धन्वासहा नायते ॥ १ १२७ ०३
दृळ्हा चिद् अस्मा अनु दुर् यथा विदे तेजिष्ठाभिर् अरणिभिर् दाष्ट्य् अवसे ऽग्नये दा
ष्ट्य् अवसे ।
प्र यः पुरूणि गाहते तक्षद् वनेव शोचिषा ।
स्थिरा चिद् अन्ना नि रिणात्य् ओजसा नि स्थिराणि चिद् ओजसा ॥ १ १२७ ०४
तम् अस्य पृक्षम् उपरासु धीमहि नक्तं यः सुदर्शतरो दिवातराद् अप्रायुषे दिवातरात् ।
आद् अस्यायुर् ग्रभणवद् वीळु शर्म न सूनवे ।
भक्तम् अभक्तम् अवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ॥ १ १२७ ०५
स हि शर्धो न मारुतं तुविष्वणिर् अप्नस्वतीषूर्वरास्व् इष्टनिर् आर्तनास्व् इष्टनिः ।
आदद् धव्यान्य् आददिर् यज्ञस्य केतुर् अर्हणा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां ।
नरः शुभे न पन्थाम् ॥ १ १२७ ०६

द्विता यद् ईं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः ।
अग्निर् ईशे वसूनां शुचिर् यो धर्णिर् एषाम् ।
प्रियाँ अपिधीँर् वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥ १ १२७ ०७
विश्वासां त्वा विशाम् पतिं हवामहे सर्वासां समानं दम्पतिम् भुजे सत्यगिर्वाहसम् भुजे ।
अतिथिम् मानुषाणाम् पितुर् न यस्यासया ।
अमी च विश्वे अमृतास आ वयो हव्या देवेष्व् आ वयः ॥ १ १२७ ०८
त्वम् अग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर् न देवतातये ।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
अध स्मा ते परि चरन्त्य् अजर श्रुष्टीवानो नाजर ॥ १ १२७ ०९
प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्व् अग्नये ।
प्रति यद् ईं हविष्मान् विश्वासु क्षासु जोगुवे ।
अग्रे रेभो न जरत ऋषूणां जूर्णिर् होत ऋषूणाम् ॥ १ १२७ १०
स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः सुचेतुना महो रायः सुचेतुना ।
महि शविष्ठ नस् कृधि संचक्षे भुजे अस्यै ।
महि स्तोतृभ्यो मघवन् सुवीर्यम् मथीर् उग्रो न शवसा ॥ १ १२७ ११

अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजाम् अनु व्रतम् अग्निः स्वम् अनु व्रतम् ।
विश्वश्रुष्टिः सखीयते रयिर् इव श्रवस्यते ।
अदब्धो होता नि षदद् इळस् पदे परिवीत इळस् पदे ॥ १ १२८ ०१
तं यज्ञसाधम् अपि वातयामस्य् ऋतस्य पथा नमसा हविष्मता देवताता हविष्मता ।
स न ऊर्जाम् उपाभृत्य् अया कृपा न जूर्यति ।
यम् मातरिश्वा मनवे परावतो देवम् भाः परावतः ॥ १ १२८ ०२
एवेन सद्यः पर्य् एति पार्थिवम् मुहुर्गी रेतो वृषभः कनिक्रदद् दधद् रेतः कनिक्रदत् ।
शतं चक्षाणो अक्षभिर् देवो वनेषु तुर्वणिः ।
सदो दधान उपरेषु सानुष्व् अग्निः परेषु सानुषु ॥ १ १२८ ०३

स सुक्रतुः पुरोहितो दमे-दमे ऽग्निर् यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति ।
क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ।
यतो घृतश्रीर् अतिथिर् अजायत वह्निर् वेधा अजायत ॥ १ १२८ ०४
क्रत्वा यद् अस्य तविषीषु पृञ्चते ऽग्नेर् अवेण मरुतां न भोज्ये ऽशिराय न भोज्या ।
स हि ष्मा दानम् इन्वति वसूनां च मज्मना ।
स नस् त्रासते दुरिताद् अभिह्रुतः शंसाद् अघाद् अभिह्रुतः ॥ १ १२८ ०५
विश्वो विहाया अरतिर् वसुर् दधे हस्ते दक्षिणे तरणिर् न शिश्रथच् छ्रवस्यया न शिश्रथत् ।
विश्वस्मा इद् इषुध्यते देवत्रा हव्यम् ओहिषे ।
विश्वस्मा इत् सुकृते वारम् ऋण्वत्य् अग्निर् द्वारा व्य् ऋण्वति ॥ १ १२८ ०६
स मानुषे वृजने शंतमो हितो ऽग्निर् यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः ।
स हव्या मानुषाणाम् इळा कृतानि पत्यते ।
स नस् त्रासते वरुणस्य धूर्तेर् महो देवस्य धूर्तेः ॥ १ १२८ ०७
अग्निं होतारम् ईळते वसुधितिम् प्रियं चेतिष्ठम् अरतिं न्य् एरिरे हव्यवाहं न्य् एरिरे ।
विश्वायुं विश्ववेदसं होतारं यजतं कविम् ।
देवासो रण्वम् अवसे वसूयवो गीर्भी रण्वं वसूयवः ॥ १ १२८ ०८

यं त्वं रथम् इन्द्र मेधसातये ऽपाका सन्तम् इषिर प्रणयसि प्रानवद्य नयसि ।
सद्यश् चित् तम् अभिष्टये करो वशश् च वाजिनम् ।
सास्माकम् अनवद्य तूतुजान वेधसाम् इमां वाचं न वेधसाम् ॥ १ १२९ ०१
स श्रुधि यः स्मा पृतनासु कासु चिद् दक्षाय्य इन्द्र भरहूतये नृभिर् असि प्रतूर्तये नृभिः ।
यः शूरैः स्व १ः सनिता यो विप्रैर् वाजं तरुता ।
तम् ईशानास इरधन्त वाजिनम् पृक्षम् अत्यं न वाजिनम् ॥ १ १२९ ०२
दस्मो हि ष्मा वृषणम् पिन्वसि त्वचं कं चिद् यावीर् अररुं शूर मर्त्यम् परिवृणक्षि मर्त्यम् ।
इन्द्रोत तुभ्यं तद् दिवे तद् रुद्राय स्वयशसे ।

मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥ १ १२९ ०३
अस्माकं व इन्द्रम् उश्मसीष्टये सखायं विश्वायुम् प्रासहं युजं वाजेषु प्रासहं युजम् ।
अस्माकम् ब्रह्मोतये ऽवा पृत्सुषु कासु चित् ।
नहि त्वा शत्रु स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥ १ १२९ ०४
नि षू नमातिमतिं कयस्य चित् तेजिष्ठाभिर् अरणिभिर् नोतिभिर् उग्राभिर् उग्रोतिभिः
।
नेषि णो यथा पुरानेनाः शूर मन्यसे ।
विश्वानि पूरोर् अप पर्षि वह्निर् आसा वह्निर् नो अच्छ ॥ १ १२९ ०५
प्र तद् वोचेयम् भव्यायेन्दवे हव्यो न य इषवान् मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मद् आ निदो वधैर् अजेत दुर्मतिम् ।
अव स्रवेद् अघशंसो ऽवतरम् अव क्षुद्रम् इव स्रवेत् ॥ १ १२९ ०६
वनेम तद् धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम् ।
दुर्मन्मानं सुमन्तुभिर् एम् इषा पृचीमहि ।
आ सत्याभिर् इन्द्रं द्युम्नहूतिभिर् यजत्रं द्युम्नहूतिभिः ॥ १ १२९ ०७
प्र-प्रा वो अस्मे स्वयशोभिर् ऊती परिवर्ग इन्द्रो दुर्मतीनां दरीमन् दुर्मतीनाम् ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।
हतेम् असन् न वक्षति क्षिप्ता जूर्णिर् न वक्षति ॥ १ १२९ ०८
त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्य् अरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
आहि नो दूराद् आराद् अभिष्टिभिः सदा पाह्य् अभिष्टिभिः ॥ १ १२९ ०९
त्वं न इन्द्र राया तरूषसोग्रं चित् त्वा महिमा सक्षद् अवसे महे मित्रं नावसे ।
ओजिष्ठ त्रातर् अविता रथं कं चिद् अमर्त्य ।
अन्यम् अस्मद् रिरिषेः कं चिद् अद्रिवो रिरिक्षन्तं चिद् अद्रिवः ॥ १ १२९ १०
पाहि न इन्द्र सुष्टुत स्रिधो ऽवयाता सदम् इद् दुर्मतीनां देवः सन् दुर्मतीनाम् ।
हन्ता पापस्य रक्षसस् त्राता विप्रस्य मावतः ।
अधा हि त्वा जनिता जीजनद् वसो रक्षोहणं त्वा जीजनद् वसो ॥ १ १२९ ११

एन्द्र याह्य उप नः परावतो नायम् अच्छा विदथानीव सत्पतिर् अस्तं राजेव सत्पतिः ।
हवामहे त्वा वयम् प्रयस्वन्तः सुते सचा ।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥ १ १३० ०१
पिबा सोमम् इन्द्र सुवानम् अद्रिभिः कोशेन सिक्तम् अवतं न वंसगस् तातृषाणो न वंसगः ।
मदाय हर्यताय ते तुविष्टमाय धायसे ।
आ त्वा यच्छन्तु हरितो न सूर्यम् अहा विश्वेव सूर्यम् ॥ १ १३० ०२
अविन्दद् दिवो निहितं गुहा निधिं वेर् न गर्भम् परिवीतम् अश्मन्य् अनन्ते अन्तर् अश्मनि ।
व्रजं वज्री गवाम् इव सिषासन्न् अङ्गिरस्तमः ।
अपावृणोद् इष इन्द्रः परीवृता द्वार इषः परीवृताः ॥ १ १३० ०३
दादृहाणो वज्रम् इन्द्रो गभस्त्योः क्षद्मेव तिग्मम् असनाय सं श्यद् अहिहत्याय सं श्यत् ।
संविव्यान ओजसा शवोभिर् इन्द्र मज्मना ।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥ १ १३० ०४
त्वं वृथा नद्य इन्द्र सर्तवे ऽच्छा समुद्रम् असृजो रथाँ इव वाजयतो रथाँ इव ।
इत ऊतीर् अयुञ्जत समानम् अर्थम् अक्षितम् ।
धेनूर् इव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥ १ १३० ०५
इमां ते वाचं वसूयन्त आयवो रथं न धीरः स्वपा अतक्षिषुः सुम्नाय त्वाम् अतक्षिषुः ।
शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम् ।
अत्यम् इव शवसे सातये धना विश्वा धनानि सातये ॥ १ १३० ०६
भिनत् पुरो नवतिम् इन्द्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो ।
अतिथिग्वाय शम्बरं गिरेर् उग्रो अवाभरत् ।
महो धनानि दयमान ओजसा विश्वा धनान्य् ओजसा ॥ १ १३० ०७
इन्द्रः समत्सु यजमानम् आर्यम् प्राव्द् विश्वेषु शतमूतिर् आजिषु स्वर्मीळ्हेष्व् आजिषु ।
मनवे शासद् अव्रतान् त्वचं कृष्णाम् अरन्धयत् ।
दक्षन् न विश्वं ततृषाणम् ओषति न्य् अर्शसानम् ओषति ॥ १ १३० ०८

सूरश् चक्रम् प्र वृहज् जात ओजसा प्रपित्वे वाचम् अरुणो मुषायती ऽशान आ मुषायति ।
उशना यत् परावतो ऽजगन्न् ऊतये कवे ।
सुम्नानि विश्वा मनुषेव तुर्वणिर् अहा विश्वेव तुर्वणिः ॥ १ १३० ०९
स नो नव्येभिर् वृषकर्मन्न् उक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः । दिवोदासेभिर् इन्द्र स्तवानो वावृधीथा अहोभिर् इव द्यौः ॥ १ १३० १०

इन्द्राय हि द्यौर् असुरो अनम्नतेन्द्राय मही पृथिवी वरीमभिर् द्युम्नसाता वरीमभिः ।
इन्द्रं विश्वे सजोषसो देवासो दधिरे पुरः ।
इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा ॥ १ १३१ ०१
विश्वेषु हि त्वा सवनेषु तुञ्जते समानम् एकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् ।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।
इन्द्रं न यज्ञैश् चितयन्त आयव स्तोमेभिर् इन्द्रम् आयवः ॥ १ १३१ ०२
वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः ।
यद् गव्यन्ता द्वा जना स्व १ र् यन्ता समूहसि ।
आविष् करिक्रद् वृषणं सचाभुवं वज्रम् इन्द्र सचाभुवम् ॥ १ १३१ ०३
विदुष् टे अस्य वीर्यस्य पूरवः पुरो यद् इन्द्र शारदीर् अवातिरः सासहानो अवातिरः ।
शासस् तम् इन्द्र मर्त्यम् अयज्युं शवसस् पते ।
महीम् अमुष्णाः पृथिवीम् इमा अपो मन्दसान इमा अपः ॥ १ १३१ ०४
आद् इत् ते अस्य वीर्यस्य चर्किरन् मदेषु वृषन्न् उशिजो यद् आविथ सखीयतो यद् आविथ ।
चकर्थ कारम् एभ्यः पृतनासु प्रवन्तवे ।
ते अन्याम्-अन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ॥ १ १३१ ०५
उतो नो अस्या उषसो जुषेत ह्य अ १ र्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः ।
यद् इन्द्र हन्तवे मृधो वृषा वज्रिन् चिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥ १ १३१ ०६

त्वं तम् इन्द्र वावृधानो अस्मयुर् अमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम् ।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः ।
रिष्टं न यामन्न् अप भूतु दुर्मतिर् विश्वाप भूतु दुर्मतिः ॥ १ १३१ ०७

त्वया वयम् मघवन् पूर्व्ये धन इन्द्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः ।
नेदिष्ठे अस्मिन्न् अहन्य् अधि वोचा नु सुन्वते ।
अस्मिन् यज्ञे वि चयेमा भरे कृतं वाजयन्तो भरे कृतम् ॥ १ १३२ ०१
स्वर्जेषे भर आप्रस्य वक्मन्य् उषर्बुधः स्वस्मिन्न् अञ्जसि क्राणस्य स्वस्मिन्न् अञ्जसि ।
अहन्न् इन्द्रो यथा विदे शीर्ष्णा-शीर्ष्णोपवाच्यः ।
अस्मत्रा ते सध्र्यक् सन्तु रातयो भद्रा भद्रस्य रातयः ॥ १ १३२ ०२
तत् तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन् यज्ञे वारम् अकृण्वत क्षयम् ऋतस्य वार् असि क्षयम् ।
वि तद् वोचेर् अध द्वितान्तः पश्यन्ति रश्मिभिः ।
स घा विदे अन्व् इन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः ॥ १ १३२ ०३
नू इत्था ते पूर्वथा च प्रवाच्यं यद् अङ्गिरोभ्यो ऽवृणोर् अप व्रजम् इन्द्र शिक्षन्न् अप व्रजम् ।
ऐभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च ।
सुन्वद्भ्यो रन्धया कं चिद् अव्रतं हृणायन्तं चिद् अव्रतम् ॥ १ १३२ ०४
सं यज् जनान् क्रतुभिः शूर ईक्षयद् धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः ।
तस्मा आयुः प्रजावद् इद् बाधे अर्चन्त्य् ओजसा ।
इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥ १ १३२ ०५
युवं तम् इन्द्रापर्वता पुरोयुधा यो नः पृतन्याद् अप तं-तम् इद् धतं वज्रेण तं-तम् इद् धतम् ।
दूरे चत्ताय छन्त्सद् गहनं यद् इनक्षत् ।
अस्माकं शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥ १ १३२ ०६

उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सम् महीर् अनिन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानम् परि तृळ्हा अशेरन् ॥ १ १३३ ०१
अभिव्लग्या चिद् अद्रिवः शीर्षा यातुमतीनाम् ।
छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥ १ १३३ ०२
अवासाम् मघवञ् जहि शर्धो यातुमतीनाम् ।
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥ १ १३३ ०३
यासां तिस्रः पञ्चाशतो ऽभिव्लङ्गैर् अपावपः ।
तत् सु ते मनायति तकत् सु ते मनायति ॥ १ १३३ ०४
पिशङ्गभृष्टिम् अम्भृणम् पिशाचिम् इन्द्र सम् मृण ।
सर्वं रक्षो नि बर्हय ॥ १ १३३ ०५
अवर् मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान् न भीषाँ अद्रिवः ।
शुष्मिन्तमो हि शुष्मिभिर् वधैर् उग्रेभिर् ईयसे ।
अपूरुषघ्नो अप्रतीत शूर सत्वभिस् त्रिसप्तैः शूर सत्वभिः ॥ १ १३३ ०६
वनोति हि सुन्वन् क्षयम् परीणसः सुन्वानो हि ष्मा यजत्य् अव द्विषो देवानाम् अव द्विषः ।
सुन्वान इत् सिषासति सहस्रा वाज्य् अवृतः ।
सुन्वानायेन्द्रो ददात्य् आभुवं रयिं ददात्य् आभुवम् ॥ १ १३३ ०७

आ त्वा जुवो रारहाणा अभि प्रयो वायो वहन्त्व् इह पूर्वपीतये सोमस्य पूर्वपीतये ।
ऊर्ध्वा ते अनु सूनृता मनस् तिष्ठतु जानती ।
नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥ १ १३४ ०१
मन्दन्तु त्वा मन्दिनो वायव् इन्दवो ऽस्मत् क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः ।
यद् ध क्राणा इरध्यै दक्षं सचन्त ऊतयः ।
सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः ॥ १ १३४ ०२
वायुर् युङ्क्ते रोहिता वायुर् अरुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा धुरि

वोळ्ह्वे ।
प्र बोधया पुरंधिं जार आ ससतीम् इव ।
प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥ १ १३४ ०३
तुभ्यम् उषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु ।
तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते ।
अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥ १ १३४ ०४
तुभ्यं शुक्रासः शुचयस् तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्य् अपाम् इषन्त भुर्वणि ।
त्वां त्सारी दसमानो भगम् ईट्टे तक्ववीये ।
त्वं विश्वस्माद् भुवनात् पासि धर्मणासुर्यात् पासि धर्मणा ॥ १ १३४ ०५
त्वं नो वायव् एषाम् अपूर्व्यः सोमानाम् प्रथमः पीतिम् अर्हसि सुतानाम् पीतिम् अर्हसि ।
उतो विहुत्मतीनां विशां ववर्जुषीणाम् ।
विश्वा इत् ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम् ॥ १ १३४ ०६

स्तीर्णम् बर्हिर् उप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर् नियुत्वते ।
तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।
प्र ते सुतासो मधुमन्तो अस्थिरन् मदाय क्रत्वे अस्थिरन् ॥ १ १३५ ०१
तुभ्यायं सोमः परिपूतो अद्रिभि स्पार्हा वसानः परि कोशम् अर्षति शुक्रा वसानो अर्षति ।
तवायम् भाग आयुषु सोमो देवेषु हूयते ।
वह वायो नियुतो याह्य अस्मयुर् जुषाणो याह्य अस्मयुः ॥ १ १३५ ०२
आ नो नियुद्भिः शतिनीभिर् अध्वरं सहस्रिणीभिर् उप याहि वीतये वायो हव्यानि वीतये ।
तवायम् भाग ऋत्वियः सरश्मिः सूर्ये सचा ।
अध्वर्युभिर् भरमाणा अयंसत वायो शुक्रा अयंसत ॥ १ १३५ ०३
आ वां रथो नियुत्वान् वक्षद् अवसे ऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये ।

पिबतम् मध्वो अन्धसः पूर्वपेयं हि वां हितम् ।
वायव् आ चन्द्रेण राधसा गतम् इन्द्रश् च राधसा गतम् ॥ १ १३५ ०४
आ वां धियो ववृत्युर् अध्वराꣳ उपेमम् इन्दुम् मर्मृजन्त वाजिनम् आशुम् अत्यं न वा
जिनम् ।
तेषाम् पिबतम् अस्मयू आ नो गन्तम् इहोत्या ।
इन्द्रवायू सुतानाम् अद्रिभिर् युवम् मदाय वाजदा युवम् ॥ १ १३५ ०५
इमे वां सोमा अप्स्व् आ सुता इहाध्वर्युभिर् भरमाणा अयंसत वायो शुक्रा अयंसत ।
एते वाम् अभ्य् असृक्षत तिरः पवित्रम् आशवः ।
युवायवो ऽति रोमाण्य् अव्यया सोमासो अत्य् अव्यया ॥ १ १३५ ०६
अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहम् इन्द्रश् च
गच्छतम् ।
वि सूनृता ददृशे रीयते घृतम् आ पूर्णया नियुता याथो अध्वरम् ।
इन्द्रश् च याथो अध्वरम् ॥ १ १३५ ०७
अत्राह तद् वहेथे मध्व आहुतिं यम् अश्वत्थम् उपतिष्ठन्त जायवो ऽस्मे ते सन्तु जायवः
।
साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो ।
नाप दस्यन्ति धेनवः ॥ १ १३५ ०८
इमे ये ते सु वायो बाह्वोजसो ऽन्तर् नदी ते पतयन्त्य् उक्षणो महि व्राधन्त उक्षणः ।
धन्वञ् चिद् ये अनाशवो जीराश् चिद् अगिरौकसः ।
सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर् दुर्नियन्तवः ॥ १ १३५ ०९

प्र सु ज्येष्ठं निचिराभ्याम् बृहन् नमो हव्यम् मतिम् भरता मृळयद्भ्यां स्वादिष्ठम् मृळ
यद्भ्याम् ।
ता सम्राजा घृतासुती यज्ञे-यज्ञ उपस्तुता ।
अथैनोः क्षत्रं न कुतश् चनाधृषे देवत्वं नू चिद् आधृषे ॥ १ १३६ ०१
अदर्शि गातुर् उरवे वरीयसी पन्था ऋतस्य सम् अयंस्त रश्मिभिश् चक्षुर् भगस्य र
श्मिभिः ।

द्यु॒क्षम् मि॒त्रस्य॒ साद॑नम् अर्य॑म्णो वरु॑णस्य च ।
अथा॑ दधाते बृ॒हद् उ॒क्थ्य॒ १॑ वय॑ उ॒पस्तुत्य॑म् बृ॒हद् वयः॑ ॥ १ १३६ ०२
ज्योति॑ष्मती॒म् अदि॑तिं धा॒रय॑त्क्षि॑तिं॒ स्वर्व॑ती॒म् आ स॑चेते दि॒वे-दि॑वे जागृ॒वांसा॑ दि॒वे-दि॑वे ।
ज्योति॑ष्मत् क्ष॒त्रम् आ॑शाते आदि॒त्या दानु॒न॑स् पती॑ ।
मि॒त्रस् तयो॒र् वरु॑णो यातयज्ज॑नो ऽर्य॑मा या॑त॒यज्ज॑नः ॥ १ १३६ ०३
अ॒यम् मि॒त्राय॒ वरु॑णाय॒ शंत॑मः॒ सोमो॑ भूत्व् अव॒पाने॒ष्व् आभ॑गो दे॒वो दे॒वेष्व् आभ॑गः ।
तं दे॒वासो॑ जुषेरत॒ विश्वे॑ अ॒द्य स॒जोष॑सः ।
तथा॑ राजाना करथो॒ यद् ईम॑ह॒ ऋता॑वाना॒ यद् ईम॑हे ॥ १ १३६ ०४
यो मि॒त्राय॒ वरु॑णा॒यावि॑ध॒ज् जनो॑ ऽन॒र्वाणं॒ तम् परि॑ पातो॒ अंह॑सो दा॒श्वांस॒म् मर्त॒म्
अंह॑सः ।
तम् अर्य॑माभि र॑क्षत्य् ऋजू॒यन्त॒म् अनु॑ व्र॒तम् ।
उ॒क्थैर् य ए॑नोः परि॒भूष॑ति व्र॒तं स्तोमै॑र् आ॒भूष॑ति व्र॒तम् ॥ १ १३६ ०५
नमो॑ दि॒वे बृ॒ह॒ते रोद॑सीभ्याम् मि॒त्राय॑ वोचं॒ वरु॑णाय मी॒ळ्हुषे॑ सुमृ॒ळी॒काय॑ मी॒ळ्हुषे॑ ।
इन्द्र॑म् अ॒ग्निम् उप॑ स्तुहि द्यु॒क्षम् अर्य॑मण॒म् भग॑म् ।
ज्योग् जीव॑न्तः प्र॒जया॑ सचेमहि॒ सोम॑स्यो॒ती स॑चेमहि ॥ १ १३६ ०६
ऊ॒ती दे॒वानां॑ व॒यम् इन्द्र॑वन्तो मंसीमहि॒ स्वय॑शसो म॒रुद्भिः॑ ।
अ॒ग्निर् मि॒त्रो वरु॑णः॒ शर्म॑ यंस॒न् तद् अ॑श्याम म॒घवा॑नो व॒यं च॑ ।

सु॒षु॒मा या॑त॒म् अद्रि॑भि॒र् गोश्री॑ता मत्स॒रा इ॒मे सोमा॑सो मत्स॒रा इ॒मे ।
आ रा॑जाना दिविस्पृशास्म॒त्रा ग॑न्त॒म् उप॑ नः ।
इ॒मे वा॑म् मित्रावरुणा॒ गवा॑शिरः॒ सोमाः॑ शु॒क्रा गवा॑शिरः ॥ १ १३७ ०१
इ॒म आ या॑त॒म् इन्द॑वः॒ सोमा॑सो॒ दध्या॑शिरः सु॒तासो॒ दध्या॑शिरः ।
उ॒त वा॑म् उ॒षसो॑ बु॒धि सा॒कं सूर्य॑स्य र॒श्मिभिः॑ ।
सु॒तो मि॒त्राय॒ वरु॑णाय पी॒तये॒ चारु॑र् ऋ॒ताय॑ पी॒तये॑ ॥ १ १३७ ०२
तां वां॑ धे॒नुं न वा॑स॒रीम् अं॒शुं दु॑ह॒न्त्य् अद्रि॑भि॒ः सोम॑ं दुह॒न्त्य् अद्रि॑भिः ।
अ॒स्मत्रा ग॑न्त॒म् उप॑ नो ऽर्वाञ्चा॒ सोम॑पीतये ।
अ॒यं वा॑म् मि॒त्रावरुणा॒ नृभिः॑ सु॒तः सोम॒ आ पी॒तये॑ सु॒तः ॥ १ १३७ ०३

प्र-प्र पूष्णस् तुविजातस्य शस्यते महित्वम् अस्य तवसो न तन्दते स्तोत्रम् अस्य न तन्दते ।
अर्चामि सुम्नयन्न् अहम् अन्त्यूतिम् मयोभुवम् ।
विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥ १ १३८ ०१
प्र हि त्वा पूषन्न् अजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ।
हुवे यत् त्वा मयोभुवं देवं सख्याय मर्त्यः ।
अस्माकम् आङ्गूषान् द्युम्निनस् कृधि वाजेषु द्युम्निनस् कृधि ॥ १ १३८ ०२
यस्य ते पूषन् सख्ये विपन्यवः क्रत्वा चित् सन्तो ऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।
ताम् अनु त्वा नवीयसीं नियुतं राय ईमहे ।
अहेळमान उरुशंस सरी भव वाजे-वाजे सरी भव ॥ १ १३८ ०३
अस्या ऊ षु ण उप सातये भुवो ऽहेळमानो ररिवाꣳ अजाश्व श्रवस्यताम् अजाश्व ।
ओ षु त्वा ववृतीमहि स्तोमेभिर् दस्म साधुभिः ।
नहि त्वा पूषन्न् अतिमन्य आघृणे न ते सख्यम् अपह्नुवे ॥ १ १३८ ०४

अस्तु श्रौषट् पुरो अग्नीं धिया दध आ नु तच् छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यद् ध क्राणा विवस्वति नाभा संदायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाꣳ अच्छा न धीतयः ॥ १ १३९ ०१
यद् ध त्यन् मित्रावरुणाव् ऋताद् अध्य् आददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना ।
युवोर् इत्थाधि सद्मस्व् अपश्याम हिरण्ययम् ॥ १ १३९ ०२
धीभिश् चन मनसा स्वेभिर् अक्षभिः सोमस्य स्वेभिर् अक्षभिः ॥ १ १३९ ०२
युवां स्तोमेभिर् देवयन्तो अश्विनाश्रावयन्त इव श्लोकम् आयवो युवां हव्याभ्य् आ ३

यवः॑ ।
यु॒वोर् विश्वा॒ अधि॒ श्रियः॒ पृक्ष॑श् च विश्ववेदसा ।
प्रु॒षा॒यन्ते॑ वाम् प॒वयो॑ हि॒रण्यये॒ रथे॑ दस्रा हि॒रण्यये॑ ॥ १ १३९ ०३
अचे॑ति दस्रा॒ व्य् उ॒१ नाक॑म् ऋण्वथो यु॒ञ्जते॑ वां र॒थ॒युजो॒ दिवि॑ष्टिष्व् अध्व॒स्मानो॒
दिवि॑ष्टिषु ।
अधि॑ वां॒ स्थाम॑ व॒न्धुरे॒ रथे॑ दस्रा हि॒रण्यये॑ ।
प॒थेव॒ यन्ता॑व् अनु॒शास॑ता॒ रजो ऽञ्ज॑सा॒ शास॑ता॒ रजः॑ ॥ १ १३९ ०४
शची॑भिर् नः शचीवसू॒ दिवा॒ नक्तं॑ दशस्यतम् ।
मा वां॑ रा॒तिर् उप॑ दस॒त् कदा॑ च॒नास्मद् रा॒तिः कदा॑ च॒न ॥ १ १३९ ०५
वृष॑न्न् इन्द्र वृष॒पाणा॑स॒ इन्द॑व इ॒मे सु॒ता अद्रि॑षुतास उ॒द्भिद॒स् तुभ्यं॑ सु॒तास॑ उ॒द्भिदः॑ ।
ते त्वा॑ मन्दन्तु दा॒वने॑ म॒हे चि॒त्राय॒ राध॑से ।
गीर्भि॑र् गिर्वाह॒ स्तव॑मान॒ आ ग॑हि सुमृळी॒को न॒ आ ग॑हि ॥ १ १३९ ०६
ओ षू णो॑ अग्ने शृणुहि॒ त्वम् ईळि॑तो दे॒वेभ्यो॑ ब्रवसि य॒ज्ञिये॑भ्यो॒ राज॑भ्यो य॒ज्ञिये॑भ्यः ।
यद् ध॒ त्याम् अङ्गि॑रोभ्यो धे॒नुं दे॑वा॒ अद॑त्तन ।
वि तां दु॑ह्रे अर्य॒मा क॒र्तरी॒ सचाँ॑ एष तां वे॑द मे॒ सचा॑ ॥ १ १३९ ०७
मो षु वो॑ अ॒स्मद् अ॒भि तानि॒ पौंस्या॒ सना॑ भूवन् द्यु॒म्नानि॒ मोत जा॑रिषुर् अ॒स्मत् पु
॒रोत जा॑रिषुः ।
यद् व॑श् चि॒त्रं यु॒गे-यु॑गे॒ नव्यं॑ घोषा॒द् अम॑र्त्यम् ।
अ॒स्मासु॒ तन् म॑रुतो॒ यच् च॑ दु॒ष्टरं॑ दिधृ॒ता यच् च॑ दु॒ष्टर॑म् ॥ १ १३९ ०८
द॒ध्यङ् ह॑ मे ज॒नुष॒म् पूर्वो॒ अङ्गि॑राः प्रि॒यमे॑धः॒ कण्वो॒ अत्रि॒र् मनु॑र् वि॒दुस् ते मे॒ पूर्वे॒ मनु॑र्
विदुः ।
तेषां॑ दे॒वेष्व् आय॑तिर् अ॒स्माकं॑ तेषु॒ नाभ॑यः ।
तेषा॑म् प॒देन॒ मह्य् आ न॑मे गि॒रेन्द्रा॒ग्नी आ न॑मे गि॒रा ॥ १ १३९ ०९
होता॑ यक्षद् व॒निनो॑ वन्त॒ वार्य॑म् बृह॒स्पति॑र् यजति वे॒न उ॒क्षभिः॑ पु॒रु॒वारे॑भिर् उ॒क्षभिः॑ ।
ज॒गृ॒भ्मा दू॒रआ॑दिशं॒ श्लोक॒म् अद्रे॒र् अध॒ त्मना॑ ।
अधा॑रयद् अ॒ररिन्दा॑नि सु॒क्रतुः॑ पु॒रू सद्मा॑नि सु॒क्रतुः॑ ॥ १ १३९ १०
ये दे॑वासो दि॒व्य् एका॑दश॒ स्थ पृ॑थि॒व्याम् अध्य् एका॑दश॒ स्थ ।
अ॒प्सुक्षितो॑ महि॒नैका॑दश॒ स्थ ते दे॑वासो य॒ज्ञम् इ॒मं जु॑षध्वम् ॥ १ १३९ ११

वेदिषदे प्रियधामाय सुद्युते धासिम् इव प्र भरा योनिम् अग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥ १ १४० ०१
अभि द्विजन्मा त्रिवृद् अन्नम् ऋज्यते संवत्सरे वावृधे जग्धम् ई पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्य् अ १ न्येन वनिनो मृष्ट वारणः ॥ १ १४० ०२
कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम् ।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतम् आ साच्यं कुपयं वर्धनम् पितुः ॥ १ १४० ०३
मुमुक्ष्वो ३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः ।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः ॥ १ १४० ०४
आद् अस्य ते ध्वसयन्तो वृथेरते कृष्णम् अभ्वम् महि वर्पः करिक्रतः ।
यत् सीम् महीम् अवनिम् प्राभि मर्मृशद् अभिश्वसन् स्तनयन्न् एति नानदत् ॥ १ १४० ०५
भूषन् न यो ऽधि बभ्रूषु नम्नते वृषेव पत्नीर् अभ्य् एति रोरुवत् ।
ओजायमानस् तन्वश् च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः ॥ १ १४० ०६
स संस्तिरो विष्टिरः सं गृभायति जानन्न् एव जानतीर् नित्य आ शये ।
पुनर् वर्धन्ते अपि यन्ति देव्यम् अन्यद् वर्पः पित्रोः कृण्वते सचा ॥ १ १४० ०७
तम् अग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास् तस्थुर् मम्रुषीः प्रायवे पुनः ।
तासां जराम् प्रमुञ्चन्न् एति नानदद् असुम् परं जनयञ् जीवम् अस्तृतम् ॥ १ १४० ०८
अधीवासम् परि मातू रिहन्न् अह तुविग्रेभिः सत्वभिर् याति वि ज्रयः ।
वयो दधत् पद्वते रेरिहत् सदानु श्येनी सचते वर्तनीर् अह ॥ १ १४० ०९
अस्माकम् अग्ने मघवत्सु दीदिह्य् अध श्वसीवान् वृषभो दमूनाः ।
अवास्या शिशुमतीर् अदीदेर् वर्मेव युत्सु परिजर्भुराणः ॥ १ १४० १०
इदम् अग्ने सुधितं दुर्धिताद् अधि प्रियाद् उ चिन् मन्मनः प्रेयो अस्तु ते ।
यत् ते शुक्रं तन्वो ३ रोचते शुचि तेनास्मभ्यं वनसे रत्नम् आ त्वम् ॥ १ १४० ११
रथाय नावम् उत नो गृहाय नित्यारित्राम् पद्वतीं रास्य् अग्ने ।
अस्माकं वीराꣳ उत नो मघोनो जनांश् च या पारयाच् छर्म या च ॥ १ १४० १२
अभी नो अग्न उक्थम् इज् जुगुर्या द्यावाक्षामा सिन्धवश् च स्वगूर्ताः ।

गव्यं यव्यं यन्तो दीर्घाहेषं वरम् अरुण्यो वरन्त ॥ १ १४० १३

बळ् इत्था तद् वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यद् ईम् उप ह्वरते साधते मतिर् ऋतस्य धेना अनयन्त सस्रुतः ॥ १ १४१ ०१
पृक्षो वपुः पितुमान् नित्य आ शये द्वितीयम् आ सप्तशिवासु मातृषु ।
तृतीयम् अस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥ १ १४१ ०२
निर् यद् ईम् बुध्नान् महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यद् ईम् अनु प्रदिवो मध्व आधवे गुहा सन्तम् मातरिश्वा मथायति ॥ १ १४१ ०३
प्र यत् पितुः परमान् नीयते पर्य् आ पृक्षुधो वीरुधो दंसु रोहति ।
उभा यद् अस्य जनुषं यद् इन्वत आद् इद् यविष्ठो अभवद् घृणा शुचिः ॥ १ १४१ ०४
आद् इन् मातॄर् आविशद् यास्व् आ शुचिर् अहिंस्यमान उर्विया वि वावृधे ।
अनु यत् पूर्वा अरुहत् सनाजुवो नि नव्यसीष्व् अवरासु धावते ॥ १ १४१ ०५
आद् इद् धोतारं वृणते दिविष्टिषु भगम् इव पपृचानास ऋञ्जते ।
देवान् यत् क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ॥ १ १४१ ०६
वि यद् अस्थाद् यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन् दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥ १ १४१ ०७
रथो न यातः शिक्वभिः कृतो द्याम् अङ्गेभिर् अरुषेभिर् ईयते ।
आद् अस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथाद् ईषते वयः ॥ १ १४१ ०८
त्वया ह्य् अग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः ।
यत् सीम् अनु क्रतुना विश्वथा विभुर् अरान् न नेमिः परिभूर् अजायथाः ॥ १ १४१ ०९
त्वम् अग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिम् इन्वसि ।
तं त्वा नु नव्यं सहसो युवन् वयम् भगं न कारे महिरत्न धीमहि ॥ १ १४१ १०
अस्मे रयिं न स्वर्थं दमूनसम् भगं दक्षं न पपृचासि धर्णसिम् ।
रश्मीर् इव यो यमति जन्मनी उभे देवानां शंसम् ऋत आ च सुक्रतुः ॥ १ १४१ ११
उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच् चन्द्ररथः ।
स नो नेषन् नेषतमैर् अमूरो ऽग्निर् वामं सुवितं वस्यो अच्छ ॥ १ १४१ १२

अस्ताव्य् अग्निः शिमीवद्भिर् अर्कैः साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष् टतन्युः ॥ १ १४१ १३

समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे ।
तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥ १ १४२ ०१
घृतवन्तम् उप मासि मधुमन्तं तनूनपात् ।
यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥ १ १४२ ०२
शुचिः पावको अद्भुतो मध्वा यज्ञम् मिमिक्षति ।
नराशंसः त्रिर् आ दिवो देवो देवेषु यज्ञियः ॥ १ १४२ ०३
ईळितो अग्न आ वहेन्द्रं चित्रम् इह प्रियम् ।
इयं हि त्वा मतिर् ममाच्छा सुजिह्व वच्यते ॥ १ १४२ ०४
स्तृणानासो यतस्रुचो बर्हिर् यज्ञे स्वध्वरे ।
वृञ्जे देवव्यचस्तमम् इन्द्राय शर्म सप्रथः ॥ १ १४२ ०५
वि श्रयन्ताम् ऋतावृधः प्रयै देवेभ्यो महीः ।
पावकासः पुरुस्पृहो द्वारो देवीर् असश्चतः ॥ १ १४२ ०६
आ भन्दमाने उपाके नक्तोषासा सुपेशसा ।
यह्वी ऋतस्य मातरा सीदताम् बर्हिर् आ सुमत् ॥ १ १४२ ०७
मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।
यज्ञं नो यक्षताम् इमं सिध्रम् अद्य दिविस्पृशम् ॥ १ १४२ ०८
शुचिर् देवेष्व् अर्पिता होत्रा मरुत्सु भारती ।
इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥ १ १४२ ०९
तन् नस् तुरीपम् अद्भुतम् पुरु वारम् पुरु त्मना ।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥ १ १४२ १०
अवसृजन्न् उप त्मना देवान् यक्षि वनस्पते ।
अग्निर् हव्या सुषूदति देवो देवेषु मेधिरः ॥ १ १४२ ११
पूषण्वते मरुत्वते विश्वदेवाय वायवे ।
स्वाहा गायत्रवेपसे हव्यम् इन्द्राय कर्तन ॥ १ १४२ १२

स्वाहाकृतान्य् आ गह्य् उप हव्यानि वीतये ।
इन्द्रा गहि श्रुधी हवं त्वां हवन्ते अध्वरे ॥ १ १४२ १३

प्र तव्यसीं नव्यसीं धीतिम् अग्नये वाचो मतिं सहसः सूनवे भरे ।
अपां नपाद् यो वसुभिः सह प्रियो होता पृथिव्यां न्य् असीदद् ऋत्वियः ॥ १ १४३ ०१
स जायमानः परमे व्योमन्य् आविर् अग्निर् अभवन् मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥ १ १४३ ०२
अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्य् अक्तुर् न सिन्धवो ऽग्ने रेजन्ते अससन्तो अजराः ॥ १ १४३ ०३
यम् एरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना ।
अग्निं तं गीर्भिर् हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥ १ १४३ ०४
न यो वराय मरुताम् इव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर् जम्भैस् तिगितैर् अत्ति भर्वति योधो न शत्रून् स वना न्य् ऋञ्जते ॥ १ १४३
०५
कुविन् नो अग्निर् उचथस्य वीर् असद् वसुष् कुविद् वसुभिः कामम् आवरत् ।
चोदः कुवित् तुतुज्यात् सातये धियः शुचिप्रतीकं तम् अया धिया गृणे ॥ १ १४३ ०६
घृतप्रतीकं व ऋतस्य धूर्षदम् अग्निम् मित्रं न समिधान ऋञ्जते ।
इन्धानो अक्रो विदथेषु दीद्यच् छुक्रवर्णाम् उद् उ नो यंसते धियम् ॥ १ १४३ ०७
अप्रयुच्छन्न् अप्रयुच्छद्भिर् अग्ने शिवेभिर् नः पायुभिः पाहि शग्मैः ।
अदब्धेभिर् अदृपितेभिर् इष्टे ऽनिमिषद्भिः परि पाहि नो जाः ॥ १ १४३ ०८

एति प्र होता व्रतम् अस्य माययोर्ध्वां दधानः शुचिपेशसं धियम् ।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥ १ १४४ ०१
अभीम् ऋतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपाम् उपस्थे विभृतो यद् आवसद् अध स्वधा अधयद् याभिर् ईयते ॥ १ १४४ ०२
युयूषतः सवयसा तद् इद् वपुः समानम् अर्थं वितरित्रता मिथः ।

आद् ईम् भगो न हव्यः सम् अस्मद् आ वोळ्हुर् न रश्मीन् सम् अयंस्त सारथिः ॥
१ १४४ ०३
यम् ईं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तम् पलितो युवाजनि पुरू चरन्न् अजरो मानुषा युगा ॥ १ १४४ ०४
तम् ईं हिन्वन्ति धीतयो दश व्रिशो देवम् मर्तास ऊतये हवामहे ।
धनोर् अधि प्रवत आ स ऋण्वत्य् अभिव्रजद्भिर् वयुना नवाधित ॥ १ १४४ ०५
त्वं ह्य् अग्ने दिव्यस्य राजसि त्वम् पार्थिवस्य पशुपा इव त्मना ।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिर् आशाते ॥ १ १४४ ०६
अग्ने जुषस्व प्रति हर्य तद् वचो मन्द्र स्वधाव ऋतजात सुक्रतो ।
यो विश्वतः प्रत्यङ्ङ् असि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षयः ॥ १ १४४ ०७

तम् पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्व् ईयते ।
तस्मिन् सन्ति प्रशिषस् तस्मिन्न् इष्टयः स वाजस्य शवसः शुष्मिणस् पतिः ॥ १ १४५
०१
तम् इत् पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यद् अग्रभीत् ।
न मृष्यते प्रथमं नापरं वचो ऽस्य क्रत्वा सचते अप्रदृपितः ॥ १ १४५ ०२
तम् इद् गच्छन्ति जुह्वस् तम् अर्वतीर् विश्वान्य् एकः शृणवद् वचांसि मे ।
पुरुप्रैषस् ततुरिर् यज्ञसाधनो ऽच्छिद्रोतिः शिशुर् आदत्त सं रभः ॥ १ १४५ ०३
उपस्थायं चरति यत् समारत सद्यो जातस् तत्सार युज्येभिः ।
अभि श्वान्तम् मृशते नान्द्ये मुदे यद् ईं गच्छन्त्य् उशतीर् अपिष्ठितम् ॥ १ १४५ ०४
स ईम् मृगो अप्यो वनर्गुर् उप त्वच्य् उपमस्यां नि धायि ।
व्य् अब्रवीद् वयुना मर्त्येभ्यो ऽग्निर् विद्वाँ ऋतचिद् धि सत्यः ॥ १ १४५ ०५

त्रिमूर्धानं सप्तरश्मिं गृणीषे ऽनूनम् अग्निम् पित्रोर् उपस्थे ।
निषत्तम् अस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ॥ १ १४६ ०१
उक्षा महाँ अभि ववक्ष एने अजरस् तस्थाव् इतऊतिर् ऋष्वः ।

उर्व्याः पदो नि दधाति सानौ रिहन्त्य् ऊधो अरुषासो अस्य ॥ १ १४६ ०२
समानं वत्सम् अभि संचरन्ती विष्वग् धेनू वि चरतः सुमेके ।
अनपवृज्याँ अध्वनो मिमाने विश्वान् केताँ अधि महो दधाने ॥ १ १४६ ०३
धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम् ।
सिषासन्तः पर्य् अपश्यन्त सिन्धुम् आविर् एभ्यो अभवत् सूर्यो नॄन् ॥ १ १४६ ०४
दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे ।
पुरुत्रा यद् अभवत् सूर् अहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ॥ १ १४६ ०५

कथा ते अग्ने शुचयन्त आयोर् ददाशुर् वाजेभिर् आशुषाणाः ।
उभे यत् तोके तनये दधाना ऋतस्य सामन् रणयन्त देवाः ॥ १ १४७ ०१
बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुस् ते तन्वं वन्दे अग्ने ॥ १ १४७ ०२
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरिताद् अरक्षन् ।
ररक्ष तान् सुकृतो विश्ववेदा दिप्सन्त इद् रिपवो नाह देभुः ॥ १ १४७ ०३
यो नो अग्ने अररिवाँ अघायुर् अरातीवा मर्चयति द्वयेन ।
मन्त्रो गुरुः पुनर् अस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥ १ १४७ ०४
उत वा यः सहस्य प्रविद्वान् मर्तो मर्तम् मर्चयति द्वयेन ।
अतः पाहि स्तवमान स्तुवन्तम् अग्ने माकिर् नो दुरिताय धायीः ॥ १ १४७ ०५

मथीद् यद् ईं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।
नि यं दधुर् मनुष्यासु विक्षु स्व १ र् ण चित्रं वपुषे विभावम् ॥ १ १४८ ०१
ददानम् इन् न ददभन्त मन्माग्निर् वरूथम् मम तस्य चाकन् ।
जुषन्त विश्वान्य् अस्य कर्मोपस्तुतिम् भरमाणस्य कारोः ॥ १ १४८ ०२
नित्ये चिन् नु यं सदने जगृभ्रे प्रशस्तिभिर् दधिरे यज्ञियासः ।
प्र सू नयन्त गृभयन्त इष्टाव् अश्वासो न रथ्यो रारहाणाः ॥ १ १४८ ०३
पुरूणि दस्मो नि रिणाति जम्भैर् आद् रोचते वन आ विभावा ।

आद् अस्य वातो अनु वाति शोचिर् अस्तुर् न शर्याम् असनाम् अनु द्यून् ॥ १ १४८ ०४
न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति ।
अन्धा अपश्या न दभन्न् अभिख्या नित्यास ईम् प्रेतारो अरक्षन् ॥ १ १४८ ०५

महः स राय एषते पतिर् दन्न् इन इनस्य वसुनः पद आ ।
उप ध्रजन्तम् अद्रयो विधन्न् इत् ॥ १ १४९ ०१
स यो वृषा नरां न रोदस्योः श्रवोभिर् अस्ति जीवपीतसर्गः ।
प्र यः सस्राणः शिश्रीत योनौ ॥ १ १४९ ०२
आ यः पुरं नार्मिणीम् अदीदेद् अत्यः कविर् नभन्यो नार्वा ।
सूरो न रुरुक्वाञ् छतात्मा ॥ १ १४९ ०३
अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।
होता यजिष्ठो अपां सधस्थे ॥ १ १४९ ०४
अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
मर्तो यो अस्मै सुतुको ददाश ॥ १ १४९ ०५

पुरु त्वा दाश्वान् वोचे ऽरिर् अग्ने तव स्विद् आ ।
तोदस्येव शरण आ महस्य ॥ १ १५० ०१
व्य् अनिनस्य धनिनः प्रहोषे चिद् अररुषः ।
कदा चन प्रजिगतो अदेवयोः ॥ १ १५० ०२
स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि ।
प्र-प्रेत् ते अग्ने वनुषः स्याम ॥ १ १५० ०३

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषाम् अवः ॥ १ १५१ ०१

यद् ध त्यद् वाम् पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।
अध क्रतुं विदतं गातुम् अर्चत उत श्रुतं वृषणा पस्त्यावतः ॥ १ १५१ ०२
आ वाम् भूषन् क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।
यद् ईम् ऋताय भरथो यद् अर्वते प्र होत्रया शिम्या वीथो अध्वरम् ॥ १ १५१ ०३
प्र सा क्षितिर् असुर या महि प्रिय ऋतावानाव् ऋतम् आ घोषथो बृहत् ।
युवं दिवो बृहतो दक्षम् आभुवं गां न धुर्य् उप युञ्जाथे अपः ॥ १ १५१ ०४
मही अत्र महिना वारम् ऋण्वथो ऽरेणवस् तुज आ सद्मन् धेनवः ।
स्वरन्ति ता उपरताति सूर्यम् आ निम्रुच उषसस् तक्ववीर् इव ॥ १ १५१ ०५
आ वाम् ऋताय केशिनीर् अनूषत मित्र यत्र वरुण गातुम् अर्चथः ।
अव त्मना सृजतम् पिन्वतं धियो युवं विप्रस्य मन्मनाम् इरज्यथः ॥ १ १५१ ०६
यो वां यज्ञैः शशमानो ह दाशति कविर् होता यजति मन्मसाधनः ।
उपाह तं गच्छथो वीथो अध्वरम् अच्छा गिरः सुमतिं गन्तम् अस्मयू ॥ १ १५१ ०७
युवां यज्ञैः प्रथमा गोभिर् अञ्जत ऋतावाना मनसो न प्रयुक्तिषु ।
भरन्ति वाम् मन्मना संयता गिरो ऽदृप्यता मनसा रेवद् आशाथे ॥ १ १५१ ०८
रेवद् वयो दधाथे रेवद् आशाथे नरा मायाभिर् इतऊति माहिनम् ।
न वां द्यावो ऽहभिर् नोत सिन्धवो न देवत्वम् पणयो नानशुर् मघम् ॥ १ १५१ ०९

युवं वस्त्राणि पीवसा वसाथे युवोर् अच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतम् अनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥ १ १५२ ०१
एतच् चन त्वो वि चिकेतद् एषां सत्यो मन्त्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिर् उग्रो देवनिदो ह प्रथमा अजूर्यन् ॥ १ १५२ ०२
अपाद् एति प्रथमा पद्वतीनां कस् तद् वाम् मित्रावरुणा चिकेत ।
गर्भो भारम् भरत्य् आ चिद् अस्य ऋतम् पिपर्त्य् अनृतं नि तारीत् ॥ १ १५२ ०३
प्रयन्तम् इत् परि जारं कनीनाम् पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानम् प्रियम् मित्रस्य वरुणस्य धाम ॥ १ १५२ ०४
अनश्वो जातो अनभीशुर् अर्वा कनिक्रदत् पतयद् ऊर्ध्वसानुः ।
अचित्तम् ब्रह्म जुजुषुर् युवानः प्र मित्रे धाम वरुणे गृणन्तः ॥ १ १५२ ०५

आ धेनवो मामतेयम् अवन्तीर् ब्रह्मप्रियम् पीपयन् सस्मिन्न् ऊधन् ।
पित्वो भिक्षेत वयुनानि विद्वान् आसाविवासन्न् अदितिम् उरुष्येत् ॥ १ १५२ ०६
आ वाम् मित्रावरुणा हव्यजुष्टिं नमसा देवाव् अवसा ववृत्याम् ।
अस्माकम् ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर् दिव्या सुपारा ॥ १ १५२ ०७

यजामहे वाम् महः सजोषा हव्येभिर् मित्रावरुणा नमोभिः ।
घृतैर् घृतस्नू अध यद् वाम् अस्मे अध्वर्यवो न धीतिभिर् भरन्ति ॥ १ १५३ ०१
प्रस्तुतिर् वां धाम न प्रयुक्तिर् अयामि मित्रावरुणा सुवृक्तिः ।
अनक्ति यद् वां विदथेषु होता सुम्नं वां सूरिर् वृषणाव् इयक्षन् ॥ १ १५३ ०२
पीपाय धेनुर् अदितिर् ऋताय जनाय मित्रावरुणा हविर्दे ।
हिनोति यद् वां विदथे सपर्यन् स रातहव्यो मानुषो न होता ॥ १ १५३ ०३
उत वां विक्षु मद्यास्व् अन्धो गाव आपश् च पीपयन्त देवीः ।
उतो नो अस्य पूर्व्यः पतिर् दन् वीतम् पातम् पयस उस्रियायाः ॥ १ १५३ ०४

विष्णोर् नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायद् उत्तरं सधस्थं विचक्रमाणस् त्रेधोरुगायः ॥ १ १५४ ०१
प्र तद् विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्व् अधिक्षियन्ति भुवनानि विश्वा ॥ १ १५४ ०२
प्र विष्णवे शूषम् एतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घम् प्रयतं सधस्थम् एको विममे त्रिभिर् इत् पदेभिः ॥ १ १५४ ०३
यस्य त्री पूर्णा मधुना पदान्य् अक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीम् उत द्याम् एको दाधार भुवनानि विश्वा ॥ १ १५४ ०४
तद् अस्य प्रियम् अभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुर् इत्था विष्णोः पदे परमे मध्व उत्सः ॥ १ १५४ ०५
ता वां वास्तून्य् उश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तद् उरुगायस्य वृष्णः परमम् पदम् अव भाति भूरि ॥ १ १५४ ०६

प्र वः॒ पान्त॒म् अन्ध॑सो धियाय॒ते म॒हे शूरा॑य॒ विष्ण॑वे चार्चत ।
या सानु॑नि॒ पर्व॑ताना॒म् अदा॑भ्या म॒हस् त॒स्थतु॒र् अर्व॑तेव सा॒धुना॑ ॥ १ १५५ ०१
त्वे॒षम् इ॒त्था स॒मर॑णं॒ शिमी॑वतो॒र् इन्द्रा॑विष्णू सुत॒पा वा॑म् उरुष्यति ।
या मर्त्या॑य प्रतिधी॒यमा॑न॒म् इत् कृ॒शानो॒र् अस्तु॑र् अस॒नाम् उ॑रु॒ष्यथः॑ ॥ १ १५५ ०२
ता ईं॑ वर्धन्ति म॒ह्य् अ॑स्य॒ पौंस्यं॒ नि मा॒तरा॑ नयति॒ रेत॑से भु॒जे ।
दधा॑ति पु॒त्रो ऽव॑र॒म् पर॑म् पि॒तुर् नाम॑ तृ॒तीय॒म् अधि॑ रोच॒ने दि॒वः ॥ १ १५५ ०३
तत्-त॒द् इद् अ॑स्य॒ पौंस्यं॑ गृणीमसी॒नस्य॑ त्रा॒तुर् अ॑वृ॒कस्य॑ मी॒ळ्हुषः॑ ।
यः पार्थि॑वानि त्रि॒भिर् इद् विगा॑मभिर् उ॒रु क्रमि॑ष्टोरुगा॒याय॑ जी॒वसे॑ ॥ १ १५५ ०४
द्वे इद् अ॑स्य॒ क्रम॑णे स्व॒र्दृशो॑ ऽभिख्या॒य मर्त्यो॑ भुरण्यति ।
तृ॒तीय॑म् अस्य॒ नकि॒र् आ द॑धर्षति॒ वय॑श् च॒न प॒तय॑न्तः पत॒त्रिणः॑ ॥ १ १५५ ०५
च॒तुर्भिः॑ सा॒कं न॑व॒तिं च॒ नाम॑भिश् च॒क्रं न वृ॒त्तं व्यतीँ॑र् अवीविपत् ।
बृ॒हच्छ॑रीरो वि॒मिमा॑न॒ ऋक्व॑भि॒र् युवाकु॑मारः॒ प्रत्य् ए॑त्य् आह॒वम् ॥ १ १५५ ०६

भवा॑ मि॒त्रो न शेव्यो॑ घृ॒तासु॑ति॒र् विभू॑तद्युम्न एव॒या उ॑ स॒प्रथाः॑ ।
अधा॑ ते विष्णो वि॒दुषा॑ चि॒द् अर्ध्य॒ स्तोमो॑ य॒ज्ञश् च॒ राध्यो॑ ह॒विष्म॑ता ॥ १ १५६ ०१
यः पू॒र्व्याय॑ वे॒धसे॒ नवी॑यसे सु॒मज्जा॑नये॒ विष्ण॑वे॒ ददा॑शति ।
यो जा॒तम् अ॑स्य मह॒तो महि॒ ब्रव॒त् सेद् उ॒ श्रवो॑भि॒र् युज्यं॑ चि॒द् अ॒भ्य् अस॒त् ॥ १
१५६ ०२
तम् उ॑ स्तोतारः पू॒र्व्यं यथा॑ वि॒द ऋ॒तस्य॒ गर्भं॑ ज॒नुषा॑ पिपर्तन ।
आस्य॑ जा॒नन्तो॒ नाम॑ चि॒द् विव॑क्तन म॒हस् ते॑ विष्णो सुम॒तिम् भ॑जामहे ॥ १ १५६ ०३
तम् अ॑स्य॒ राजा॒ वरु॑ण॒स् तम् अ॒श्विना॒ क्रतुं॑ सचन्त॒ मारु॑तस्य वे॒धसः॑ ।
दा॒धार॒ दक्ष॑म् उत्त॒मम् अ॑ह॒र्विदं॑ व्र॒जं च॒ विष्णुः॒ सखि॑वाँ अपोर्णु॒ते ॥ १ १५६ ०४
आ यो वि॒वाय॑ स॒चथा॑य॒ दैव्य॒ इन्द्रा॑य॒ विष्णुः॑ सु॒कृते॑ सु॒कृत्त॑रः ।
वे॒धा अ॑जिन्वत् त्रिषध॒स्थ आर्य॑म् ऋ॒तस्य॑ भा॒गे यज॑मान॒म् आभ॑जत् ॥ १ १५६ ०५

अबोध्य् अग्निर् ज्म उद् एति सूर्यो व्य् उ१ षाश् चन्द्रा मह्य आवो अर्चिषा ।
आयुक्षाताम् अश्विना यातवे रथम् प्रासावीद् देवः सविता जगत् पृथक् ॥ १ १५७ ०१
यद् युञ्जाथे वृषणम् अश्विना रथं घृतेन नो मधुना क्षत्रम् उक्षतम् ।
अस्माकम् ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ १ १५७ ०२
अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर् यातु सुष्टुतः ।
त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद् द्विपदे चतुष्पदे ॥ १ १५७ ०३
आ न ऊर्जं वहतम् अश्विना युवम् मधुमत्या नः कशया मिमिक्षतम् ।
प्रायुस् तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ १ १५७ ०४
युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्व् अन्तः ।
युवम् अग्निं च वृषणाव् अपश् च वनस्पतीर् अश्विनाव् ऐरयेथाम् ॥ १ १५७ ०५
युवं ह स्थो भिषजा भेषजेभिर् अथो ह स्थो रथ्या ३ राथ्येभिः ।
अथो ह क्षत्रम् अधि धत्थ उग्रा यो वां हविष्मान् मनसा ददाश ॥ १ १५७ ०६

वसू रुद्रा पुरुमन्तू वृधन्ता दशस्यतं नो वृषणाव् अभिष्टौ ।
दस्रा ह यद् रेक्ण औचथ्यो वाम् प्र यत् सस्राथे अकवाभिर् ऊती ॥ १ १५८ ०१
को वां दाशत् सुमतये चिद् अस्यै वसू यद् धेथे नमसा पदे गोः ।
जिगृतम् अस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरन्ता ॥ १ १५८ ०२
युक्तो ह यद् वां तौग्र्याय पेरुर् वि मध्ये अर्णसो धायि पज्रः ।
उप वाम् अवः शरणं गमेयं शूरो नाज्म पतयद्भिर् एवैः ॥ १ १५८ ०३
उपस्तुतिर् औचथ्यम् उरुष्येन् मा माम् इमे पतत्रिणी वि दुग्धाम् ।
मा माम् एधो दशतयश् चितो धाक् प्र यद् वाम् बद्धस् त्मनि खादति क्षाम् ॥ १
१५८ ०४
न मा गरन् नद्यो मातृतमा दासा यद् ईं सुसमुब्धम् अवाधुः ।
शिरो यद् अस्य त्रैतनो वितक्षत् स्वयं दास उरो अंसाव् अपि ग्ध ॥ १ १५८ ०५
दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे ।
अपाम् अर्थं यतीनाम् ब्रह्मा भवति सारथिः ॥ १ १५८ ०६

प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।
देवेभिर् ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥ १ १५९ ०१
उत मन्ये पितुर् अद्रुहो मनो मातुर् महि स्वतवस् तद् धवीमभिः ।
सुरेतसा पितरा भूम चक्रतुर् उरु प्रजाया अमृतं वरीमभिः ॥ १ १५९ ०२
ते सूनवः स्वपसः सुदंससो मही जज्ञुर् मातरा पूर्वचित्तये ।
स्थातुश् च सत्यं जगतश् च धर्मणि पुत्रस्य पाथः पदम् अद्वयाविनः ॥ १ १५९ ०३
ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।
नव्यं-नव्यं तन्तुम् आ तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ॥ १ १५९ ०४
तद् राधो अद्य सवितुर् वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ॥ १ १५९ ०५

ते हि द्यावापृथिवी विश्वशम्भुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनी धिषणे अन्तर् ईयते देवो देवी धर्मणा सूर्यः शुचिः ॥ १ १६० ०१
उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ।
सुधृष्टमे वपुष्ये ३ न रोदसी पिता यत् सीम् अभि रूपैर् अवासयत् ॥ १ १६० ०२
स वह्निः पुत्रः पित्रोः पवित्रवान् पुनाति धीरो भुवनानि मायया ।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रम् पयो अस्य दुक्षत ॥ १ १६० ०३
अयं देवानाम् अपसाम् अपस्तमो यो जजान रोदसी विश्वशम्भुवा ।
वि यो ममे रजसी सुक्रतूययाजरेभि स्कम्भनेभिः सम् आनृचे ॥ १ १६० ०४
ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।
येनाभि कृष्टीस् ततनाम विश्वहा पनाय्यम् ओजो अस्मे सम् इन्वतम् ॥ १ १६० ०५

किम् उ श्रेष्ठः किं यविष्ठो न आजगन् किम् ईयते दूत्यं१ कद् यद् ऊचिम ।
न निन्दिम चमसं यो महाकुलो ऽग्ने भ्रातर् द्रुण इद् भूतिम् ऊदिम ॥ १ १६१ ०१

एकं चमसं चतुरः कृणोतन तद् वो देवा अब्रुवन् तद् व आगमम् ।
सौधन्वना यद्य् एवा करिष्यथ साकं देवैर् यज्ञियासो भविष्यथ ॥ १ १६१ ०२
अग्निं दूतम् प्रति यद् अब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातर् अनु वः कृत्व्य् एमसि ॥ १ १६१ ०३
चकृवांस ऋभवस् तद् अपृच्छत क्वेद् अभूद् यः स्य दूतो न आजगन् ।
यदावाख्यच् चमसाञ् चतुरः कृतान् आद् इत् त्वष्टा ग्नास्व् अन्तर् न्य् आनजे ॥ १ १६१ ०४
हनामैनाः इति त्वष्टा यद् अब्रवीच् चमसं ये देवपानम् अनिन्दिषुः ।
अन्या नामानि कृण्वते सुते सचाः अन्यैर् एनान् कन्या नामभि स्परत् ॥ १ १६१ ०५
इन्द्रो हरी युयुजे अश्विना रथम् बृहस्पतिर् विश्वरूपाम् उपाजत ।
ऋभुर् विभ्वा वाजो देवाः अगच्छत स्वपसो यज्ञियम् भागम् ऐतन ॥ १ १६१ ०६
निश् चर्मणो गाम् अरिणीत धीतिभिर् या जरन्ता युवशा ताकृणोतन ।
सौधन्वना अश्वाद् अश्वम् अतक्षत युक्त्वा रथम् उप देवाः अयातन ॥ १ १६१ ०७
इदम् उदकम् पिबतेत्य् अब्रवीतनेदं वा घा पिबता मुञ्जनेजनम् ।
सौधन्वना यदि तन् नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥ १ १६१ ०८
आपो भूयिष्ठा इत्य् एको अब्रवीद् अग्निर् भूयिष्ठ इत्य् अन्यो अब्रवीत् ।
वधर्यन्तीम् बहुभ्यः प्रैको अब्रवीद् ऋता वदन्तश् चमसाः अपिंशत ॥ १ १६१ ०९
श्रोणाम् एक उदकं गाम् अवाजति मांसम् एकः पिंशति सूनयाभृतम् ।
आ निम्रुचः शकृद् एको अपाभरत् किं स्वित् पुत्रेभ्यः पितरा उपावतुः ॥ १ १६१ १०
उद्वत्स्व् अस्मा अकृणोतना तृणं निवत्स्व् अपः स्वपस्यया नरः ।
अगोह्यस्य यद् असस्तना गृहे तद् अद्येदम् ऋभवो नानु गच्छथ ॥ १ १६१ ११
सम्मील्य यद् भुवना पर्यसर्पत क्व स्वित् तात्या पितरा व आसतुः ।
अशपत यः करस्नं व आददे यः प्राब्रवीत् प्रो तस्मा अब्रवीतन ॥ १ १६१ १२
सुषुप्वांस ऋभवस् तद् अपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानम् बस्तो बोधयितारम् अब्रवीत् संवत्सर इदम् अद्या व्य् अख्यत ॥ १ १६१ १३
दिवा यान्ति मरुतो भूम्याग्निर् अयं वातो अन्तरिक्षेण याति ।
अद्भिर् याति वरुणः समुद्रैर् युष्माः इच्छन्तः शवसो नपातः ॥ १ १६१ १४

मा नो मित्रो वरुणो अर्यमायुर् इन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद् वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ १ १६२ ०१
यन् निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीताम् मुखतो नयन्ति ।
सुप्राङ् अजो मेम्यद् विश्वरूप इन्द्रापूष्णोः प्रियम् अप्य् एति पाथः ॥ १ १६२ ०२
एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत् पुरोळाशम् अर्वता त्वष्टेद् एनं सौश्रवसाय जिन्वति ॥ १ १६२ ०३
यद् धविष्यम् ऋतुशो देवयानं त्रिर् मानुषाः पर्य् अश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्न् अजः ॥ १ १६२ ०४
होताध्वर्युर् आवया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥ १ १६२ ०५
यूपव्रस्का उत ये यूपवाहाश् चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं सम्भरन्त्य् उतो तेषाम् अभिगूर्तिर् न इन्वतु ॥ १ १६२ ०६
उप प्रागात् सुमन् मे ऽधायि मन्म देवानाम् आशा उप वीतपृष्ठः ।
अन्व् एनं विप्रा ऋषयो मदन्ति देवानाम् पुष्टे चकृमा सुबन्धुम् ॥ १ १६२ ०७
यद् वाजिनो दाम संदानम् अर्वतो या शीर्षण्या रशना रज्जुर् अस्य ।
यद् वा घास्य प्रभृतम् आस्ये तृणं सर्वा ता ते अपि देवेष्व् अस्तु ॥ १ १६२ ०८
यद् अश्वस्य क्रविषो मक्षिकाश यद् वा स्वरौ स्वधितौ रिप्तम् अस्ति ।
यद् धस्तयोः शमितुर् यन् नखेषु सर्वा ता ते अपि देवेष्व् अस्तु ॥ १ १६२ ०९
यद् ऊवध्यम् उदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच् छमितारः कृण्वन्तूत मेधं शृतपाकम् पचन्तु ॥ १ १६२ १०
यत् ते गात्राद् अग्निना पच्यमानाद् अभि शूलं निहतस्यावधावति ।
मा तद् भूम्याम् आ श्रिषन् मा तृणेषु देवेभ्यस् तद् उशद्भ्यो रातम् अस्तु ॥ १ १६२ ११
ये वाजिनम् परिपश्यन्ति पक्वं य ईम् आहुः सुरभिर् निर् हरेति ।
ये चार्वतो मांसभिक्षाम् उपासत उतो तेषाम् अभिगूर्तिर् न इन्वतु ॥ १ १६२ १२
यन् नीक्षणम् मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणाम् अङ्काः सूनाः परि भूषन्त्य् अश्वम् ॥ १ १६२ १३
निक्रमणं निषदनं विवर्तनं यच् च पड्बीशम् अर्वतः ।

यच् च॑ प॒पौ यच् च॑ घा॒सिं ज॒घास॒ सर्वा॒ ता ते॒ अपि॑ दे॒वेष्व् अ॑स्तु ॥ १ १६२ १४
मा त्वा॒ग्निर् ध्व॑नयीद् धू॒मग॑न्धि॒र् मोखा भ्राज॑न्त्य् अ॒भि वि॑क्त॒ जघ्रिः॑ ।
इ॒ष्टं वी॒तम् अ॒भिगू॑र्तं॒ वष॑ट्कृतं॒ तं दे॒वासः॒ प्रति॑ गृभ्ण॒न्त्य् अश्व॑म् ॥ १ १६२ १५
यद् अश्वा॑य॒ वास॑ उपस्तृ॒णन्त्य् अ॑धीवा॒सं या हिर॑ण्यान्य् अस्मै ।
सं॒दान॒म् अर्व॑न्त॒म् पड्बी॑शम् प्रि॒या दे॒वेष्व् आ या॑मयन्ति ॥ १ १६२ १६
यत् ते॑ सा॒दे मह॑सा॒ शूकृ॑तस्य॒ पार्ष्ण्या॑ वा॒ कश॑या वा तु॒तोद॑ ।
स्रु॒चेव॒ ता ह॒विषो॑ अध्व॒रेषु॒ सर्वा॒ ता ते॒ ब्रह्म॑णा सूदयामि ॥ १ १६२ १७
चतु॑स्त्रिंशद् वा॒जिनो॑ दे॒वब॑न्धोर् व॒ङ्क्रीर् अश्व॑स्य॒ स्वधि॑तिः॒ सम् ए॑ति ।
अच्छि॑द्रा॒ गात्रा॑ व॒युना॑ कृणोत॒ परु॑ष्-परुर् अनु॒घुष्या॒ वि श॑स्त ॥ १ १६२ १८
एक॒स् त्वष्टु॒र् अश्व॑स्या विश॒स्ता द्वा य॒न्तारा॑ भवत॒स् तथ॑ ऋ॒तुः ।
या ते॒ गात्रा॑णाम् ऋतु॒था कृ॒णोमि॒ ता-ता॒ पिण्डा॑ना॒म् प्र जु॑होम्य् अ॒ग्नौ ॥ १ १६२ १९
मा त्वा॑ तपत् प्रि॒य आ॒त्मापि॒यन्त॒म् मा स्वधि॑तिस् त॒न्व १॒ आ ति॑ष्ठिपत् ते ।
मा ते॑ गृ॒ध्नुर् अ॑विश॒स्ताति॒हाय॑ छि॒द्रा गात्रा॑ण्य् अ॒सिना॒ मिथू॑ कः ॥ १ १६२ २०
न वा उ॑ ए॒तन् म्रि॑यसे॒ न रि॑ष्यसि दे॒वाँ इद् ए॑षि प॒थिभिः॑ सु॒गेभिः॑ ।
हरी॑ ते॒ युञ्जा॒ पृष॑ती अभूता॒म् उपा॑स्थाद् वा॒जी धु॒रि रास॑भस्य ॥ १ १६२ २१
सु॒गव्यं॑ नो वा॒जी स्वश्व्य॑म् पुं॒सः पु॒त्राँ उ॒त वि॑श्वा॒पुषं॑ र॒यिम् ।
अ॒ना॒गा॒स्त्वं नो॒ अदि॑तिः कृणोतु क्ष॒त्रं नो॒ अश्वो॑ वनतां ह॒विष्मा॑न् ॥ १ १६२ २२

यद् अक्र॑न्दः प्रथ॒मं जाय॑मान उ॒द्यन् स॑मु॒द्राद् उ॒त वा॒ पुरी॑षात् ।
श्ये॒नस्य॑ प॒क्षा ह॑रि॒णस्य॑ बा॒हू उ॑प॒स्तुत्य॒म् महि॑ जा॒तं ते॑ अर्वन् ॥ १ १६३ ०१
य॒मेन॑ द॒त्तं त्रि॒त ए॑नम् आयुन॒ग् इन्द्र॑ एणम् प्रथ॒मो अध्य् अ॑तिष्ठत् ।
ग॒न्ध॒र्वो अ॑स्य रश॒नाम् अ॑गृभ्णा॒त् सूरा॒द् अश्वं॑ वसवो॒ निर् अ॑तष्ट ॥ १ १६३ ०२
असि॑ य॒मो अस्य् आ॑दि॒त्यो अ॑र्व॒न्न् असि॑ त्रि॒तो गुह्ये॑न व्र॒तेन॑ ।
असि॒ सोमे॑न स॒मया॒ विपृ॑क्त आ॒हुस् ते॒ त्रीणि॑ दि॒वि बन्ध॑नानि ॥ १ १६३ ०३
त्रीणि॑ त आहु॒र् दि॒वि बन्ध॑नानि॒ त्रीण्य् अ॒प्सु त्रीण्य् अ॒न्तः स॑मु॒द्रे ।
उ॒तेव॑ मे॒ वरु॑णश् छन्त्स्य् अर्व॒न् यत्रा॑ त आ॒हुः प॑र॒मं ज॒नित्र॑म् ॥ १ १६३ ०४
इ॒मा ते॑ वाजिन्न् अव॒मार्ज॑नानी॒मा श॒फानां॑ सनि॒तुर् नि॒धाना॑ ।

अत्रा ते भद्रा रशना अपश्यम् ऋतस्य या अभिरक्षन्ति गोपाः ॥ १ १६३ ०५
आत्मानं ते मनसाराद् अजानाम् अवो दिवा पतयन्तम् पतंगम् ।
शिरो अपश्यम् पथिभिः सुगेभिर् अरेणुभिर् जेहमानम् पतत्रि ॥ १ १६३ ०६
अत्रा ते रूपम् उत्तमम् अपश्यं जिगीषमाणम् इष आ पदे गोः ।
यदा ते मर्तो अनु भोगम् आनळ् आद् इद् ग्रसिष्ठ ओषधीर् अजीगः ॥ १ १६३ ०७
अनु त्वा रथो अनु मर्यो अर्वन्न् अनु गावो ऽनु भगः कनीनाम् ।
अनु व्रातासस् तव सख्यम् ईयुर् अनु देवा ममिरे वीर्यं ते ॥ १ १६३ ०८
हिरण्यशृङ्गो ऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इद् अस्य हविरद्यम् आयन् यो अर्वन्तम् प्रथमो अध्यतिष्ठत् ॥ १ १६३ ०९
ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः ।
हंसा इव श्रेणिशो यतन्ते यद् आक्षिषुर् दिव्यम् अज्मम् अश्वाः ॥ १ १६३ १०
तव शरीरम् पतयिष्ण्व् अर्वन् तव चित्तं वात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥ १ १६३ ११
उप प्रागाच् छसनं वाज्य् अर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिर् अस्यानु पश्चात् कवयो यन्ति रेभाः ॥ १ १६३ १२
उप प्रागात् परमं यत् सधस्थम् अर्वाँ अच्छा पितरम् मातरं च ।
अद्या देवाञ् जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥ १ १६३ १३

अस्य वामस्य पलितस्य होतुस् तस्य भ्राता मध्यमो अस्त्य् अश्नः ।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥ १ १६४ ०१
सप्त युञ्जन्ति रथम् एकचक्रम् एको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रम् अजरम् अनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ १ १६४ ०२
इमं रथम् अधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्य् अश्वाः ।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥ १ १६४ ०३
को ददर्श प्रथमं जायमानम् अस्थन्वन्तं यद् अनस्था बिभर्ति ।
भूम्या असुर् असृग् आत्मा क्व स्वित् को विद्वांसम् उप गात् प्रष्टुम् एतत् ॥ १ १६४ ०४
पाकः पृच्छामि मनसाविजानन् देवानाम् एना निहिता पदानि ।

वत्से बष्कये ऽधि सप्त तन्तून् वि तत्निरे कवय ओतवा उ ॥ १ १६४ ०५
अचिकित्वाञ् चिकितुषश् चिद् अत्र कवीन् पृच्छामि विद्मने न विद्वान् ।
वि यस् तस्तम्भ षळ् इमा रजांस्य् अजस्य रूपे किम् अपि स्विद् एकम् ॥ १ १६४ ०६
इह ब्रवीतु य ईम् अङ्ग वेदास्य वामस्य निहितम् पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकम् पदापुः ॥ १ १६४ ०७
माता पितरम् ऋत आ बभाज धीत्य् अग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर् गर्भरसा निविद्धा नमस्वन्त इद् उपवाकम् ईयुः ॥ १ १६४ ०८
युक्ता मातासीद् धुरि दक्षिणाया अतिष्ठद् गर्भो वृजनीष्व् अन्तः ।
अमीमेद् वत्सो अनु गाम् अपश्यद् विश्वरूप्यं त्रिषु योजनेषु ॥ १ १६४ ०९
तिस्रो मातॄस् त्रीन् पितॄन् बिभ्रद् एक ऊर्ध्वस् तस्थौ नेम् अव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचम् अविश्वमिन्वाम् ॥ १ १६४ १०
द्वादशारं नहि तज् जराय वर्वर्ति चक्रम् परि द्याम् ऋतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश् च तस्थुः ॥ १ १६४ ११
पञ्चपादम् पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुर् अर्पितम् ॥ १ १६४ १२
पञ्चारे चक्रे परिवर्तमाने तस्मिन्न् आ तस्थुर् भुवनानि विश्वा ।
तस्य नाक्षस् तप्यते भूरिभारः सनाद् एव न शीर्यते सनाभिः ॥ १ १६४ १३
सनेमि चक्रम् अजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षु रजसैत्य् आवृतं तस्मिन्न् आर्पिता भुवनानि विश्वा ॥ १ १६४ १४
साकंजानां सप्तथम् आहुर् एकजं षळ् इद् यमा ऋषयो देवजा इति ।
तेषाम् इष्टानि विहितानि धामश स्थात्रे रेजन्ते विकृतानि रूपशः ॥ १ १६४ १५
स्त्रियः सतीस् ताँउ मे पुंस आहुः पश्यद् अक्षण्वान् न वि चेतद् अन्धः ।
कविर् यः पुत्रः स ईम् आ चिकेत यस् ता विजानात् स पितुष् पितासत् ॥ १ १६४ १६
अवः परेण पर एनावरेण पदा वत्सम् बिभ्रती गौर् उद् अस्थात् ।
सा कद्रीची कं स्विद् अर्धम् परागात् क्व स्वित् सूते नहि यूथे अन्तः ॥ १ १६४ १७
अवः परेण पितरं यो अस्यानुवेद पर एनावरेण ।
कवीयमानः क इह प्र वोचद् देवम् मनः कुतो अधि प्रजातम् ॥ १ १६४ १८
ये अर्वाञ्चस् ताँउ पराच आहुर् ये पराञ्चस् ताँउ अर्वाच आहुः ।

इन्द्रश् च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥ १ १६४ १९
द्वा सुपर्णा सयुजा सखाया समानं वृक्षम् परि षस्वजाते ।
तयोर् अन्यः पिप्पलं स्वाद्व् अत्त्य् अनश्नन्न् अन्यो अभि चाकशीति ॥ १ १६४ २०
यत्रा सुपर्णा अमृतस्य भागम् अनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकम् अत्रा विवेश ॥ १ १६४ २१
यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येद् आहुः पिप्पलं स्वाद्व् अग्रे तन् नोन् नशद् यः पितरं न वेद ॥ १ १६४ २२
यद् गायत्रे अधि गायत्रम् आहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत ।
यद् वा जगज् जगत्य् आहितम् पदं य इत् तद् विदुस् ते अमृतत्वम् आनशुः ॥ १
१६४ २३
गायत्रेण प्रति मिमीते अर्कम् अर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥ १ १६४ २४
जगता सिन्धुं दिव्य् अस्तभायद् रथंतरे सूर्यम् पर्य् अपश्यत् ।
गायत्रस्य समिधस् तिस्र आहुस् ततो मह्ना प्र रिरिचे महित्वा ॥ १ १६४ २५
उप ह्वये सुदुघां धेनुम् एतां सुहस्तो गोधुग् उत दोहद् एनाम् ।
श्रेष्ठं सवं सविता साविषन् नो ऽभीद्धो घर्मस् तद् उ षु प्र वोचम् ॥ १ १६४ २६
हिङ्कृण्वती वसुपत्नी वसूनां वत्सम् इच्छन्ती मनसाभ्य् आगात् ।
दुहाम् अश्विभ्याम् पयो अघ्न्येयं सा वर्धताम् महते सौभगाय ॥ १ १६४ २७
गौर् अमीमेद् अनु वत्सम् मिषन्तम् मूर्धानं हिङ्ङ् अकृणोन् मातवा उ ।
सृक्वाणं घर्मम् अभि वावशाना मिमाति मायुम् पयते पयोभिः ॥ १ १६४ २८
अयं स शिङ्क्ते येन गौर् अभीवृता मिमाति मायुं ध्वसनाव् अधि श्रिता ।
सा चित्तिभिर् नि हि चकार मर्त्यं विद्युद् भवन्ती प्रति वव्रिम् औहत ॥ १ १६४ २९
अनच् छये तुरगातु जीवम् एजद् ध्रुवम् मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिर् अमर्त्यो मर्त्येना सयोनिः ॥ १ १६४ ३०
अपश्यं गोपाम् अनिपद्यमानम् आ च परा च पथिभिश् चरन्तम् ।
स सध्रीचीः स विषूचीर् वसान आ वरीवर्ति भुवनेष्व् अन्तः ॥ १ १६४ ३१
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुग् इन् नु तस्मात् ।
स मातुर् योना परिवीतो अन्तर् बहुप्रजा निरृतिम् आ विवेश ॥ १ १६४ ३२

द्यौर् मे पिता जनिता नाभिर् अत्र बन्धुर् मे माता पृथिवी महीयम् ।
उत्तानयोश् चम्वो ३ र् योनिर् अन्तर् अत्रा पिता दुहितुर् गर्भम् आधात् ॥ १ १६४ ३३
पृच्छामि त्वा परम् अन्तम् पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ १ १६४ ३४
इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ १ १६४ ३५
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस् तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर् मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥ १ १६४ ३६
न वि जानामि यद् इवेदम् अस्मि निण्यः संनद्धो मनसा चरामि ।
यदा मागन् प्रथमजा ऋतस्याद् इद् वाचो अश्नुवे भागम् अस्याः ॥ १ १६४ ३७
अपाङ् प्राङ् एति स्वधया गृभीतो ऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य् अ १ न्यं चिक्युर् न नि चिक्युर् अन्यम् ॥ १ १६४ ३८
ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस् तन् न वेद किम् ऋचा करिष्यति य इत् तद् विदुस् त इमे सम् आसते ॥ १ १६४ ३९
सूयवसाद् भगवती हि भूया अथो वयम् भगवन्तः स्याम ।
अद्धि तृणम् अघ्न्ये विश्वदानीम् पिब शुद्धम् उदकम् आचरन्ती ॥ १ १६४ ४०
गौरीर् मिमाय सलिलानि तक्षत्य् एकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ १ १६४ ४१
तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश् चतस्रः ।
ततः क्षरत्य् अक्षरं तद् विश्वम् उप जीवति ॥ १ १६४ ४२
शकमयं धूमम् आराद् अपश्यं विषूवता पर एनावरेण ।
उक्षाणम् पृश्निम् अपचन्त वीरास् तानि धर्माणि प्रथमान्य् आसन् ॥ १ १६४ ४३
त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वम् एको अभि चष्टे शचीभिर् ध्राजिर् एकस्य ददृशे न रूपम् ॥ १ १६४ ४४
चत्वारि वाक् परिमिता पदानि तानि विदुर् ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ १ १६४ ४५

इन्द्रम् मित्रं वरुणम् अग्निम् आहुर् अथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्त्य् अग्निं यमम् मातरिश्वानम् आहुः ॥ १ १६४ ४६
कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवम् उत् पतन्ति ।
त आववृत्रन् सदनाद् ऋतस्याद् इद् घृतेन पृथिवी व्य् उद्यते ॥ १ १६४ ४७
द्वादश प्रधयश् चक्रम् एकं त्रीणि नभ्यानि क उ तच् चिकेत ।
तस्मिन् साकं त्रिशता न शङ्कवो ऽर्पिताः षष्टिर् न चलाचलासः ॥ १ १६४ ४८
यस् ते स्तनः शशयो यो मयोभूर् येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद् यः सुदत्रः सरस्वति तम् इह धातवे कः ॥ १ १६४ ४९
यज्ञेन यज्ञम् अयजन्त देवास् तानि धर्माणि प्रथमान्य् आसन् ।
ते ह नाकम् महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १ १६४ ५०
समानम् एतद् उदकम् उच् चैत्य् अव चाहभिः ।
भूमिम् पर्जन्या जिन्वन्ति दिवं जिन्वन्त्य् अग्नयः ॥ १ १६४ ५१
दिव्यं सुपर्णं वायसम् बृहन्तम् अपां गर्भं दर्शतम् ओषधीनाम् ।
अभीपतो वृष्टिभिस् तर्पयन्तं सरस्वन्तम् अवसे जोहवीमि ॥ १ १६४ ५२

कया शुभा सवयसः सनीळाः समान्या मरुतः सम् मिमिक्षुः ।
कया मती कुत एतास एते ऽर्चन्ति शुष्मं वृषणो वसूया ॥ १ १६५ ०१
कस्य ब्रह्माणि जुजुषुर् युवानः को अध्वरे मरुत आ ववर्त ।
श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम ॥ १ १६५ ०२
कुतस् त्वम् इन्द्र माहिनः सन्न् एको यासि सत्पते किं त इत्था ।
सम् पृच्छसे समराणः शुभानैर् वोचेस् तन् नो हरिवो यत् ते अस्मे ॥ १ १६५ ०३
ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आ शासते प्रति हर्यन्त्य् उक्थेमा हरी वहतस् ता नो अच्छ ॥ १ १६५ ०४
अतो वयम् अन्तमेभिर् युजानाः स्वक्षत्रेभिस् तन्व १ : शुम्भमानाः ।
महोभिर् एताँ उप युज्महे न्व् इन्द्र स्वधाम् अनु हि नो बभूथ ॥ १ १६५ ०५
क्व १ स्या वो मरुतः स्वधासीद् यन् माम् एकं समधत्ताहिहत्ये ।
अहं ह्य ऊ ३ ग्रस् तविषस् तुविष्मान् विश्वस्य शत्रोर् अनमं वधस्नैः ॥ १ १६५ ०६

भूरि चकर्थ युज्येभिर् अस्मे समानेभिर् वृषभ पौंस्येभिः ।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद् वशाम ॥ १ १६५ ०७
वधीं वृत्रम् मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।
अहम् एता मनवे विश्वश्चन्द्राः सुगा अपश् चकर वज्रबाहुः ॥ १ १६५ ०८
अनुत्तम् आ ते मघवन् नकिर् नु न त्वावाँ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ १ १६५ ०९
एकस्य चिन् मे विभ्व् अ१ स्त्व् ओजो या नु दधृष्वान् कृणवै मनीषा ।
अहं ह्य् ऊ ३ ग्रो मरुतो विदानो यानि च्यवम् इन्द्र इद् ईश एषाम् ॥ १ १६५ १०
अमन्दन् मा मरुत स्तोमो अत्र यन् मे नरः श्रुत्यम् ब्रह्म चक्र ।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस् तन्वे तनूभिः ॥ १ १६५ ११
एवेद् एते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।
संचक्ष्या मरुतश् चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥ १ १६५ १२
को न्व् अत्र मरुतो मामहे वः प्र यातन सखीँर् अच्छा सखायः ।
मन्मानि चित्रा अपिवातयन्त एषाम् भूत नवेदा म ऋतानाम् ॥ १ १६५ १३
आ यद् दुवस्याद् दुवसे न कारुर् अस्माञ् चक्रे मान्यस्य मेधा ।
ओ षु वर्त्त मरुतो विप्रम् अच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥ १ १६५ १४
एष व स्तोमो मरुत इयं गीर् मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १ १६५ १५

तन् नु वोचाम रभसाय जन्मने पूर्वम् महित्वं वृषभस्य केतवे ।
ऐधेव यामन् मरुतस् तुविष्वणो युधेव शक्रास् तविषाणि कर्तन ॥ १ १६६ ०१
नित्यं न सूनुम् मधु बिभ्रत उप क्रीळन्ति क्रीळा विदथेषु घृष्वयः ।
नक्षन्ति रुद्रा अवसा नमस्विनं न मर्धन्ति स्वतवसो हविष्कृतम् ॥ १ १६६ ०२
यस्मा ऊमासो अमृता अरासत रायस् पोषं च हविषा ददाशुषे ।
उक्षन्त्य् अस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ॥ १ १६६ ०३
आ ये रजांसि तविषीभिर् अव्यत प्र व एवासः स्वयतासो अध्रजन् ।
भयन्ते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्व् ऋष्टिषु ॥ १ १६६ ०४

यत् त्वेषयामा नदयन्त पर्वतान् दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन् भयते वनस्पती रथीयन्तीव प्र जिहीत ओषधिः ॥ १ १६६ ०५
यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिम् पिपर्तन ।
यत्रा वो दिद्युद् रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥ १ १६६ ०६
प्र स्कम्भदेष्णा अनवभ्रराधसो ऽलातृणासो विदथेषु सुष्टुताः ।
अर्चन्त्य् अर्कम् मदिरस्य पीतये विदुर् वीरस्य प्रथमानि पौंस्या ॥ १ १६६ ०७
शतभुजिभिस् तम् अभिह्रुतेर् अघात् पूर्भी रक्षता मरुतो यम् आवत ।
जनं यम् उग्रास् तवसो विरप्शिनः पाथना शंसात् तनयस्य पुष्टिषु ॥ १ १६६ ०८
विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्य् आहिता ।
अंसेष्व् आ वः प्रपथेषु खादयो ऽक्षो वश् चक्रा समया वि वावृते ॥ १ १६६ ०९
भूरीणि भद्रा नर्येषु बाहुषु वक्षस्सु रुक्मा रभसासो अञ्जयः ।
अंसेष्व् एताः पविषु क्षुरा अधि वयो न पक्षान् व्य् अनु श्रियो धिरे ॥ १ १६६ १०
महान्तो मह्ना विभ्वो ३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।
मन्द्राः सुजिह्वाः स्वरितार आसभिः सम्मिश्ला इन्द्रे मरुतः परिष्टुभः ॥ १ १६६ ११
तद् वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रम् अदितेर् इव व्रतम् ।
इन्द्रश् चन त्यजसा वि ह्रुणाति तज् जनाय यस्मै सुकृते अराध्वम् ॥ १ १६६ १२
तद् वो जामित्वम् मरुतः परे युगे पुरू यच् छंसम् अमृतास आवत ।
अया धिया मनवे श्रुष्टिम् आव्या साकं नरो दंसनैर् आ चिकित्रिरे ॥ १ १६६ १३
येन दीर्घम् मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।
आ यत् ततनन् वृजने जनास एभिर् यज्ञेभिस् तद् अभीष्टिम् अश्याम् ॥ १ १६६ १४
एष व स्तोमो मरुत इयं गीर् मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १ १६६ १५

सहस्रं त इन्द्रोतयो नः सहस्रम् इषो हरिवो गूर्ततमाः ।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः ॥ १ १६७ ०१
आ नो ऽवोभिर् मरुतो यान्त्व् अच्छा ज्येष्ठेभिर् वा बृहद्दिवैः सुमायाः ।
अध यद् एषां नियुतः परमाः समुद्रस्य चिद् धनयन्त पारे ॥ १ १६७ ०२

मि॒म्यक्ष येषु॒ सुधि॑ता घृ॒ताची॒ हिर॑ण्यनिर्णि॒ग् उप॑रा॒ न ऋ॒ष्टिः ।
गुहा॒ चर॑न्ती॒ मनु॑षो॒ न योषा॑ स॒भाव॑ती विद॒थ्ये॑व॒ सं वाक् ॥ १ १६७ ०३
परा॑ शु॒भ्रा अ॒यासो॑ य॒व्या सा॑धार॒ण्येव॑ म॒रुतो॑ मिमिक्षुः ।
न रो॑द॒सी अप॑ नुदन्त घो॒रा जु॒षन्त॒ वृधं॑ स॒ख्याय॑ दे॒वाः ॥ १ १६७ ०४
जोष॒द् यद् ईम् असु॒र्या स॒चध्यै॒ विषि॑तस्तुका रोद॒सी नृ॒मणाः॑ ।
आ सू॒र्येव॑ विध॒तो रथं॑ गात् त्वे॒षप्र॑तीका॒ नभ॑सो॒ नेत्या ॥ १ १६७ ०५
आस्था॑पयन्त युव॒तिं युवा॑नः शु॒भे निमि॑श्लां वि॒दथे॑षु प॒ज्राम् ।
अ॒र्को यद् वो॑ मरुतो ह॒विष्मा॒न् गाय॑द् गा॒थं सु॒तसो॑मो दु॒वस्यन् ॥ १ १६७ ०६
प्र तं वि॑वक्मि॒ वक्म्यो॒ य ए॑षाम् म॒रुता॑म् महि॒मा स॒त्यो अस्ति॑ ।
सचा॒ यद् ईं॒ वृष॑मणा अहं॒यु स्थि॒रा चि॒ज् जनी॒र् वह॑ते सुभा॒गाः ॥ १ १६७ ०७
पान्ति॑ मि॒त्रावरु॑णाव् अव॒द्याच् चय॑त ईम् अर्य॒मो अप्र॑शस्तान् ।
उ॒त च्य॑वन्ते॒ अच्यु॑ता ध्रु॒वाणि॑ वावृ॒ध ईं॒म् मरुतो॒ दाति॑वारः ॥ १ १६७ ०८
न॒ही नु वो॑ मरुतो॒ अन्त्य् अ॒स्मे आ॒रात्ता॑च् चि॒च् छव॑सो॒ अन्त॑म् आ॒पुः ।
ते धृ॒ष्णुना॒ शव॑सा शूशु॒वांसो ऽर्णो॑ न द्वेषो॑ धृष॒ता परि॑ ष्ठुः ॥ १ १६७ ०९
व॒यम् अ॒द्येन्द्र॑स्य प्रेष्ठा॑ व॒यं श्वो वो॑चेमहि सम॒र्ये ।
व॒यम् पु॒रा महि॑ च नो॒ अनु॒ द्यून् तन् न॑ ऋभु॒क्षा न॒राम् अनु॑ ष्यात् ॥ १ १६७ १०
ए॒ष व॒ स्तोमो॑ मरुत इ॒यं गीर् मा॑न्दार्यस्य॑ मा॒न्यस्य॑ का॒रोः ।
एषा या॑सीष्ट त॒न्वे॒ व॒यां वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥ १ १६७ ११

य॒ज्ञा-य॑ज्ञा वः स॒मना तु॒तु॒र्वणि॒र् धियं॑-धियं वो देव॒या उ॑ दधिध्वे ।
आ वो॑ ऽ॒र्वाचः॑ सुवि॒ताय॒ रोद॑स्योर् म॒हे व॑वृत्या॒म् अव॑से सुवृ॒क्तिभिः॑ ॥ १ १६८ ०१
व॒व्रासो॒ न ये स्व॒जाः स्वत॑वस॒ इषं॒ स्वर् अ॒भिजाय॑न्त॒ धूत॑यः ।
स॒ह॒स्रिया॑सो अ॒पां नोर्मय॑ आ॒सा गावो॒ वन्द्या॑सो॒ नोक्षणः॑ ॥ १ १६८ ०२
सोमा॑सो॒ न ये सु॒तास् तृ॒प्तांश॑वो हृ॒त्सु पी॒तासो॑ दु॒वसो॒ नास॑ते ।
ऐषा॒म् अंसे॑षु र॒म्भिणी॑व रारभे॒ हस्ते॑षु खा॒दिश् च॑ कृ॒तिश् च॒ सं द॑धे ॥ १ १६८ ०३
अव॒ स्वयु॑क्ता दि॒व आ वृथा॑ ययुर् अम॑र्त्याः॒ कश॑या चोदत॒ त्मना॑ ।
अ॒रे॒णव॑स् तुविजा॒ता अ॑चुच्यवुर् दृ॒ळ्हानि॑ चिन् म॒रुतो॒ भ्राज॑दृष्टयः ॥ १ १६८ ०४

को वो ऽन्तर् मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।
धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो ३ नैतशः ॥ १ १६८ ०५
क्व स्विद् अस्य रजसो महस् परं क्वावरम् मरुतो यस्मिन्न् आयय ।
यच् च्यावयथ विथुरेव संहितं व्य् अद्रिणा पतथ त्वेषम् अर्णवम् ॥ १ १६८ ०६
सातिर् न वो ऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ॥ १ १६८ ०७
प्रति ष्टोभन्ति सिन्धवः पविभ्यो यद् अभ्रियां वाचम् उदीरयन्ति ।
अव स्मयन्त विद्युतः पृथिव्यां यदी घृतम् मरुतः प्रुष्णुवन्ति ॥ १ १६८ ०८
असूत पृश्निर् महते रणाय त्वेषम् अयासाम् मरुताम् अनीकम् ।
ते सप्सरासो ऽजनयन्ताभ्वम् आद् इत् स्वधाम् इषिराम् पर्य् अपश्यन् ॥ १ १६८ ०९
एष व स्तोमो मरुत इयं गीर् मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १ १६८ १०

महश् चित् त्वम् इन्द्र यत एतान् महश् चिद् असि त्यजसो वरूता ।
स नो वेधो मरुतां चिकित्वान् सुम्ना वनुष्व तव हि प्रेष्ठा ॥ १ १६९ ०१
अयुज्रन् त इन्द्र विश्वकृष्टीर् विदानासो निष्षिधो मर्त्यत्रा ।
मरुताम् पृत्सुतिर् हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥ १ १६९ ०२
अम्यक् सा त इन्द्र ऋष्टिर् अस्मे सनेम्य् अभ्वम् मरुतो जुनन्ति ।
अग्निश् चिद् धि ष्मातसे शुशुक्वान् आपो न द्वीपं दधति प्रयांसि ॥ १ १६९ ०३
त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम् ।
स्तुतश् च यास् ते चकनन्त वायो स्तनं न मध्वः पीपयन्त वाजैः ॥ १ १६९ ०४
त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिद् ऋतायोः ।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः ॥ १ १६९ ०५
प्रति प्र याहीन्द्र मीळ्हुषो नॄन् महः पार्थिवे सदने यतस्व ।
अध यद् एषाम् पृथुबुध्नास एतास् तीर्थे नार्यः पौंस्यानि तस्थुः ॥ १ १६९ ०६
प्रति घोराणाम् एतानाम् अयासाम् मरुतां शृण्व आयताम् उपब्दिः ।
ये मर्त्यम् पृतनायन्तम् ऊमैर् ऋणावानं न पतयन्त सर्गैः ॥ १ १६९ ०७

त्वम् मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।
स्तवानेभि स्तवसे देव देवैर् विद्यामेषं वृजनं जीरदानुम् ॥ १ १६९ ०८

न नूनम् अस्ति नो श्वः कस् तद् वेद यद् अद्भुतम् ।
अन्यस्य चित्तम् अभि संचरेण्यम् उताधीतं वि नश्यति ॥ १ १७० ०१
किं न इन्द्र जिघांससि भ्रातरो मरुतस् तव ।
तेभिः कल्पस्व साधुया मा नः समरणे वधीः ॥ १ १७० ०२
किं नो भ्रातर् अगस्त्य सखा सन्न् अति मन्यसे ।
विद्मा हि ते यथा मनो ऽस्मभ्यम् इन् न दित्ससि ॥ १ १७० ०३
अरं कृण्वन्तु वेदिं सम् अग्निम् इन्धताम् पुरः ।
तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥ १ १७० ०४
त्वम् ईशिषे वसुपते वसूनां त्वम् मित्राणाम् मित्रपते धेष्ठः ।
इन्द्र त्वम् मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥ १ १७० ०५

प्रति व एना नमसाहम् एमि सूक्तेन भिक्षे सुमतिं तुराणाम् ।
रराणता मरुतो वेद्याभिर् नि हेळो धत्त वि मुचध्वम् अश्वान् ॥ १ १७१ ०१
एष व स्तोमो मरुतो नमस्वान् हृदा तष्टो मनसा धायि देवाः ।
उपेम् आ यात मनसा जुषाणा यूयं हि ष्ठा नमस इद् वृधासः ॥ १ १७१ ०२
स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शम्भविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वनान्य् अहानि विश्वा मरुतो जिगीषा ॥ १ १७१ ०३
अस्माद् अहं तविषाद् ईषमाण इन्द्राद् भिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्य् आसन् तान्य् आरे चकृमा मृळता नः ॥ १ १७१ ०४
येन मानासश् चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।
स नो मरुद्भिर् वृषभ श्रवो धा उग्र उग्रेभि स्थविरः सहोदाः ॥ १ १७१ ०५
त्वम् पाहीन्द्र सहीयसो नॄन् भवा मरुद्भिर् अवयातहेळाः ।
सुप्रकेतेभिः सासहिर् दधानो विद्यामेषं वृजनं जीरदानुम् ॥ १ १७१ ०६

चित्रो वो॑ ऽस्तु याम॑श् चित्र ऊती सु॒दान॑वः ।
मरु॑तो अहि॑भानवः ॥ १ १७२ ०१
आ॒रे सा वः॑ सुदानवो मरु॑त ऋञ्जती शरुः॑ ।
आ॒रे अश्मा॑ यम् अस्य॑थ ॥ १ १७२ ०२
तृ॒णस्कन्दस्य नु विशः परि॑ वृङ्क्त सुदानवः ।
ऊ॒र्ध्वान् नः॑ कर्त जी॒वसे॑ ॥ १ १७२ ०३

गायत् साम॑ नभन्य॑ यथा वेर् अर्चा॑म तद् वा॑वृधानं स्व॑र्वत् ।
गावो॑ धेनवो॑ ब॒र्हिष्य् अद॑ब्धा आ यत् स॒द्मान॑ दि॒व्यं विवा॑सान् ॥ १ १७३ ०१
अर्च॑द् वृषा॑ वृष॑भिः स्वेदु॑हव्यैर् मृगो नाश्नो अति यज् जुगु॑र्यात् ।
प्र म॑न्दयुर् मनां गूर्त॑ होता॑ भर॑ते मर्यो॑ मिथुना यज॑त्रः ॥ १ १७३ ०२
नक्ष॑द् धोता॑ परि सद्म॑ मिता यन् भर॑द् गर्भ॑म् आ शरदः॑ पृथिव्याः ।
क्रन्द॑द् अश्वो॑ नय॑मानो रुव॑द् गौर् अन्त॑र् दू॑तो न रोद॑सी चर॑द् वाक् ॥ १ १७३ ०३
ता कर्मा॑षतरास्मै प्र च्यौत्नानि॑ देव॑यन्तो॑ भरन्ते ।
जुजो॑षद् इन्द्रो॑ दस्मव॑र्चा नास॑त्येव सुग्म्यो॑ रथेष्ठाः ॥ १ १७३ ०४
तम् उ॑ ष्टुहीन्द्रं यो ह॒ सत्वा॑ यः शूरो॑ मघवा॑ यो र॑थेष्ठाः ।
प्रतीचश् चिद् योधी॑यान् वृष॑ण्वान् वव॒व्रुष॑श् चित् तम॑सो विह॒न्ता ॥ १ १७३ ०५
प्र यद् इत्था म॑हिना नृभ्यो॑ अस्त्य् अरं रोद॑सी कक्ष्ये॑ नास्मै॑ ।
सं वि॑व्य इन्द्रो॑ वृज॑नं न भूमा॑ भर्ति॑ स्वधावाँ॑ ओप॑शम् इ॑व द्याम् ॥ १ १७३ ०६
सम॑त्सु॑ त्वा शूर सताम् उ॑रा॒णम् प्र॑पथिन्त॑मम् परितंस॑यध्यै॑ ।
स॒जोष॑स इन्द्र॑म् मदे॑ क्षोणीः सूरिं चिद् ये अ॑नुमद॑न्ति वाजैः॑ ॥ १ १७३ ०७
एवा हि ते शं सव॑ना समुद्र आपो॑ यत् त॑ आसु मद॑न्ति देवीः ।
विश्वा॑ ते अनु जोष्या॑ भूद् गौः सूरीं॑श् चिद् यदि॑ धिषा वेषि॑ जना॑न् ॥ १ १७३ ०८
असा॑म यथा॑ सुषखाय॑ एन स्वभिष्टयो॑ नरां न शंसैः॑ ।
असद् यथा॑ न इन्द्रो॑ वन्दनेष्ठास् तुरो न कर्म॑ नय॑मान उक्था ॥ १ १७३ ०९

वि॒ष्पर्ध॑सो न॒रां न शंसै॑र् अ॒स्माका॑सद् इन्द्रो॒ वज्र॑हस्तः ।
मि॒त्रायुवो॒ न पूर्प॑तिं॒ सुशि॑ष्टौ मध्या॒युव॒ उप॑ शिक्षन्ति य॒ज्ञैः ॥ १ १७३ १०
य॒ज्ञो हि ष्मेन्द्रं॒ कश् चि॑द् ऋ॒न्धज् जु॑हुरा॒णश् चि॒न् मन॑सा परि॒यन् ।
ती॒र्थे नाच्छा॑ तातृषा॒णम् ओको॑ दी॒र्घो न सि॒ध्रम् आ कृ॑णो॒त्य् अध्वा॑ ॥ १ १७३ ११
मो षू ण॑ इ॒न्द्रात्र॑ पृ॒त्सु दे॒वैर् अस्ति॒ हि ष्मा॑ ते शुष्मिन्न् अव॒याः ।
म॒हश् चि॒द् यस्य॑ मी॒ळ्हुषो॑ य॒व्या ह॒विष्म॑तो म॒रुतो॒ वन्द॑ते॒ गीः ॥ १ १७३ १२
ए॒ष स्तोम॑ इन्द्र॒ तुभ्य॑म् अ॒स्मे ए॒तेन॑ गा॒तुं ह॑रिवो विदो नः ।
आ नो॑ ववृत्याः सुवि॒ताय॑ देव वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥ १ १७३ १३

त्वं राजे॑न्द्र॒ ये च॑ दे॒वा रक्षा॒ नॄन् पा॒ह्य् असुर॒ त्वम् अ॒स्मान् ।
त्वं सत्प॑तिर् म॒घवा॑ न॒स् तरु॑त्र॒स् त्वं स॒त्यो वस॑वानः सहो॒दाः ॥ १ १७४ ०१
दनो॒ विश॑ इन्द्र मृ॒ध्रवा॑चः स॒प्त यत् पुरः॒ शर्म॒ शार॑दीर् द॒र्त् ।
ऋ॒णोर् अ॒पो अ॑नव॒द्यार्णा॒ यूने॑ वृ॒त्रम् पु॑रु॒कुत्सा॑य रन्धीः ॥ १ १७४ ०२
अजा॒ वृत॑ इन्द्र॒ शूर॑पत्नी॒र् द्यां च॒ येभिः॑ पुरुहूत नू॒नम् ।
रक्षो॑ अ॒ग्निम् अ॒शुषं॒ तूर्व॑याणं सिं॒हो न द॒मे अपां॑सि॒ वस्तोः॑ ॥ १ १७४ ०३
शेष॒न् नु त इ॑न्द्र॒ सस्मि॑न् योनौ॒ प्रश॑स्तये॒ पवी॑रवस्य म॒ह्ना ।
सृ॒जद् अर्णां॒स्य् अव॒ यद् यु॒धा गास् तिष्ठ॒द् धरी॑ धृष॒ता मृ॒ष्ट वाजा॑न् ॥ १ १७४ ०४
वह॒ कुत्स॑म् इन्द्र॒ यस्मिं॑ज् चा॒कन् स्यू॑म॒न्यू ऋ॒ज्रा वात॒स्याश्वा॑ ।
प्र सूर॑श् च॒क्रं वृ॑हताद् अ॒भीके॑ ऽभि स्पृधो॑ यासिष॒द् वज्र॑बाहुः ॥ १ १७४ ०५
ज॒घन्वाँ॑ इन्द्र मि॒त्रेरू॑ञ् चो॒दप्र॑वृद्धो हरिवो॒ अदा॑शून् ।
प्र ये पश्य॑न्न् अर्य॒मणं॒ सचा॒योस् त्वया॑ शू॒र्ता वह॑माना॒ अप॑त्यम् ॥ १ १७४ ०६
रप॑त् क॒विर् इन्द्रा॒र्कसा॑तौ क्षां दा॒सायो॑प॒बर्ह॑णीं कः ।
कर॑त् ति॒स्रो म॒घवा॒ दानु॑चित्रा॒ नि दु॑र्यो॒णे कुय॑वाचम् मृ॒धि श्रे॑त् ॥ १ १७४ ०७
सना॒ ता त॑ इन्द्र॒ नव्या॒ आगुः॒ सहो॒ नभो ऽवि॑रणाय पू॒र्वीः ।
भि॒नत् पुरो॒ न भि॒दो अदे॑वीर् न॒नमो॒ वध॒र् अदे॑वस्य पी॒योः ॥ १ १७४ ०८
त्वं धुनि॒र् इन्द्र॒ धुनि॑मतीर् ऋ॒णोर् अ॒पः सी॒रा न स्रव॑न्तीः ।
प्र यत् स॑मु॒द्रम् अति॑ शू॒र पर्षि॑ पा॒रया॑ तु॒र्वशं॒ यदुं॑ स्व॒स्ति ॥ १ १७४ ०९

त्वम् अस्माकम् इन्द्र विश्वध स्या अवृकतमो नरां नृपाता ।
स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम् ॥ १ १७४ १०

मत्स्य् अपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
वृषा ते वृष्ण इन्दुर् वाजी सहस्रसातमः ॥ १ १७५ ०१
आ नस् ते गन्तु मत्सरो वृषा मदो वरेण्यः ।
सहावाँ इन्द्र सानसिः पृतनाषाळ् अमर्त्यः ॥ १ १७५ ०२
त्वं हि शूरः सनिता चोदयो मनुषो रथम् ।
सहावान् दस्युम् अव्रतम् ओषः पात्रं न शोचिषा ॥ १ १७५ ०३
मुषाय सूर्यं कवे चक्रम् ईशान ओजसा ।
वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥ १ १७५ ०४
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ॥ १ १७५ ०५
यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।
ताम् अनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥ १ १७५ ०६

मत्सि नो वस्यऽइष्टय इन्द्रम् इन्दो वृषा विश ।
ऋघायमाण इन्वसि शत्रुम् अन्ति न विन्दसि ॥ १ १७६ ०१
तस्मिन्न् आ वेशया गिरो य एकश् चर्षणीनाम् ।
अनु स्वधा यम् उप्यते यवं न चर्कृषद् वृषा ॥ १ १७६ ०२
यस्य विश्वानि हस्तयोः पञ्च क्षितीनां वसु ।
स्पाशयस्व यो अस्मध्रुग् दिव्येवाशनिर् जहि ॥ १ १७६ ०३
असुन्वन्तं समं जहि दूणाशं यो न ते मयः ।
अस्मभ्यम् अस्य वेदनं दद्धि सूरिश् चिद् ओहते ॥ १ १७६ ०४
आवो यस्य द्विबर्हसो ऽर्केषु सानुषग् असत् ।
आजाव् इन्द्रस्येन्दो प्रावो वाजेषु वाजिनम् ॥ १ १७६ ०५

यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।
ताम् अनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥ १ १७६ ०६

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनाम् पुरुहूत इन्द्रः ।
स्तुतः श्रवस्यन्न् अवसोप मद्रिग् युक्त्वा हरी वृषणा याह्य् अर्वाङ् ॥ १ १७७ ०१
ये ते वृषणो वृषभास इन्द्र ब्रह्मयुजो वृषरथासो अत्याः ।
ताँ आ तिष्ठ तेभिर् आ याह्य् अर्वाङ् हवामहे त्वा सुत इन्द्र सोमे ॥ १ १७७ ०२
आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि ।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक् ॥ १ १७७ ०३
अयं यज्ञो देवया अयम् मियेध इमा ब्रह्माण्य् अयम् इन्द्र सोमः ।
स्तीर्णम् बर्हिर् आ तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह ॥ १ १७७ ०४
ओ सुष्टुत इन्द्र याह्य् अर्वाङ् उप ब्रह्माणि मान्यस्य कारोः ।
विद्याम वस्तोर् अवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम् ॥ १ १७७ ०५

यद् ध स्या त इन्द्र श्रुष्टिर् अस्ति यया बभूथ जरितृभ्य ऊती ।
मा नः कामम् महयन्तम् आ धग् विश्वा ते अश्याम् पर्य् आप आयोः ॥ १ १७८ ०१
न घा राजेन्द्र आ दभन् नो या नु स्वसारा कृणवन्त योनौ ।
आपश् चिद् अस्मै सुतुका अवेषन् गमन् न इन्द्रः सख्या वयश् च ॥ १ १७८ ०२
जेता नृभिर् इन्द्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।
प्रभर्ता रथं दाशुष उपाक उद्यन्ता गिरो यदि च त्मना भूत् ॥ १ १७८ ०३
एवा नृभिर् इन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत् ।
समर्य इष स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥ १ १७८ ०४
त्वया वयम् मघवन्न् इन्द्र शत्रून् अभि ष्याम महतो मन्यमानान् ।
त्वं त्राता त्वम् उ नो वृधे भूर् विद्यामेषं वृजनं जीरदानुम् ॥ १ १७८ ०५

पूर्वीर् अहं शरदः शश्रमाणा दोषा वस्तोर् उषसो जरयन्तीः ।
मिनाति श्रियं जरिमा तनूनाम् अप्य् ऊ नु पत्नीर् वृषणो जगम्युः ॥ १ १७९ ०१
ये चिद् धि पूर्व ऋतसाप आसन् साकं देवेभिर् अवदन्न् ऋतानि ।
ते चिद् अवासुर् नह्य् अन्तम् आपुः सम् ऊ नु पत्नीर् वृषभिर् जगम्युः ॥ १ १७९ ०२
न मृषा श्रान्तं यद् अवन्ति देवा विश्वा इत् स्पृधो अभ्य् अश्नवाव ।
जयावेद् अत्र शतनीथम् आजिं यत् सम्यञ्चा मिथुनाव् अभ्य् अजाव ॥ १ १७९ ०३
नदस्य मा रुधतः काम आगन्न् इत आजातो अमुतः कुतश् चित् ।
लोपामुद्रा वृषणं नी रिणाति धीरम् अधीरा धयति श्वसन्तम् ॥ १ १७९ ०४
इमं नु सोमम् अन्तितो हृत्सु पीतम् उप ब्रुवे ।
यत् सीम् आगश् चकृमा तत् सु मृळतु पुलुकामो हि मर्त्यः ॥ १ १७९ ०५
अगस्त्यः खनमानः खनित्रैः प्रजाम् अपत्यम् बलम् इच्छमानः ।
उभौ वर्णाव् ऋषिर् उग्रः पुपोष सत्या देवेष्व् आशिषो जगाम ॥ १ १७९ ०६

युवो रजांसि सुयमासो अश्वा रथो यद् वाम् पर्य् अर्णांसि दीयत् ।
हिरण्यया वाम् पवयः प्रुषायन् मध्वः पिबन्ता उषसः सचेथे ॥ १ १८० ०१
युवम् अत्यस्याव नक्षथो यद् विपत्मनो नर्यस्य प्रयज्योः ।
स्वसा यद् वां विश्वगूर्ती भराति वाजायेट्टे मधुपाव् इषे च ॥ १ १८० ०२
युवम् पय उस्रियायाम् अधत्तम् पक्वम् आमायाम् अव पूर्व्यं गोः ।
अन्तर् यद् वनिनो वाम् ऋतप्सू ह्वारो न शुचिर् यजते हविष्मान् ॥ १ १८० ०३
युवं ह घर्मम् मधुमन्तम् अत्रये ऽपो न क्षोदो ऽवृणीतम् एषे ।
तद् वां नराव् अश्विना पश्वऽइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥ १ १८० ०४
आ वां दानाय ववृतीय दस्रा गोर् ओहेण तौग्र्यो न जिव्रिः ।
अपः क्षोणी सचते माहिना वां जूर्णो वाम् अक्षुर् अंहसो यजत्रा ॥ १ १८० ०५
नि यद् युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम् ।
प्रेषद् वेषद् वातो न सूरिर् आ महे ददे सुव्रतो न वाजम् ॥ १ १८० ०६
वयं चिद् धि वां जरितारः सत्या विपन्यामहे वि पणिर् हितावान् ।
अधा चिद् धि ष्माश्विनाव् अनिन्द्या पाथो हि ष्मा वृषणाव् अन्तिदेवम् ॥ १ १८० ०७

युवां चिद् धि ष्माश्विनाव् अनु द्यून् विरुद्रस्य प्रस्रवणस्य सातौ ।
अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत् सहस्रैः ॥ १ १८० ०८
प्र यद् वहेथे महिना रथस्य प्र स्यन्द्रा याथो मनुषो न होता ।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥ १ १८० ०९
तं वां रथं वयम् अद्या हुवेम स्तोमैर् अश्विना सुविताय नव्यम् ।
अरिष्टनेमिम् परि द्याम् इयानं विद्यामेषं वृजनं जीरदानुम् ॥ १ १८० १०

कद् उ प्रेष्ठाव् इषां रयीणाम् अध्वर्यन्ता यद् उन्निनीथो अपाम् ।
अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥ १ १८१ ०१
आ वाम् अश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥ १ १८१ ०२
आ वां रथो ऽवनिर् न प्रवत्वान् सृप्रवन्धुरः सुविताय गम्याः ।
वृष्णः स्थातारा मनसो जवीयान् अहम्पूर्वो यजतो धिष्ण्या यः ॥ १ १८१ ०३
इहेह जाता सम् अवावशीताम् अरेपसा तन्वा नामभिः स्वैः ।
जिष्णुर् वाम् अन्यः सुमखस्य सूरिर् दिवो अन्यः सुभगः पुत्र ऊहे ॥ १ १८१ ०४
प्र वां निचेरुः ककुहो वशाँ अनु पिशङ्गरूपः सदनानि गम्याः ।
हरी अन्यस्य पीपयन्त वाजैर् मथ्रा रजांस्य् अश्विना वि घोषैः ॥ १ १८१ ०५
प्र वां शरद्वान् वृषभो न निष्षाट् पूर्वीर् इषश् चरति मध्व इष्णन् ।
एवैर् अन्यस्य पीपयन्त वाजैर् वेषन्तीर् ऊर्ध्वा नद्यो न आगुः ॥ १ १८१ ०६
असर्जि वां स्थविरा वेधसा गीर् बाळ्हे अश्विना त्रेधा क्षरन्ती ।
उपस्तुताव् अवतं नाधमानं यामन्न् अयामञ् छ्रणुतं हवम् मे ॥ १ १८१ ०७
उत स्या वां रुशतो वप्ससो गीस् त्रिबर्हिषि सदसि पिन्वते नॄन् ।
वृषा वाम् मेघो वृषणा पीपाय गोर् न सेके मनुषो दशस्यन् ॥ १ १८१ ०८
युवाम् पूषेवाश्विना पुरंधिर् अग्निम् उषां न जरते हविष्मान् ।
हुवे यद् वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुम् ॥ १ १८१ ०९

अभूद् इदं वयुनम् ओ षु भूषता रथो वृषण्वान् मदता मनीषिणः ।
धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता ॥ १ १८२ ०१
इन्द्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा ।
पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसम् उप याथो अश्विना ॥ १ १८२ ०२
किम् अत्र दस्रा कृणुथः किम् आसाथे जनो यः कश् चिद् अहविर् महीयते ।
अति क्रमिष्टं जुरतम् पणेर् असुं ज्योतिर् विप्राय कृणुतं वचस्यवे ॥ १ १८२ ०३
जम्भयतम् अभितो रायतः शुनो हतम् मृधो विदथुस् तान्य् अश्विना ।
वाचं-वाचं जरितू रत्निनीं कृतम् उभा शंसं नासत्यावतम् मम ॥ १ १८२ ०४
युवम् एतं चक्रथुः सिन्धुषु प्लवम् आत्मन्वन्तम् पक्षिणं तौग्र्याय कम् ।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥ १ १८२ ०५
अवविद्धं तौग्र्यम् अप्स्व् अ १ न्तर् अनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उद् अश्विभ्याम् इषिताः पारयन्ति ॥ १ १८२ ०६
कः स्विद् वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत् ।
पर्णा मृगस्य पतरोर् इवारभ उद् अश्विना ऊहथुः श्रोमताय कम् ॥ १ १८२ ०७
तद् वां नरा नासत्याव् अनु ष्याद् यद् वाम् मानास उचथम् अवोचन् ।
अस्माद् अद्य सदसः सोम्याद् आ विद्यामेषं वृजनं जीरदानुम् ॥ १ १८२ ०८

तं युञ्जाथाम् मनसो यो जवीयान् त्रिवन्धुरो वृषणा यस् त्रिचक्रः ।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर् न पर्णैः ॥ १ १८३ ०१
सुवृद् रथो वर्तते यन्न् अभि क्षां यत् तिष्ठथः क्रतुमन्तानु पृक्षे ।
वपुर् वपुष्या सचताम् इयं गीर् दिवो दुहित्रोषसा सचेथे ॥ १ १८३ ०२
आ तिष्ठतं सुवृतं यो रथो वाम् अनु व्रतानि वर्तते हविष्मान् ।
येन नरा नासत्येषयध्यै वर्तिर् याथस् तनयाय त्मने च ॥ १ १८३ ०३
मा वां वृको मा वृकीर् आ दधर्षीन् मा परि वर्क्तम् उत माति धक्तम् ।
अयं वाम् भागो निहित इयं गीर् दस्राव् इमे वां निधयो मधूनाम् ॥ १ १८३ ०४
युवां गोतमः पुरुमीळ्हो अत्रिर् दस्रा हवते ऽवसे हविष्मान् ।
दिशं न दिष्टाम् ऋजूयेव यन्ता मे हवं नासत्योप यातम् ॥ १ १८३ ०५

अतारिष्म तमसस् पारम् अस्य प्रति वां स्तोमो अश्विनाव् अधायि ।
एह यातम् पथिभिर् देवयानैर् विद्यामेषं वृजनं जीरदानुम् ॥ १ १८३ ०६

ता वाम् अद्य ताव् अपरं हुवेमोच्छन्त्याम् उषसि वह्निर् उक्थैः ।
नासत्या कुह चित् सन्ताव् अर्यो दिवो नपाता सुदास्तराय ॥ १ १८४ ०१
अस्मे ऊ षु वृषणा मादयेथाम् उत् पणीर् हतम् ऊर्म्या मदन्ता ।
श्रुतम् मे अच्छोक्तिभिर् मतीनाम् एष्टा नरा निचेतारा च कर्णैः ॥ १ १८४ ०२
श्रिये पूषन्न् इषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।
वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥ १ १८४ ०३
अस्मे सा वाम् माध्वी रातिर् अस्तु स्तोमं हिनोतम् मान्यस्य कारोः ।
अनु यद् वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥ १ १८४ ०४
एष वां स्तोमो अश्विनाव् अकारि मानेभिर् मघवाना सुवृक्ति ।
यातं वर्तिस् तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥ १ १८४ ०५
अतारिष्म तमसस् पारम् अस्य प्रति वां स्तोमो अश्विनाव् अधायि ।
एह यातम् पथिभिर् देवयानैर् विद्यामेषं वृजनं जीरदानुम् ॥ १ १८४ ०६

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद् ध नाम वि वर्तेते अहनी चक्रियेव ॥ १ १८५ ०१
भूरिं द्वे अचरन्ती चरन्तम् पद्वन्तं गर्भम् अपदी दधाते ।
नित्यं न सूनुम् पित्रोर् उपस्थे द्यावा रक्षतम् पृथिवी नो अभ्वात् ॥ १ १८५ ०२
अनेहो दात्रम् अदितेर् अनर्वं हुवे स्वर्वद् अवधं नमस्वत् ।
तद् रोदसी जनयतं जरित्रे द्यावा रक्षतम् पृथिवी नो अभ्वात् ॥ १ १८५ ०३
अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।
उभे देवानाम् उभयेभिर् अह्नां द्यावा रक्षतम् पृथिवी नो अभ्वात् ॥ १ १८५ ०४
संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोर् उपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतम् पृथिवी नो अभ्वात् ॥ १ १८५ ०५

उर्वी सद्मनी बृहती ऋतेन हुवे देवानाम् अवसा जनित्री ।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतम् पृथिवी नो अभ्वात् ॥ १ १८५ ०६
उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतम् पृथिवी नो अभ्वात् ॥ १ १८५ ०७
देवान् वा यच् चकृमा कच् चिद् आगः सखायं वा सदम् इज् जास्पतिं वा ।
इयं धीर् भूया अवयानम् एषां द्यावा रक्षतम् पृथिवी नो अभ्वात् ॥ १ १८५ ०८
उभा शंसा नर्या माम् अविष्टाम् उभे माम् ऊती अवसा सचेताम् ।
भूरि चिद् अर्यः सुदास्तरायेषा मदन्त इषयेम देवाः ॥ १ १८५ ०९
ऋतं दिवे तद् अवोचम् पृथिव्या अभिश्रावाय प्रथमं सुमेधाः ।
पाताम् अवद्याद् दुरिताद् अभीके पिता माता च रक्षताम् अवोभिः ॥ १ १८५ १०
इदं द्यावापृथिवी सत्यम् अस्तु पितर् मातर् यद् इहोपब्रुवे वाम् ।
भूतं देवानाम् अवमे अवोभिर् विद्यामेषं वृजनं जीरदानुम् ॥ १ १८५ ११

आ न इळाभिर् विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगद् अभिपित्वे मनीषा ॥ १ १८६ ०१
आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
भुवन् यथा नो विश्वे वृधासः करन् सुषाहा विथुरं न शवः ॥ १ १८६ ०२
प्रेष्ठं वो अतिथिं गृणीषे ऽग्निं शस्तिभिस् तुर्वणिः सजोषाः ।
असद् यथा नो वरुणः सुकीर्तिर् इषश् च पर्षद् अरिगूर्तः सूरिः ॥ १ १८६ ०३
उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।
समाने अहन् विमिमानो अर्कं विषुरूपे पयसि सस्मिन्न् ऊधन् ॥ १ १८६ ०४
उत नो ऽहिर् बुध्न्यो ३ मयस् कः शिशुं न पिप्युषीव वेति सिन्धुः ।
येन नपातम् अपां जुनाम मनोजुवो वृषणो यं वहन्ति ॥ १ १८६ ०५
उत न ई त्वष्टा गन्त्व् अच्छा स्मत् सूरिभिर् अभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश् चर्षणिप्रास् तुविष्टमो नरां न इह गम्याः ॥ १ १८६ ०६
उत न ईम् मतयो ऽश्वयोगाः शिशुं न गावस् तरुणं रिहन्ति ।
तम् ई गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥ १ १८६ ०७

उत न ईम् मरुतो वृद्धसेनाः स्मद् रोदसी समनसः सदन्तु ।
पृषदश्वासो ऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥ १ १८६ ०८
प्र नु यद् एषाम् महिना चिकित्रे प्र युञ्जते प्रयुजस् ते सुवृक्ति ।
अध यद् एषां सुदिने न शरुर् विश्वम् एरिणम् प्रुषायन्त सेनाः ॥ १ १८६ ०९
प्रो अश्विनाव् अवसे कृणुध्वम् प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर् वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥ १ १८६ १०
इयं सा वो अस्मे दीधितिर् यजत्रा अपिप्राणी च सदनी च भूयाः ।
नि या देवेषु यतते वसूयुर् विद्यामेषं वृजनं जीरदानुम् ॥ १ १८६ ११

पितुं नु स्तोषम् महो धर्माणं तविषीम् ।
यस्य त्रितो व्य् ओजसा वृत्रं विपर्वम् अर्दयत् ॥ १ १८७ ०१
स्वादो पितो मधो पितो वयं त्वा ववृमहे ।
अस्माकम् अविता भव ॥ १ १८७ ०२
उप नः पितव् आ चर शिवः शिवाभिर् ऊतिभिः ।
मयोभुर् अद्विषेण्यः सखा सुशेवो अद्वयाः ॥ १ १८७ ०३
तव त्ये पितो रसा रजांस्य् अनु विष्ठिताः ।
दिवि वाता इव श्रिताः ॥ १ १८७ ०४
तव त्ये पितो ददतस् तव स्वादिष्ठ ते पितो ।
प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥ १ १८७ ०५
त्वे पितो महानां देवानाम् मनो हितम् ।
अकारि चारु केतुना तवाहिम् अवसावधीत् ॥ १ १८७ ०६
यद् अदो पितो अजगन् विवस्व पर्वतानाम् ।
अत्रा चिन् नो मधो पितो ऽरम् भक्षाय गम्याः ॥ १ १८७ ०७
यद् अपाम् ओषधीनाम् परिंशम् आरिशामहे ।
वातापे पीव इद् भव ॥ १ १८७ ०८
यत् ते सोम गवाशिरो यवाशिरो भजामहे ।
वातापे पीव इद् भव ॥ १ १८७ ०९

करम्भ ओषधे भव पीवो वृक्क उदारथिः ।
वातापि पीव इद् भव ॥ १ १८७ १०
तं त्वा वयम् पितो वचोभिर् गावो न हव्या सुषूदिम ।
देवेभ्यस् त्वा सधमादम् अस्मभ्यं त्वा सधमादम् ॥ १ १८७ ११

समिद्धो अद्य राजसि देवो देवैः सहस्रजित् ।
दूतो हव्या कविर् वह ॥ १ १८८ ०१
तनूनपाद् ऋतं यते मध्वा यज्ञः सम् अज्यते ।
दधत् सहस्रिणीर् इषः ॥ १ १८८ ०२
आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान् ।
अग्ने सहस्रसा असि ॥ १ १८८ ०३
प्राचीनम् बर्हिर् ओजसा सहस्रवीरम् अस्तृणन् ।
यत्रादित्या विराजथ ॥ १ १८८ ०४
विराट् सम्राड् विभ्वीः प्रभ्वीर् बह्वीश् च भूयसीश् च याः ।
दुरो घृतान्य् अक्षरन् ॥ १ १८८ ०५
सुरुक्मे हि सुपेशसाधि श्रिया विराजतः ।
उषासाव् एह सीदताम् ॥ १ १८८ ०६
प्रथमा हि सुवाचसा होतारा दैव्या कवी ।
यज्ञं नो यक्षताम् इमम् ॥ १ १८८ ०७
भारतीळे सरस्वति या वः सर्वा उपब्रुवे ।
ता नश् चोदयत श्रिये ॥ १ १८८ ०८
त्वष्टा रूपाणि हि प्रभुः पशून् विश्वान् समानजे ।
तेषां न स्फातिम् आ यज ॥ १ १८८ ०९
उप त्मन्या वनस्पते पाथो देवेभ्यः सृज ।
अग्निर् हव्यानि सिष्वदत् ॥ १ १८८ १०
पुरोगा अग्निर् देवानां गायत्रेण सम् अज्यते ।
स्वाहाकृतीषु रोचते ॥ १ १८८ ११

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्य् अ स्मज् जुहुराणम् एनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ १८९ ०१
अग्ने त्वम् पारया नव्यो अस्मान् स्वस्तिभिर् अति दुर्गाणि विश्वा ।
पूश् च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ १ १८९ ०२
अग्ने त्वम् अस्मद् युयोध्य् अमीवा अनग्नित्रा अभ्य् अमन्त कृष्टीः ।
पुनर् अस्मभ्यं सुविताय देव क्षां विश्वेभिर् अमृतेभिर् यजत्र ॥ १ १८९ ०३
पाहि नो अग्ने पायुभिर् अजस्रैर् उत प्रिये सदन आ शुशुक्वान् ।
मा ते भयं जरितारं यविष्ठ नूनं विदन् मापरं सहस्वः ॥ १ १८९ ०४
मा नो अग्ने ऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन् परा दाः ॥ १ १८९ ०५
वि घ त्वावाँ ऋतजात यंसद् गृणानो अग्ने तन्वे वरूथम् ।
विश्वाद् रिरिक्षोर् उत वा निनित्सोर् अभिह्रुताम् असि हि देव विष्पट् ॥ १ १८९ ०६
त्वं ताँ अग्न उभयान् वि विद्वान् वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर् मर्मृजेन्य उशिग्भिर् नाक्रः ॥ १ १८९ ०७
अवोचाम निवचनान्य् अस्मिन् मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रम् ऋषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥ १ १८९ ०८

अनर्वाणं वृषभम् मन्द्रजिह्वम् बृहस्पतिं वर्धया नव्यम् अर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ॥ १ १९० ०१
तम् ऋत्विया उप वाचः सचन्ते सर्गो न यो देवयताम् असर्जि ।
बृहस्पतिः स ह्य् अञ्जो वरांसि विभ्वाभवत् सम् ऋते मातरिश्वा ॥ १ १९० ०२
उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत् सवितेव प्र बाहू ।
अस्य क्रत्वाहन्यो यो अस्ति मृगो न भीमो अरक्षसस् तुविष्मान् ॥ १ १९० ०३
अस्य श्लोको दिवीयते पृथिव्याम् अत्यो न यंसद् यक्षभृद् विचेताः ।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेर् अहिमायाँ अभि द्यून् ॥ १ १९० ०४

ये त्वा देवोस्रिकम् मन्यमानाः पापा भद्रम् उपजीवन्ति पज्राः ।
न दूढ्ये ३ अनु ददासि वामम् बृहस्पते चयस इत् पियारुम् ॥ १ १९० ०५
सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
अनर्वाणो अभि ये चक्षते नो ऽपीवृता अपोर्णुवन्तो अस्थुः ॥ १ १९० ०६
सं यं स्तुभो ऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वाँ उभयं चष्टे अन्तर् बृहस्पतिस् तर आपश् च गृध्रः ॥ १ १९० ०७
एवा महस् तुविजातस् तुविष्मान् बृहस्पतिर् वृषभो धायि देवः ।
स न स्तुतो वीरवद् धातु गोमद् विद्यामेषं वृजनं जीरदानुम् ॥ १ १९० ०८

कङ्कतो न कङ्कतो ऽथो सतीनकङ्कतः ।
द्वाव् इति प्लुषी इति न्य् अ१ दृष्टा अलिप्सत ॥ १ १९१ ०१
अदृष्टान् हन्त्य् आयत्य् अथो हन्ति परायती ।
अथो अवघ्नती हन्त्य् अथो पिनष्टि पिंषती ॥ १ १९१ ०२
शरासः कुशरासो दर्भासः सैर्या उत ।
मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्य् अलिप्सत ॥ १ १९१ ०३
नि गावो गोष्ठे असदन् नि मृगासो अविक्षत ।
नि केतवो जनानां न्य् अ१ दृष्टा अलिप्सत ॥ १ १९१ ०४
एत उ त्ये प्रत्य् अदृश्रन् प्रदोषं तस्करा इव ।
अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥ १ १९१ ०५
द्यौर् वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।
अदृष्टा विश्वदृष्टास् तिष्ठतेलयता सु कम् ॥ १ १९१ ०६
ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः ।
अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥ १ १९१ ०७
उत् पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहा ।
अदृष्टान् सर्वाञ् जम्भयन् सर्वाश् च यातुधान्यः ॥ १ १९१ ०८
उद् अपप्तद् असौ सूर्यः पुरु विश्वानि जूर्वन् ।
आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥ १ १९१ ०९

सूर्ये॑ वि॒षम् आ स॑जामि॒ दृतिं॒ सुरा॑वतो गृ॒हे ।
सो चि॒न् नु न म॑राति॒ नो व॒यम् म॑रामा॒रे अ॑स्य ।
योज॑नं हरि॒ष्ठा मधु॑ त्वा मधु॒ला च॑कार ॥ १ १९१ १०
इ॒य॒त्ति॒का श॑कुन्ति॒का स॒का ज॑घास ते वि॒षम् ।
सो चि॒न् नु न म॑राति॒ नो व॒यम् म॑रामा॒रे अ॑स्य ।
योज॑नं हरि॒ष्ठा मधु॑ त्वा मधु॒ला च॑कार ॥ १ १९१ ११
त्रिः स॒प्त वि॑ष्पुलिङ्ग॒का वि॒षस्य॒ पुष्य॑म् अक्षन् ।
ताश् चि॒न् नु न म॑रन्ति॒ नो व॒यम् म॑रामा॒रे अ॑स्य ।
योज॑नं हरि॒ष्ठा मधु॑ त्वा मधु॒ला च॑कार ॥ १ १९१ १२
न॒वा॒नां न॑वती॒नां वि॒षस्य॒ रोपु॑षीणाम् ।
सर्वा॑साम् अग्रभं॒ नामा॒रे अ॑स्य ।
योज॑नं हरि॒ष्ठा मधु॑ त्वा मधु॒ला च॑कार ॥ १ १९१ १३
त्रिः स॒प्त म॑यू॒र्यः स॒प्त स्वसा॑रो अ॒ग्रुवः॑ ।
तास् ते॑ वि॒षं वि ज॑भ्रिर उद॒कं कु॒म्भिनी॑र् इव ॥ १ १९१ १४
इ॒य॒त्त॒कः कु॑षु॒म्भ॒कस् त॒कम् भि॑नद्म्य् अश्म॑ना ।
ततो॑ वि॒षम् प्र वा॑वृते॒ परा॑ची॒र् अनु॑ सं॒वतः॑ ॥ १ १९१ १५
कु॒षु॒म्भ॒कस् तद् अ॑ब्रवीद् गि॒रेः प्र॑वर्तमान॒कः ।
वृश्चि॑कस्यार॒सं वि॒षम् अ॑र॒सं वृ॑श्चिक ते वि॒षम् ॥ १ १९१ १६